# काव्यशास्त्रम् 2

Course Code: M23SN11DC

Discipline Core Course

Postgraduate Programme in Sanskrit Language and Literature

Self Learning Material



**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# काव्यशास्त्रम् 2

Course Code: M23SN11DC

Semester - IV

## Discipline Core Course
## Postgraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

SREENARAYANAGURU
OPEN UNIVERSITY

# काव्यशास्त्रम् 2

Course Code: M23SN11DC
Semester- IV
Discipline Core Course
MA Sanskrit Language and Literature


**Academic Committee**

Dr. Shyla C.A.
Prof. C.S. Sasikumar
Prof. M. S. Muraleedharan Pillai
Dr. K. M. Sangameshan
Dr. J.P. Prajith
Dr. Sreejith T.G.
Dr. N.K. Sundareswaran
Dr. K. Unnikrishnan
Dr. Chandrashekaran Nair



**Development of the Content**

Dr. Sreeja J.
Dr.Jothilekshmi M.

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Sreeja J.
Dr.Jothilekshmi M.
Dr. Vijayarajan K.U.
Chitra Baskar
Dr. Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition**
August 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-991145-2-4



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.


www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed “blended format,” a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The postgraduate programme in Sanskrit offers a special mix of language and literature studies. While the programme covers various aspects of Sanskrit literature and provides the necessary credits, its main goal is to help learners better understand how different types of literature connect with society. We have also made sure to introduce learners to the newest developments in Sanskrit literature. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university’s student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-08-2025

# CONTENTS

## PART - I


**Block - 1 साहित्यशास्त्रसामान्यपरिचयः** 1

Unit - 1 भरतस्य नाट्यशास्त्रम् - रसाध्यायस्य विषयाः - अभिनवभारतीव्याख्यायाः प्राधान्यम् - भामहस्य काव्यालङ्कारः - दण्डिनः काव्यादर्शः - वामनस्य काव्यालङ्कारसूत्रवृत्तिः - उद्भटस्य काव्यालङ्कारः - भट्टनायकः 2

Unit - 2 आनन्दवर्धनस्य परिचयः- तस्य कृतयः - ध्वन्यालोकः - देवीशतकम् - विषमबाणलीला - अर्जुनदेवचरितम् - तस्य दर्शनम् 18

Unit - 3 ध्वन्यालोकग्रन्थपरिचयः - चत्वारः उद्योताः - लोचनव्याख्या - अभिनवगुप्तः - अन्यानि व्याख्यानानि 27

Unit - 4 कुन्तकाचार्यपरिचयः- वक्रोक्तिजीवितम्-ग्रन्थविभागः-वक्रोक्तिजीविते प्रस्तुताः विषयाः 37

**Block - 2 ध्वन्यालोकप्रथमोद्योतः** 45

Unit - 1 ध्वन्यभावनिरुपणपर्यन्तम्-आदितः अभाववादीनां निरुपणपर्यन्तम् 46

Unit - 2 वाच्यात् व्यतिरिक्तस्य व्यङ्ग्यस्य सद्भावप्राधान्यकथनम् 63

Unit - 3 ध्वनिलक्षणकारिकानिरूपणम् 85

Unit - 4 भाक्तवादनिरूपणं खण्डनं च 101


## PART - II


**Block - 3 ध्वन्यालोकद्वितीयोद्यतः** 114

Unit - 1 ध्वनिभेदाः - लक्षणामूलध्वनिः - अविवक्षितवाच्यध्वनिः - तस्य भेदद्वयम्, अभिधामूलध्वनेः विवक्षितान्यपरवाच्यध्वनेः भेदद्वयम् 115

Unit - 2 रसध्वनेः अथवा असंलक्ष्यक्रमध्वनेः निरूपणं, रसवदलङ्कारात् भेदः 127

**Block - 4 वक्रोक्तिजीविते प्रथमोन्मेषः** 142

Unit - 1 वक्रतानिरूपणम् 143

Unit - 2 पदपूर्वार्धवक्रता भेदश्च 218

Unit - 3 प्रत्ययाश्रयवक्रता, वाक्यवक्रता 240

Unit - 4 प्रकरणवक्रता प्रबन्धवक्रता च 252

**Model Question Paper (SET – A)** 260

**Model Question Paper (SET – B)** 262

# साहित्यशास्त्रसामान्यपरिचयः

## BLOCK - 1

SGOU

UNIT 1

# भरतस्य नाट्यशास्त्रम् - रसाध्यायस्य विषयाः - अभिनवभारतीव्याख्यायाः प्राधान्यम् - भामहस्य काव्यालङ्कारः - दण्डिनः काव्यादर्शः - वामनस्य काव्यालङ्कारसूत्रवृत्तिः - उद्भटस्य काव्यालङ्कारः - भट्टनायकः

## Learning Outcomes

- संस्कृतसाहित्यावबोधं लभते।
- संस्कृतसाहित्ये काव्यशास्त्रकाराणां परिचयः।
- भरतमुनेः नाट्यशास्त्रस्य महत्वज्ञानम्।
- काव्यलक्षणविषये आलङ्कारिकमतानां भेदावगमनम्।

## Background

काव्यस्य आत्मा कः इत्यस्मिन् विषये आलङ्कारिकेषु विविधाः संवादाः प्रचलन्ति। रसमिति भरतमुनि - जगन्नाथ - अभिनवगुप्तादयः। रीतिरिति वामनः। अलङ्कारमेवेति भामह - मम्मट - रुद्रट - उद्भटप्रभृतयः। ध्वनिरिति आनन्दवर्धनप्रभृतयः। गुणः इति दण्डी। अनुमितिरिति भट्टनायकः। वक्रोक्तिरिति कुन्तकः। सर्वेऽपि रस - अलङ्कार - रीति - गुणादयः औचित्ये अन्तर्भवन्तीति क्षेमेन्द्रः। अस्मिन् पाठांशे भारतस्य पौराणिकः नाट्यकलाचार्यः भरतमुनिः, भरताचार्यस्य नाट्यशास्त्रस्य षष्ठाध्यायविषयाः, 'नाट्यशास्त्रस्य' भाष्यरूपेण गणना 'अभिनवभारतीव्याख्यायाः प्राधान्यं, काव्यशास्त्रपरम्परायाः प्रथमस्य आलङ्कारिकस्य भामहस्य प्रसिद्धं ग्रन्थं काव्यालङ्कारः, अलङ्कारसम्प्रदाये भामहानन्तरं दण्डी, तेन विरचितं काव्यादर्शम्, अलङ्कारशास्त्रपरम्परायां दण्डिनः परं वामनम्, वामनस्य सूत्रात्मकं ग्रन्थं काव्यालङ्कारसूत्रवृत्तिम्, उद्भटस्य काव्यशास्त्रविषयकग्रन्थं काव्यालङ्कारसंग्रहम्, ध्वनिविरोध्याचार्यं भट्टनायकं च अधिकृत्य वर्णितमस्ति। तत् पश्यामः।

SGOU

## Keywords

रससिद्धान्तस्य आधिकारिकः उपज्ञाता, नृत्य- वाद्य- सङ्गीत- साहित्यपरम्पराणाम् अक्षयनिधिः, नाट्यशास्त्रं पञ्चमो वेदः, रसः सभेदं , नाट्यशास्त्रस्य व्याख्यानं, अलङ्कारमेव काव्यस्य सर्वस्वं, दशगुणान्, काव्यस्यात्मा रीतिः, शान्तरसस्य स्थापनं, शब्दस्य त्रिविधं व्यापारम्।


## Discussion

काव्यस्य स्वरूपं किम् इति संजाते प्रश्ने उच्यते- प्राचीनकालात् एव कविकाव्यशब्दयोः तत्र-तत्र प्रयोगः समुपलभ्यते। तथाहि - 'कविर्मनीषी परिभूः स्वयम्भूर्याता यथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्य समाभ्यः।' इति ईशावास्योपनिषच्छ्रुतौ कविशब्दस्य प्रयोगः सर्वप्रथमं कृतो वर्तते। अनेनैव प्रकारेण महर्षि र्वाल्मीकिः रामायणे प्राह -

**कविशब्दस्य प्रथमं प्रयोगः ईशावास्योपनिषदि कृतो दृष्टो वर्तते**

'काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।' (वाल्मीकीय रामायणम् बा० का० सर्गः ३)

**वाल्मीकिना काव्यमिति "काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्" इति उक्तं वर्तते**

अग्निपुराणे तु काव्यस्य विवेचनं विस्तरेण कृतं वर्तते।

एतेन ज्ञायते यत् कविकाव्ययोः चर्चाऽतीव प्राचीनकालतः एव क्रियते स्म। वाल्मीकीय-रामायणस्य काव्यत्वं प्रायः सर्वैः काव्यसमालोचकैः समर्थितमस्ति। रामायणमहाभारतयोरनयोरेव काव्यत्वं समर्थयन् आचार्य आनन्दवर्धनो वक्ति।

तथा च रामायण महाभारतादिषु सङ्ग्रामादयः पुनः पुनरभिहिता अपि नवनवाः प्रकाशन्ते। प्रबन्धे चाङ्गीरस एक एवोपनिबध्यमानो अर्थविशेषलाभं छायातिशयं च पुष्णाति। कस्मिन्निवेति चेत्। यथा रामायणे यथा वा महाभारते। रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः "शोकः श्लोकत्वमागतः" इत्येवं वादिना।

**रामायणे करुणरसः सूत्रितः अस्ति**

निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता। (ध्वन्यालोकः ४/५ कारिकायाः वृत्तिः)

काव्यस्य स्वरूपं ते ते काव्याचार्यास्य स्वग्रन्थेषु यथावत् सूचिताः सन्ति। तथाहि कानिचन काव्यलक्षणन्यधस्तादुद्ध्रियन्ते-

१.शब्दार्थौ सहितौ काव्यम्- गद्यं पद्यं च तद्विधा। (भामहः काव्यालङ्कारः १/१६)

२. काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते इति वामनः। (काव्यलङ्कार सूत्रम् १/१)

३. शब्दार्थौ काव्यम्। (रुद्रटः काव्यालङ्कारः २/१)

४. अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्। (हेमचन्द्रः)

५. शब्दार्थौ निर्दोषौ सगुणौ, प्रायः सालङ्कारौ च काव्यम्। (वाग्भटः)

६. गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ। (विद्यानाथ-प्रतापरुद्रीये)

७. शब्दार्थौ वपुरस्य तत्र विवुधैरात्माऽभ्यधायिध्वनिः। (विद्याधरः)

विश्वनाथस्य मतानुसारं "वाक्यं रसात्मकं काव्यम्" इति

८. इष्टार्थव्यवच्छिन्ना पदावली (काव्यम्)। (दण्डी काव्यादर्शः)

९. तददोषौ शब्दार्थौ सगुणानलङ्कृती पुनः क्वापि। (मम्मटः)

१०. वाक्यं रसात्मकं काव्यम्। (विश्वनाथः)

११. रमणीयार्थप्रतिपादकः शब्दः काव्यम्। (पण्डितराजजगन्नाथः)

इमे सर्वे आचार्याः स्वस्वलक्षणग्रन्थेषु काव्यलक्षणं स्व-स्वमतानुसारेण चक्रुः। एतेषां समेषां काव्यलक्षणानां विचारणेनाभाति यत् काव्यलक्षणविषये काव्यलक्षणकाराणां द्वौ भेदौ भवतः।

१. केवलं शब्दस्यैव काव्यत्वाभिधायिनः काव्याचार्याः। २. शब्दार्थयोरुभयोरेव काव्यत्वं स्वीकारकारिण आचार्याश्च।

### 1.1.1 भरतस्य नाट्यशास्त्रम्

भरतमुनिः भारतस्य पौराणिकः नाट्यकलाचार्यः, सङ्गीत-शास्त्रज्ञः च आसीत्

भरतमुनिः भारतस्य पौराणिकः नाट्यकलाचार्यः, सङ्गीतशास्त्रज्ञः च आसीत्। तस्य नाट्यशास्त्रं विश्वविख्यातमेव। यूरोपियदेशेष्वपि अस्य कलाचातुरी व्यापृता दृश्यते। जर्मन्-आङ्गलेयीसाहित्ये नाटककर्तृषु अस्य योगदानं दृश्यते। भारतीयनाट्यकलायाः

अलङ्कारशास्त्र-साहित्य-सङ्गीतकलायाः च पिता भरतमुनिरेव। सोऽयं क्रिस्तोः पूर्वं द्विशतकस्य, क्रिस्त्वनन्तरं द्विशतकस्य च मध्ये जीवितमदाधारयत् इति गवेषकाः वदन्ति।

नाट्यशास्त्रम् अतिविपुलैः गाम्भीर्ययुक्तैः अनेकैः विषयैः सुघटितं कश्चन विश्वविज्ञानकोशः भवति

नाट्यशास्त्रम् अतिविपुलैः गाम्भीर्ययुक्तैः अनेकैः विषयैः सुघटितं कश्चन विश्वविज्ञानकोशः भवति। अयं ग्रन्थः नृत्य- वाद्य- सङ्गीत-साहित्यपरम्पराणाम् अक्षयनिधिरेव। अपि च रससिद्धान्तस्य आधिकारिकः उपज्ञाता भरतः एव। तस्य रससिद्धान्तः न केवलं इतरालङ्कारिकाणां कौतुकावहं किन्तु सर्वान् सहृदयान् रसे निमज्जनाय पर्याप्तः भवति। भरतस्य नाट्यकलाप्रावीण्यं साधारणजनान् विस्मयस्य, परमानन्दस्य, धार्मिकतायाः, आत्मीयतायाः, मानविकतायाः च उत्तुङ्गशृङ्गे नेष्यतीत्यत्र नास्ति संशयः। अधुना विश्वविख्यातं भारतीयं सांस्कृतिकपैतृककलारूपं भरतनाट्यं भरताचार्यस्य नाट्यशास्त्रानुसृतं नन्दिकेश्वरस्य अभिनयदर्पणानुसारं च भवति।

भरतः रससिद्धान्तस्य उपज्ञाता आसीत्

नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः षट्सहस्रं कारिकाः च सन्ति। साहित्यमण्डले अत्यगाधं स्थानं वोढुं पर्याप्तं भवति नाट्यशास्त्रम्। अधिकतया अनुष्टुप्छन्दसा रचितोऽयं ग्रन्थः। मध्ये मध्ये आर्यावृत्तं चोपयुक्तम्। केषुचित् भागेषु गद्यमपि द्रष्टुं शक्यते।

नाट्यशास्त्रस्य लेखनं प्रायः अनुष्टुप्छन्दसा जातम्

प्रायेण सर्वासु भाषासु नाट्यशास्त्रस्य स्वाधीनता दृश्यते। चलच्चित्रादिषु शृङ्गारादीनां नवरसानां भावाभिनयं द्रष्टुं शक्यते। आधुनिकनाटकरचनासु रङ्गमण्डपस्य निर्माणे च भरतोक्तनियमान् इदानीमपि प्रचारे सन्ति। नाटकादिषु प्रयुक्ताः भाषाः, रसाः, वृत्तयः, अभिनयरीतयः भरतमुनिना सूचितेन मार्गेणैव अधुनापि प्रचलन्ति। नायक-नायिकाभेदाः सात्विक-वाचिक-आङ्ग्य-आहार्याभिनयभेदाः, रसपोषणीः वृत्तयः रीतयः च सर्वान् मानवान् आनन्दसागरे निमज्जन्ति। छन्दशास्त्र- अलङ्कारसम्बन्धाः रचनाः कालान्तरे वर्तमानेभ्यः आचार्येभ्यः मार्गदर्शकान्यभूवन्। रस-अलङ्कार-ध्वनि-गुण-रीति-वक्रोक्ति-अनुमान-औचित्यवादिनः सर्वे आलङ्कारिकाः

नाट्यशास्त्रं पञ्चमो वेदः

तत्तन्मतस्थापनाय नाट्यशास्त्रमेव परिगणयन्ति। अतः नाट्यशास्त्रं पञ्चमो वेदः इत्युक्तिः सत्यमेव खलु।

### 1.1.2. रसाध्यायस्य विषयाः

षष्ठेऽध्याये रसनिष्पत्तिं, रसनिरूपणं च विचार्यन्ते

नाट्यशास्त्रस्य षष्ठेऽध्याये नाट्यन्नागभूतो रसो मुख्यरूपेण विवेचितः। भरतमुनेर्नाट्यशास्त्रं प्रसिद्धम्। अस्य षष्ठाध्याये मुख्यरूपेण रसः सभेदं निरूपितः। षष्ठे अध्याये रसनिष्पत्तिं, रसनिरूपणम् च विचार्यन्ते। किन्तु सहैव नाट्यविषयाणामन्येषामपि तत्त्वानामत्रा-नुषङ्गिकरूपेण निर्देशो विहितः। अयं षष्ठ एवाभिनवभारतीसहितो-ऽध्यायः पाठ्यग्रन्थत्वेन निर्धारितो वर्तते। अस्मिन् षष्ठाध्याये मुनिभिरात्रेयप्रभृतिभिः रसभावादिविषये पृच्छ्यते। भरतमुनिना तेषां प्रश्नानामुत्तरं दातुं प्रतिज्ञायते। प्रसङ्गतः उद्देश-लक्षण-परीक्षारूपाणां संग्रह-कारिका-निरुक्तानां सोदाहरणं लक्षणमपि विहितं भरतेन। मुनिभिः के कथं च प्रश्नाः कृता भरतेन कथं च तेषामुत्तराणि दातुं प्रतिज्ञा क्रियत इति पाठेऽस्मिन् भवन्तो ज्ञास्यन्ति।

### 1.1.3 अभिनवभारतीव्याख्यायाः प्राधान्यम्

'अभिनवभारती' भरतस्य 'नाट्यशास्त्रस्य' भाष्यरूपेण गण्यते

अभिनवगुप्तः भारतस्य कश्चन महत्त्वपूर्णः दार्शनिकः, काव्यशास्त्रज्ञः, तन्त्रविद् च आसीत्। सः कश्मीरदेशस्य प्रख्यातः विद्वान् आसीत्, दशमशताब्दे निवसति स्म। तस्य योगदानं विशेषतः तन्त्रस्य, दर्शनस्य, तथा साहित्यस्य च क्षेत्रेषु अत्यन्तं गम्भीरं विद्यते। अभिनवगुप्तस्य प्रसिद्धः ग्रन्थः भवति 'अभिनवभारती' इति ख्यातः, यत् भरतस्य 'नाट्यशास्त्रस्य' परं भाष्यरूपेण गण्यते। अस्मिन् ग्रन्थे सः रससिद्धान्तं स्पष्टं निरूपयति। तस्य मतानुसारं रसः केवलं सहृदयस्य हृदये उत्पन्ना अनुभूतिः भवति, न तु केवलं बाह्यव्याख्याने। सः केवलं नाट्यशास्त्रे एव न, अपि तु 'तन्त्रालोकः' इत्यस्मिन् ग्रन्थे काश्मीरशैवदर्शनस्य विस्तृतं विवरणं दत्तवान्। अस्मिन् ग्रन्थे सः तन्त्रस्य गूढतत्त्वानि प्रतिपादयति तथा शिवतत्त्वस्य रहस्यं

व्याख्यायते। अभिनवगुप्तस्य विचाराः केवलं तस्य समये न, अपि तु अद्यापि भारतीयदर्शनस्य, काव्यशास्त्रस्य, तन्त्रस्य च अध्ययनाय अत्यन्तं उपयुक्ताः भवन्ति। सः बहुप्रतिभाशाली आचार्यः आसीत्, अस्य ग्रन्थाः भारतीयतत्त्वशास्त्रपरम्परायां स्थायीमूल्यं धारयन्ति।

### 1.1.4. भामहस्य काव्यालङ्कारः

काव्यस्यात्मा अलङ्कारः इति भामहः

काव्यस्यात्मा कः? इति विषये इदानीमपि चर्चा प्रचलति विद्वत्सभायाम्। विभावानुभावसञ्चारीव्यभिचारिभावात् रसोत्पत्तिः इति नाट्याचार्यः भरतमुनिः। भरतकालादारभ्य आनन्दवर्धन-अभिनवगुप्तप्रभृतयः आलङ्कारिकाः रसवादमङ्गीकुर्वन्ति। किन्तु काव्यात्मा अलङ्कारः इति भामहप्रभृतयः। ऋग्वेदकालादारभ्य भाषामलङ्कर्तुम् अलङ्कारान् प्रयुज्यन्ते पण्डितवरेण्याः। काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते इति, हारादिवदलङ्काराः इत्यादयः वादाः प्रचलन्ति। वेदकालादारभ्य भङ्गीभणितिः काव्येषु सन्त्यपि साहित्यशाखासु काचन शाखारूपेण अलङ्कारस्य प्रसक्तिः भामहकालादेव गणयन्ति गवेषकाः।

प्रशस्तः वैयाकरणः, काव्यशास्त्रनिपुणः चासीत् भामहः

काश्मीरदेशस्थः कश्चन प्रशस्तः वैयाकरणः, काव्यशास्त्रनिपुणः चासीत् भामहः। यद्यपि दण्डिनः समकालिकत्वं केचन गवेषकाः वदन्त्यपि सोऽयं महात्मा दण्डिनः पुरोवर्ती क्रिस्तोः सप्तमे शतके जीवितमधारयत्। दण्डि-वामन-उद्भट-रुद्रटादयः अलङ्कारस्य प्राधान्यं अङ्गीकृत्य तदुपजीव्य साहित्यमण्डलं जाज्जलयामासुः।

भामहस्य आलङ्कारिकं ग्रन्थतल्लजं भवति काव्यालङ्कारम्

भामहस्य आलङ्कारिकं ग्रन्थतल्लजं भवति काव्यालङ्कारम्। सोऽयं वररुचेः 'प्राकृतप्रका' इति प्राकृतव्याकरणस्य व्याख्यां रचितवान्। काव्यालङ्कारे षड् परिच्छेदाः (अध्यायाः) सन्ति। तत्र प्रथमे परिच्छेदे ६० श्लोकाः सन्ति । द्वितीयतृतीययोः परिच्छेदयोः आहत्य १६०श्लोकाः सन्ति। अनयोरुभयोः परिच्छेदयोः अलङ्काराणां वर्णनं कृतं वर्तते। चतुर्थे परिच्छेदे दोषाणां निरूपणं कृतं वर्तते। अस्मिन् परिच्छेदे ५० श्लोकाः सन्ति। पञ्चमे परिच्छेदे न्यायानां निरूपणम्।

अत्र ७० श्लोकाः सन्ति। अनेन प्रकारेण सम्पूर्णे काव्यालङ्कारे ४०० श्लोकाः सन्ति। शब्दार्थौ सहितौ काव्यमिति व्याहरता तेन शब्दार्थयोः साहित्यमेव काव्यत्वेनाङ्गीकृतं ततोऽन्यैरलङ्कारशास्त्रस्याचार्यैः। तेन काव्येऽलङ्कारस्यैव प्रामुख्यं प्रादर्शितः। काव्यशोभाधायकं यत्किमपि वस्तु विद्यते तत्त्वलङ्कृतिरेवेति तस्याभिमतम्।

काव्यालङ्कारस्य काचन टीका वर्तते। उद्भटविरचितः भामहविवरणः (भामहवृत्तिः) इति तस्य नाम। केचन भागाः एव इदानीं तस्याः टीकायाः अवशिष्यन्ते। अलङ्कारमेव काव्यस्य सर्वस्वमिति समर्थयन् भामहः आलङ्कारिकाणां मध्ये देदीप्यते।

### 1.1.5. दण्डिनः काव्यादर्शः

दण्डी हर्षवर्धनस्य सभायां राजपण्डितः आसीत्

अलङ्कारसम्प्रदाये भामहादनन्तरं दण्डिनः स्थानमस्ति। अस्याचार्यस्य कालः क्रिस्त्वब्दस्य अष्टमशतकोऽस्ति। अयं राजा हर्षवर्धनस्य राजसभायां राजपण्डितोऽप्यभूत्। यथार्थतः दण्डी न केवलं काव्यशास्त्रज्ञः किन्तु कविः विद्वान् च। तस्य कल्पना उदात्ता। तस्य पदानि प्रसादमधुराणि ललितललितानि भावगर्भितानि च। श्रूयते च 'दण्डिनः पदलालित्यम्' इति।

दण्डिनः पाण्डित्यविषये विख्यातं श्लोकद्वयं वर्तते।

'दण्डिनः पदलालित्यम्'

**जाते जगति वाल्मीकौ कविरित्यभिधाभवत्।**
**कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि॥ इति।**

अपि च-

**उपमा कालिदासस्य भारवेरर्थगौरवम्।**
**दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः॥**

काव्यादर्शः, अवन्तिसुन्दरीकथा, दशकुमारचरितम् इत्येते दण्डिना रचिताः त्रयः ग्रन्थाः

काव्यादर्शः, अवन्तिसुन्दरीकथा, दशकुमारचरितम् इति त्रयं ग्रन्थतल्लजं दण्डिना रचितम्। छन्दोविचित्यां सकलस्तत्प्रपञ्चः प्रदर्शितः इत्युक्तत्वात् केचन विद्वांसः छन्दोविचितिः नामकः वृत्तशास्त्रग्रन्थः दण्डिनः इति मन्यन्ते।

आचार्यः दण्डी काव्ये गुणानामौत्कृष्ट्यं कल्पयति। को नाम गुणः? भावगतः अथवा रसगतः विशेषता भवति गुणः इति भरताचार्यः। दण्डिनः मते वैदर्भमार्गस्य प्राणस्वरूपाः गुणाः। काव्यशोभाकराः धर्माः गुणाः इति वामनः। काव्यधर्माः गुणाः इति आनन्दवर्धनः। अङ्गिनः रसस्य अङ्गाः गुणाः।

काव्यादर्शे त्रयः परिच्छेदाः (अध्यायाः) सन्ति

तेन विरचितः काव्यादर्शः साहित्यशास्त्रपरम्परायां विशिष्टं स्थानं भजते। काव्यादर्शे त्रयः परिच्छेदाः (अध्यायाः) सन्ति। प्रथमे परिच्छेदे काव्यलक्षणं काव्यगुणान् च विशदयति। काव्यशरीरं नाम तावदिष्टार्थव्यवच्छिन्ना पदावली इति, सर्गबन्धो महाकाव्यमुच्यते इति महाकाव्यलक्षणमारभते। महाकाव्ये वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि इत्यनेन नायकप्रतिनायकयोः स्वभाववर्णना कार्या। कथाख्यायिकयोरेकजातित्वमेव। वाङ्मयं चतुर्विधम्। महाकाव्यखण्ड-काव्यादिकं संस्कृतभाषायां, सेतुबन्धादिः प्राकृतभाषायां, कर्णपरा-क्रमादिकाव्यम् अपभ्रंशभाषायां, नाटकादि तु नानाभाषायामेव (संस्कृतप्राकृतापभ्रंशमिश्रभेदात्) वर्तितव्यम् इत्यादिकं विशदय्य वैदर्भमार्गस्य दशगुणान् विस्तारयति। श्लेषः-प्रसाद-समता-माधुर्य-सुकुमारता-अर्थव्यक्तिः-उदारता-ओजः-कान्ति-समाधयः दश-गुणाः।

श्लेषः-प्रसाद-समता-माधुर्य-सुकुमारता-अर्थव्यक्तिः-उदारता-ओजः-कान्ति-समाधयः दश- गुणाः

काव्यादर्शस्य द्वितीये परिच्छेदे प्राचीनाचार्यैः सूचितान् स्वभावोक्ति-उपमा-रूपक-दीपकादीन् पञ्चत्रिंशत् (३५) अर्थालङ्कारान् विशदयति।

दण्डिनः काव्यादर्शस्य प्रथमे परिच्छेदे काव्यगुणान् विवेचयति

तृतीये परिच्छेदे शब्दालङ्काराश्च निरूपिताः। यमकः यमकभेदाः च बहवः। पुनः स्वर-स्थान-वर्णनियमाः निरूपिताः। अन्ते काव्यदोषान् सविस्तरं प्रतिपादयति। अपार्थ-व्यर्थ-एकार्थ-संशय-वृत्तभङ्गादिदोषाः। दोषाः त्याज्याः। काव्यशास्त्रे प्रथमं दण्डिनैव दश गुणा विवेचिताः। गुणान् भूमिकीकृत्य मार्गसिद्धान्तोऽपि तेन प्रवर्तितः। अयमेव मार्गसिद्धान्तः वामनरीतिसिद्धान्तस्य जनक इति विदुषां मतम्।

काव्यमण्डले आलङ्कारिकमण्डले च युगपत् प्रशोभमानः भवति कविर्दण्डी।

### 1.1.6. वामनस्य काव्यालङ्कारसूत्रवृत्तिः

वामनः रीतिः काव्यस्य आत्मा इति मन्यते

अलङ्कारशास्त्रपरम्परायां दण्डिनः परं वामनस्य आविर्भावो जातः। आलङ्कारिकेषु प्रसिद्धः कश्चनाचार्यः आसीत् वामनः। काश्मीरदेशस्थः सः नवमे शतके स्वकाव्यजीवितम् अनयत्। वामनः कश्मीरवासी, किञ्चित् पूर्ववर्ती आनन्दवर्धनोत्। काव्यस्यात्मा रीतिः इति सः समर्थयति। यद्यपि तस्यानेके अनुयायिनः न सन्ति, तथापि रीतिम् इतरे आलङ्कारिकाः अङ्गीकुर्वन्ति। केचन ध्वनौ रीतिः अन्तर्भविष्यतीति वदन्ति। इतरे केचन रसे इति। गुणे रीतिरन्तर्भवतीति दण्डी। गुणरीत्योः कः बन्धः ? कः भेदः ?

भगवतः विशेषताः गुणाः इति भरतमुनिः। वैदर्भमार्गस्य प्राणाः गुणाः इति दण्डी। गुणविषयं शास्त्रियं लक्षणमेव आचार्येण वामनेन कृतम्। काव्यशोभायाः कर्तारो धर्माः गुणाः। (तृतीयेऽधिकरणे प्रथमाध्याये प्रथमं सूत्रम् ३-१-१)। गुणविशिष्टा पदरचना रीतिः(१-२-७)। दण्डी तु काव्यशोभाकरान् धर्मान् अलङ्कारः इति वदति। अलङ्काराभावेऽपि काव्यशोभा जायते। तत्कारणादेव वामनः गुणेभ्यः तत्स्थानमर्पयति। एवं काव्यात्मा रीतिरेवेति वामनः समर्थयति। वामनः गुणान् रीतेः धर्माः काव्यशोभाकरान् च कल्पयति।

काव्यालङ्कारसूत्रवृत्ते पञ्च अधिकरणानि सन्ति

सूत्ररूपेण काव्यतत्त्वानि विशदयतः तस्मिन् काव्यालङ्कारसूत्रवृत्तिनाम्नि ग्रन्थे पञ्चाधिकरणानि सन्ति। तेषु अधिकरणेषु द्वादश अध्यायाः च अन्तर्भवन्ति। प्रत्येकस्मिन्नधिकरणे द्वौ त्रयो वा अध्यायाः सन्ति। वामनः रीतेरेव काव्यात्मत्वं स्थापयामास। काव्यालङ्कारसूत्रग्रन्थस्य प्रथमाधिकरणस्य नाम शरीराधिकरणम्। अस्मिन्नधिकरणे त्रयः अध्यायाः सन्ति। द्वितीयाधिकरणस्य नाम दोष-दर्शनाधिकरणम्। अस्मिनधिकरणे द्वौ अध्यायौ भवतः। तृतीयाधिकरणस्य नाम गुणविवेचनाधिकरणम्। अत्रापि द्वावेवाध्यायौ

स्तः। चतुर्थाधिकरणस्य नाम आलङ्कारिकाधिकरणम्। अस्मिन्नधिकरणे त्रयः अध्यायाः सन्ति। पञ्चमधिकरणस्य नाम प्रायोगिकाधिकरणम्। अस्मिन्नधिकरणे द्वावध्यायौ स्तः। वामनः स्वयमेव स्वग्रन्थस्य सूत्राणां कविप्रियानाम्नीं वृत्तिं लिलेख। अत एवास्य ग्रन्थस्य नाम काव्यालङ्कारसूत्रवृत्तिं इति।

काव्यालङ्कारसूत्रवृत्तिरिति वामनस्य सूत्रात्मको ग्रन्थः

काव्यालङ्कारसूत्रवृत्तिरिति तस्य सूत्रात्मको ग्रन्थः। अयं रीतिसिद्धान्तस्य प्रर्वतक इति समीक्षकाः प्रतिपादयन्ति। वस्तुतोऽयं सौन्दर्यवादी। 'काव्यं ग्राह्यमलङ्कारात्, 'सौन्दर्यमलङ्कारः' तस्य प्रमुखः सिद्धान्तः। काव्यसौन्दर्यसम्पादकेषु साधनेषु रीतिरपि साधनाविशेष इत्येवोचितं वक्तव्यम्। रीतेः साध्यत्वेन प्रतिपादनं भ्रमात्मकमेव। 'रीतिरात्मा काव्यस्य' इत्यस्मिन् वाक्ये आत्मशब्दः प्रशंसापरः, नास्ति काव्यस्य सारभूतार्थकः।

### 1.1.7. उद्भटस्य काव्यालङ्कारः

उद्भटेन स्वतन्त्रतया लिखितः काव्यशास्त्रीयग्रन्थः काव्यालङ्कारसारसंग्रहः

अयं काश्मीरदेशवासी ब्राह्मण आसीत्। भट्टोद्भट इत्यपि कथ्यते। काश्मीरकस्य राज्ञो जयापीडस्य सभापण्डितत्वादयं काश्मिरदेशोद्भवः अष्टमनवमशताब्दीकश्च मन्यते। उद्भटो भामहस्य काव्यालङ्कारे - भामहविवरणं नाम टीकाग्रन्थं लिखितवान्। स टीकाग्रन्थोऽधुना न लभ्यते, तथापि तदुल्लेखो बहुधा साहित्यग्रन्थेषु दृश्यते। उद्भटेन स्वतन्त्रतया लिखितः काव्यशास्त्रीयग्रन्थः काव्यालङ्कारसारसंग्रहः लभ्यते। काव्यालङ्कारसारसङ्ग्रहनामको ग्रन्थः षड्वर्गेषु विभक्तो वर्तते। अस्मिन् ग्रन्थे कारिकाणां सम्पूर्णा संख्या एकोनाशीतिः (७९) वर्तते। अस्मिन् ग्रन्थे एकचत्वारिंशत् संख्याकानामलङ्काराणां निरूपणं कृतं वर्तते। उद्भटस्य द्वौ टीकाकारौ स्तः १. प्रतिहारेन्दुराजः, २. राजानकतिलकश्च। शान्तरसस्य स्थापनां सर्वप्रथमं भरतनाट्यशास्त्रस्य टीकाकारः उद्भटः स्वकीये काव्यालङ्कारसंग्रहनामके ग्रन्थे चकार। तदनन्तरम् आनन्दवर्धनाचार्य-अभिनवगुप्तपादौ तस्य शान्तरसस्य समर्थनं चक्रतुः।

उद्भटस्य ग्रन्थस्य द्वौ टीकाकारौ प्रतिहारेन्दुराजः, राजानकतिलकः च

उद्भटो नाट्यशास्त्रमपि टीकते, इति शाङ्गदेवः, अभिनवगुप्तकुन्तकादीनां समुल्लेखादवसीयते। अत एव 'नव नाट्ये रसाः स्मृताः' इति निर्दिशन् उद्भटो दशरूपकेतरेऽस्मिन् काव्यप्रपञ्चे रसवदादीनाम् अलङ्कारतामभ्युपगच्छन्नभिव्यनक्ति नाट्येषु रसानां प्रधानभावम्।

### 1.1.8. भट्टनायकः

ध्वनिविरोधिष्वा-चार्येषु भट्टनायकोऽतीव प्रमुखः

भट्टनायकः दशमस्य शताब्दस्य अत्यन्तं प्रख्यातः साहित्यकारोऽस्ति । सः हृदयदर्पणनामकस्य साहित्यशास्त्रस्य ग्रन्थस्य प्रणयनमकरोत्; किन्तु दौर्भाग्यात् तस्यापि ग्रन्थस्य साम्प्रतमुपलब्धिर्नो भवति। ध्वनिविरोधिष्वाचार्येषु भट्टनायकोऽतीव प्रमुखः। तेन प्रणीतो ग्रन्थो हृदयदर्पणाख्यो नास्ति समुपलब्धोऽद्यावधि। तस्य सिद्धान्तसारोऽवसीयते महामहेश्वराचार्य अभिनवगुप्तरचित अभिनव-भारती- ध्वन्यालोकलोचनटीकाभ्याम्। तस्य ग्रन्थो 'हृदयदर्पण' एव परवर्त्तिनामालङ्कारिकाणां समुल्लेखादस्ति सुविदितः।

भट्टनायकस्य प्रसिद्धः ग्रन्थः "हृदयदर्पणः" इति

काश्मीरदेशीयोऽयं भट्टनायकः आनन्दवर्धनात्परवर्ती, अभिनवगुप्तपादाच्च पूर्ववर्ती, रसप्राधान्यवाद्याचार्यः साहित्यविद्यायाः। भट्टनायकञ्चोद्दिश्य कृतैरभिनवगुप्तपादेन बहुविधैराक्षेपैः प्रतीयते यद् भट्टनायकोऽभिनवगुप्तपादस्य नातिपूर्ववर्ती परं किञ्चित्पूर्ववर्ती। हृदयदर्पणग्रन्थोऽपि अभिनवगुप्तपादेन सम्यगधीत एव प्रतिभाति। अतो दशमशतकस्य मध्यभागः एव भट्टनायकस्य स्थितिकालत्वेन स्थिरीकर्तुं शक्यते

भट्टनायकः साहित्य - विषये स्वतन्त्रो विचारक आसीत्

भट्टनायकः साहित्यविषये स्वतन्त्रो विचारक आसीत्। सः ध्वनेः प्रबलतयाविरोधमकार्षीत्। तस्याचार्यस्य रस निष्पत्तिविषयेऽपि स्वतंत्राः विचारा आसन्। अभिनवगुप्तपादाचार्यः भट्टनायकस्य विचारान् अनूद्य लोचने तेषां प्रत्याख्यानमपि करोति स्म। यथा-

'वस्तुध्वनिं दूषयता रसध्वनिः तदनुग्राहकः समर्थ्यत इति सुष्टुतरां ध्वनिध्वंसोऽयम्।' इत्यादि।

इति लोचने अभिनवगुप्तपादः।

स: मीमांसकः आसीत्, वेदस्य परमप्रा-माण्यं च स्वीकृतवान्

भट्टनायको मीमांसक आसीत्। मीमांसका वेदस्यैव परमप्रमाणतां स्वीकुर्वन्ति। वेदेषु व्यञ्जनायाः कश्चनाऽप्यवसर एव नहि भवति। यतः वेदस्तु प्रभुः। तस्योपदेशाः प्रभुसम्मिताः। ते हि यथायथमेव ग्राह्या भवन्ति।

भट्टनायकः रसोत्पत्तौ नवीनं त्रिविधव्यापारात्मकं दृष्टिकोणं स्वीकृतवान्

भट्टनायको हि रसोत्पत्तिविषये नवीनं दृष्टिपथमादत्ते। स हि शब्दस्य त्रिविधं व्यापारं मन्यते। अभिधा, भावकत्वं, भोजकत्वञ्च। तत्राभिधाव्यापारेण काव्यस्य सामान्योऽर्थ उपस्थितो भवति। भावकत्वव्यापारेण सीतारामादीनां विशेषस्वरूपमुपकृत्य तान् साधारणीकरोति। भोजकत्व-व्यापारेण सामाजिकान् रसानुभवं कारयति।

यथोक्तम् -

**अभिधा भावना चान्या तद्भोगीकृतिरेव च।**
**अभिधाधामतां याते शब्दार्थालङ्कृती ततः॥**
**भावनाभाव्य एषोऽपि श्रृङ्गारादिगणो मतः।**
**तद्भोगीकृतिरूपेण व्याप्यते सिद्धिमान् नरः॥ इति।**

**लोचने यथा-**

**'अभिधायकत्वं वाच्यविषयं, भावकत्वं रसविषयं, भोक्तृत्वं सहृदयविषयमिति त्रयोंशभूताः व्यापाराः।**

रसप्राधान्यवादी भट्टनायकः

एवं भावकत्वव्यापारेण भावानां साधारणीकरणं, पुनः साधारणीकृतानां भावानां भोजकत्वव्यापारेण रसरूपेण भोगो न पुनः व्यञ्जनाव्यापारेण रसाभिव्यक्तिरिति तस्य सिद्धान्तः। तेन काव्ये ध्वनिवादिभिः स्वीकृतं वस्त्वलङ्कारयोश्चमत्कारमपि प्रत्याख्याय केवलं रसस्यैव चमत्कारातिशयः सिद्धान्तितः। वस्तुतो रसप्राधान्यवादी

भट्टनायकः। तन्मते काव्यनाट्ययोः सहृदयहृदयावर्जकता रसास्वादेनैव सम्भवति। अयं काव्यस्य सारभूततया रसमेवाख्याति।

## Summarised Overview

काव्यशास्त्रस्य आचार्येषु भरतमुनिः प्राचीनतमो विद्यते। सः नाट्यशास्त्रनामकस्य नाट्यविषयकस्य महतो ग्रन्थस्य निर्माणमकार्षीत्। नाट्यशास्त्रे षट्त्रिंशत् अध्यायाः षट्सहस्रं कारिकाः च सन्ति। नाट्यशास्त्रस्य षष्ठेऽध्याये नाट्यन्नागभूतो रसो मुख्यरूपेण विवेचितः। नाट्यशास्त्रस्य प्रख्यातो व्याख्याकारः अभिनवगुप्तपादाचार्यो वर्तते। सः नाट्यशास्त्रस्य अभिनवभारतीनाम्नीं व्याख्यां प्रणिनाय। इयं व्याख्या अतीव प्रसिद्धा वर्तते। अस्मिन् ग्रन्थे सः रससिद्धान्तं स्पष्टं निरूपयति। प्रशस्तः वैयाकरणः, काव्यशास्त्रनिपुणः चासीत् भामहः। भामहः समुपलब्धकाव्यपरम्परायाः आलङ्कारिकः तस्य प्रसिद्धो ग्रन्थः काव्यालङ्कारः। स खलु अलङ्कारसम्प्रदायस्य प्रवर्तकः षष्ठशतकस्य आलङ्कारिकः। अलङ्कारसम्प्रदाये भामहादनन्तरं दण्डिनः स्थानमस्ति। तेन विरचितः काव्यादर्शः साहित्यशास्त्रपरम्परायां विशिष्टं स्थानं भजते। काव्यशास्त्रे प्रथमं दण्डिनैव दश गुणा विवेचिताः। गुणान् भूमिकीकृत्य मार्गसिद्धान्तोऽपि तेन प्रवर्तितः। अयमेव मार्गसिद्धान्तः वामनरीतिसिद्धान्तस्य जनक इति विदुषां मतम्। अलङ्कारशास्त्रपरम्परायां दण्डिनः परं वामनस्य आविर्भावो जातः। अयमाचार्यः काव्यालङ्कारसूत्रनामकं ग्रन्थं निर्मितवान्। अयमेवाचार्यः काव्यशास्त्रस्येतिहासे रीतिसम्प्रदायस्य प्रवर्तकरूपेण स्वीक्रियते। उद्भटेन स्वतन्त्रतया लिखितः काव्यशास्त्रीयग्रन्थः काव्यालङ्कारसारसंग्रहः। अस्मिन् ग्रन्थे एकचत्वारिंशत् संख्याकानामलङ्काराणां निरूपणं कृतं वर्तते। भट्टनायकः साहित्यविषये स्वतन्त्रो विचारक आसीत्। सः ध्वनेः प्रबलतया विरोधमकार्षीत्। तस्याचार्यस्य रसनिष्पत्तिविषयेऽपि स्वतंत्राः विचारा आसन्।

## Assignments

**उत्तरं लिखत।**

1. रामायणे कः रसः सूत्रितः अस्ति?
2. विश्वनाथस्य मतानुसारं काव्यं किं?
3. नाट्यशास्त्रस्य भाषाशैली का?

4. नाट्यशास्त्रे केन अध्यायेन रसः निरूपितः?
5. ‘अभिनवभारती’ ग्रन्थः कस्य ग्रन्थस्य भाष्यरूपेण गण्यते?
6. भामहकृतः "काव्यालङ्कार" इत्यस्मिन् ग्रन्थे किम् प्रतिपाद्यते?
7. काव्यादर्शे वर्तमानाः दश गुणाः के?
8. वामनस्य प्रसिद्धः ग्रन्थः कः? वामनस्य मतानुसारं काव्यस्य आत्मा कः?
9. उद्भटेन कस्य ग्रन्थस्य टीका रचिता?
10. काव्यालङ्कारसारसङ्ग्रहे कति अलङ्काराः वर्णिताः?
11. भट्टनायकस्य प्रसिद्धः ग्रन्थः कः?
12. भट्टनायकस्य मतानुसारं शब्दस्य कति व्यापाराः?

**टिप्पणिं लिखत।**

1. “काव्यशब्दस्य प्राचीनप्रयोगं विस्तरेण निरूप्यताम्।”
2. नाट्यशास्त्रस्य विषयवैविध्यं वर्णयत।
3. रससिद्धान्ते भरतस्य योगदानं स्पष्टं कुरुत।
4. “नाट्यशास्त्रस्य षष्ठाध्यायस्य विशेषतां संक्षेपेण निरूप्यताम्”।
5. भामहस्य काव्यदृष्टिः कीदृशी ?
6. दण्डिनः काव्ये गुणानां प्राधान्यं प्रतिपादयति। स्पष्टं कुरुत।
7. वामनस्य रीतिसिद्धान्तं विशदयत?
8. काव्यालङ्कारसारसङ्ग्रहस्य स्वरूपं संक्षेपेण वर्णयत।
9. रसशास्त्रे उद्भटस्य स्थापनायाः विशेषताः कीदृशाः?
10. ध्वनिवादे भट्टनायकस्य मतं किम् ?
11. भट्टनायकस्य रससिद्धान्तः संक्षेपेण वर्णयत ?

**निबन्धात्मकप्रश्नानानाम् उत्तरं लिखत।**

1. संस्कृतसाहित्यशास्त्रे, काव्यलक्षणविषये आलङ्कारिकमतानां भेदं विशदयत।
2. भारतीयनाट्यकलायाः अलङ्कारशास्त्र - साहित्य - सङ्गीतकलायाः च पिता भरतमुनिरेव- समर्थयत।

## Suggested Readings


1. लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वारणासि, 2016
2. P.V Kane, History of Sanskrit Poetics, Motilal Banarsidas, New Delhi, 1987


## References


1. भरतमुनिः, नाट्यशास्त्रम्, आङ्गलेयविवर्तनं, व्याख्या च मुन्षि रां मनोहर् लालू प्रसिद्धीकरणम्, २०१६
2. भामहः, काव्यालङ्कारः, मोटिलाल् बनारसिदास्, १९७०
3. डो. के. सुकुमारपिल्ला, काव्यमीमांसा, केरल भाषा इन्स्टिट्यूट्ट्, तिरुवनन्तपुरम्।
4. दण्डी, काव्यादर्शः, व्याख्याकारः आचार्य श्रीरामचन्द्रमिश्रः, चौखम्बा विद्याभवन्, वाराणसी, १९९८
5. वामनः, काव्यालङ्कारसूत्रवृत्तिः, व्याख्या- केदारनाथशर्मा, चौखम्बा कृष्णदास अक्कादमी, वाराणसी, २०१८
6. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# आनन्दवर्धनस्य परिचयः- तस्य कृतयः - ध्वन्यालोकः - देवीशतकम् - विषमबाणलीला - अर्जुनदेवचरितम् - तस्य दर्शनम्

## Learning Outcomes

- काव्यरूपेषु ध्वनिसिद्धान्तानां प्रयोगपरिज्ञानम्।
- ध्वनितत्वावबोधं लभते।
- ध्वनिसम्प्रदायस्य परिचयः।
- ध्वनिसम्प्रदायस्य प्रवर्तकः आनन्दवर्धनः, तस्य दर्शनं च परिचिनुमः।

## Background

काव्यस्य आत्मा कः? इत्यस्मिन् विषये आलङ्कारिकेषु विविधाः संवादाः प्रचलन्ति। रसमिति भरतमुनि - जगन्नाथ - अभिनवगुप्तादयः। रीतिरिति वामनः। अलङ्कारमेवेति भामह - मम्मट- रुद्रट - उद्भटप्रभृतयः। गुणः इति दण्डी। अनुमितिरिति भट्टनायकः। वक्रोक्तिरिति कुन्तकः। सर्वेऽपि रस-अलङ्कार-रीति-गुणादयः औचित्ये अन्तर्भवन्तीति क्षेमेन्द्रः। 'काव्यस्यात्मा ध्वनिः' इति आनन्दवर्धनः। रससिद्धान्तवत् न केवलं भारते किन्तु समस्तेऽस्मिन् प्रपञ्चे विख्यातं बभूव आनन्दवर्धनस्य ध्वनिसिद्धान्तः। अस्मिन् पाठांशे ध्वनिसिद्धान्तस्य प्रवर्तकः आनन्दवर्धनं, तस्य ग्रन्थान् ध्वन्यालोकः, देवीशतकम्, विषमबाणलीला, अर्जुनदेवचरितम्, आनन्दवर्धनस्य दर्शनम् इत्यादीन् विषयान् वर्णितमस्ति। तत् पश्यामः।

## Keywords

ध्वनिसम्प्रदायस्य प्रवर्तकः आनन्दवर्धनः, काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः, आनन्दवर्धनाचार्यस्य पञ्च ग्रन्थाः, मौलिकग्रन्थाः, शास्त्रग्रन्थाः, ध्वनिरेव काव्यस्यात्मा, ध्वन्यालोकः, वैय्याकरणानां स्फोटसिद्धान्तः।

## Discussion

### 1.2.1. आनन्दवर्धनः

ध्वनिसिद्धान्त-प्रवर्तकः आनन्दवर्धनाचार्यः

आनन्दवर्धनो हि काव्यशास्त्राकाशे सर्वसमुज्ज्वलं नक्षत्रम्। काव्यपरम्परायाः ध्वनिसम्प्रदायस्य प्रवर्तकः आनन्दवर्धनः वर्तते। आनन्दवर्धनः नोणोपाध्यायस्य पुत्रः आसीत्। काव्यजगति तस्य ध्वन्यालोकस्य प्रवेशः सुमहत् सौभाग्यमाधत्ते। आनन्दवर्धनः काश्मीरक्षितिपालस्य अवन्तिवर्मणः सभापण्डितः आसीत्। तस्य स्थितिकालो राजतरङ्गिण्याम्-

**मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।**
**प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः॥**

आनन्दवर्धनाचार्यस्य स्थितिकालः नवम शताब्दः स्वीक्रियते

काश्मीराधिपतेः अवन्तिवर्मणः समयः ८५५ ईस्वीतः ८८३ ईस्वीयं यावत् स्वीक्रियते। आनन्दवर्धनोऽपि तत्कालिकः। केचित्तु अवन्तिवर्मा हि ९१०-९४१ मितवैक्रमाब्दानभितः सिंहासनासीन आसीत्। तेन आनन्दवर्धनोऽपि ८८०-९५० मितवैक्रमादानभितः स्थितिकालः अनुमीयते। अत एवानन्दवर्धनाचार्यस्य कालो नवमः शताब्दः स्वीक्रियते। आनन्दवर्धनाचार्यस्य पञ्च ग्रन्थाः प्रख्याताः सन्ति। तेषु पञ्चसु ख्यातग्रन्थेषु ध्वन्यालोकेनैवानन्दवर्धनस्य प्रख्यातिरास्ते। अस्मिन् ध्वन्यालोकग्रन्थे आनन्दवर्धनाचार्यः प्रतिपादयति यत् ध्वनिरेव काव्यस्यात्मा वर्तते। अयं ध्वनिवादः सर्वाधिकव्यवस्थितरूपेण प्रचरितः। पि.वि. काने महाशयः एवं सूचयति यत् अलङ्कारशास्त्रे

ध्वन्यालोके प्रतिपादितं यत् ध्वनिः एव काव्यस्य आत्मा अस्ति

पि.वि. काने महोदयः ध्वन्यालोकग्रन्थं पाणिनेरष्टाध्यायीव स्थानं वहति इति सूचयति

आनन्दवर्धनस्य ध्वन्यालोकः उन्नतं स्थानं वहति। व्याकरणशास्त्रे पाणिनेः अष्टाध्यायी इव वेदान्ते शङ्कराचार्यस्य वेदान्तभाष्यमिव प्राधान्यमर्हति ध्वन्यालोकः। अपि च डानियल् एच्.एच्. इग्नल्स् आनन्दवर्धनं संस्कृतनिरूपकेषु नितरां प्रशोभमानः सम्राट् इव गणयति। अभिनवगुप्तः (९५० - १०१६) ध्वन्यालोकस्य व्याख्यानं रचितवान्। तत् 'लोचनम्' इति नाम।

**1.2.2. तस्य कृतयः- ध्वन्यालोकः, देवीशतकम्, विषमबाणलीला, अर्जुनदेवचरितम्**

ध्वन्यालोकः साहित्यशास्त्रीयो ग्रन्थः

आनन्दवर्धनाचार्येण १. विषमबाणलीला, २. अर्जुनदेव-चरितम्, ३. देवीशतकम् ४. तत्त्वालोकः, ५. ध्वन्यालोकश्चेति पञ्च मौलिकग्रन्थाः तथा एका ६. धर्मकीर्तेः प्रमाणविनिश्चयस्य धर्मोत्तमा टीका, सर्वमाहत्य षड्ग्रन्थाः प्रणीताः। एतेषु ध्वन्यालोक एव साहित्यशास्त्रीयो ग्रन्थः। काव्यशास्त्रपरम्परायां ध्वनिप्रस्थानप्रवर्तनाय विरचितोऽयं ग्रन्थः समीक्षकैरत्यन्तं समादृतोऽस्ति। वस्तुतः ध्वनिसम्प्रदायस्य अयमेव ग्रन्थो मौलिकभूतोऽस्ति। सर्वेऽपि आधारभूताः ध्वनिसिद्धान्ता अस्मिन् ग्रन्थरत्ने निबद्धाः सन्ति। अस्य प्रथम उद्योतस्यारम्भ एव ध्वन्यभावविकल्पाः पर्यालोचिताः सन्ति।

आनन्दवर्धनः काव्यविभागे त्रयः ग्रन्थाः विरचितवान्

शास्त्रग्रन्थेषु ध्वन्यालोकं, विनिश्चयटीकाविवृतिः, तत्त्वालोकः इति त्रीन् ग्रन्थान् च व्यरचयत्। आनन्दवर्धनः काव्यविभागे त्रयः ग्रन्थाः विरचिताः। ते विषमबाणलीला, अर्जुनचरितं, देवीशतकं च इति। तेषु विषमबाणलीला प्राकृतभाषायामेव। विवृतेः सूचना ध्वन्यालोके प्रथमे चतुर्थे च उद्योते वर्तते। अर्जुनचरितस्य विषमबाणलीलायाश्च कतिपयानि पद्यानि ध्वन्यालोके समुद्धृतानि।

अर्जुनचरितं महाकाव्यम् - अस्यापि महाकाव्यस्योल्लेखो ध्वन्यालोक एव दृश्यते तद्यथा चतुर्दशकारिकायां वृत्तौ ध्वनिकृतोक्त 'इदमपरं प्रबन्धस्य रसाभिव्यञ्जकत्वे निबन्धनम्। इतिवृत्तवशायातां कथञ्चिद्रसाननुगुणां स्थितिं त्यक्त्वा पुनरुत्प्रेक्ष्याप्यन्तराभीष्ट-

रसोचितकथोन्नयो विधेयः। यथा कालिदासप्रबन्धेषु। यथा च सर्वसेनविरचिते हरिविजये। यथा च मदीय एवार्जुनचरिते महाकाव्ये।'

तथैव रसानामविरोधसम्पादने ध्वनिकृतोक्तं 'विपक्षविषये हि भयातिशयवर्णने नायकस्य नयपराक्रमादिसम्पत् सुतरामुद्योतिता भवति। एतच्च मदीयेऽर्जुनचरितेः अर्जुनस्य पातालावतरणप्रसङ्गे वैशद्येन प्रदर्शितम्। इत्थं महाकाव्येऽस्मिन् पराक्रमातिशयोऽर्जुनस्य वर्णितः।

देवीशतके यमक-श्लेष-चित्रबन्धादिगत-श्चमत्कारः सविशेषं वर्तते

देवीशतके यमक-श्लेष-चित्रबन्धादिगतश्चमत्कारः सविशेषं वर्तते। तत्त्वालोकश्च दर्शनग्रन्थोऽस्ति। अभिनवगुप्तो ध्वन्यालोकस्य लोचनटीकायामेषां ग्रन्थानामुल्लेखं करोति। अपि च ध्वन्यालोकस्य तृतीयोद्योतस्य अन्तिमे भागे विनिश्चयनामकस्य बौद्धग्रन्थस्य एका विवृत्तिरपि अनेन विलिखिता अस्तीत्युच्यते। अस्या विवृतेर्नाम धर्मोत्तमा भवतीति व्याख्याकारैः कथितमस्ति। एतदतिरिक्तमपि कवेरानन्दवर्धनस्य कृतित्वं सम्भवति। किन्तु तद्विषये किमपि साक्ष्यं नोपलभ्यते। एतासु कृतिषु ध्वन्यालोकः सर्वप्रधानो ग्रन्थोऽस्ति। ध्वनेरालोकोऽवलोकनं प्रतिपादनं वात्र सफलतया विहितम्।

### 1.2.3. तस्य दर्शनम्

ध्वनिरेव काव्यस्य आत्मा इति सः स्थापयति

काव्यस्यात्मा ध्वनिः इति ध्वनिसिद्धान्तमवतरति ध्वनिकारः आनन्दवर्धनाचार्यः। अलङ्कार-रीति-गुण-वृत्तीनां काव्यनिर्माणे प्राधान्यं सन्त्यपि ध्वनिरेव आत्मा इति सः स्थापयति।

ध्वन्यालोक-नामके ग्रन्थे एंव सर्वप्रथममाचार्य आनन्दवर्धनः ध्वनितत्त्वस्य काव्यात्मत्वं प्रतिपादयामास। आचार्य आनन्दवर्धनः प्राह - प्राचीनाः ये कवयः सन्ति तेषां काव्येषु ध्वनेः सद्भावः समुपलभ्यते, विपुलतया, अद्यापि तस्य ध्वनेः विवेचनं काव्यात्मरूपेण नहि कृतं केनापि। ध्वनिस्तु व्यङ्ग्यार्थस्वरूपो भवति। विना व्यङ्ग्यमर्थं काव्ये चारुत्वं नह्यायाति। ध्वनिना काव्येषु तथाविधश्चमत्कारः समुत्पद्यते येन सहृदयानां हृदयान्याप्यायितानि भवन्ति।

विना व्यङ्ग्यमर्थं काव्ये चारुत्वं नह्यायाति

अस्य ध्वनितत्त्वस्यैव काव्यात्मत्वं प्रतिपादनाय ध्वन्यालोक ग्रन्थस्य निबन्धनमकरोत्

अस्य ध्वनितत्त्वस्यैव काव्यात्मत्वं प्रतिपादनाय आनन्दवर्धनाचार्यः चतुर्षूद्योतेषु ध्वन्यालोकनामकस्यास्य ग्रन्थस्य निबन्धनमकरोत्। तत्र ध्वन्यालोकस्य प्रथमे उद्योते ध्वनिकारः प्रतिपादयामास यद्ध्वनिरेव काव्यस्यात्मा वर्तते। तत्र त्रिसंख्याकानां ध्वनिविरोधिनां मतान्यपि खण्डितवान् ध्वन्यालोककारः। तदनन्तरं स ध्वनेः स्वरूपं निरूपयित्वा तस्य वस्त्वलङ्कारसादिभेदेन त्रैविध्यं निरूपयामास। पुनः प्रतीयमानस्य रसस्यैव काव्यात्मत्वं प्रतिपादयामास। प्रथमे एवोद्योते अस्याप्यर्थस्य निरूपणमकार्षीद् यद् ध्वनेः कस्मिंश्चिदप्यलङ्कारेऽन्तर्भावो भवितुं नार्हति। तेन स्पष्टीकृतं यद् ध्वनिरेको महान् विषयो वर्तते। अत एव तस्य अवरकोटिकेषु अलङ्कारादिषु कुत्रापि नान्तर्भावो भवितुमर्हति। ध्वनेर्मूलस्य निरूपणं कुर्वता आनन्दवर्धनाचार्येण प्रतिपादितं यत् ध्वनेः सिद्धान्तस्य मूलं वैय्याकरणानां स्फोटसिद्धान्त एव वर्तते। प्रथमोद्योतस्यान्ते ध्वनिकारः प्रतिपादयामास यत् ध्वनेः लक्षणायां वा गौण्यां वापि नान्तर्भावो भवितुमर्हति।

ध्वनिः कस्मिंश्चिदप्यलङ्कारे अन्तर्भावं न गच्छति। सः स्वतन्त्र एव महान् विषयः

आनन्दवर्धनाचार्यः ध्वन्यालोकस्य माध्यमेन प्रतिपादयामास यत् ध्वनिरेव सर्वेषु काव्येषु जीवातुरूपेण विराजते। ध्वनिं विना काव्यं नीरसं चित्रमात्रमेव स्यात्। अत एव सर्वैः कवित्वकामिभिः ध्वनावेव सप्रयासः प्रयत्नः कर्तव्यः। इदमपि निश्चप्रचं विद्यते यत् आनन्दवर्धनाचार्यः स्वप्रयासेऽस्मिन् पूर्णरूपेण सफलोऽस्ति। इदमेव कारणं वर्तते यत् काव्यशास्त्रस्य क्षेत्रे ध्वनिसिद्धान्तस्यैव सर्वापेक्षया अधिकः प्रसारश्चाभूत्। साम्प्रतमपि अस्यैव सिद्धान्तस्य वर्चस्वं सर्वत्राऽवलोक्यते।

ध्वनिं विना काव्यं नीरसं चित्रमात्रमेव स्यात्

## Summarised Overview

'काव्यस्यात्मा ध्वनिः' इति आनन्दवर्धनः। रससिद्धान्तवत् न केवलं भारते किन्तु समस्तेऽस्मिन् प्रपञ्चे विख्यातं बभूव आनन्दवर्धनस्य ध्वनिसिद्धान्तः। आनन्दवर्धनः क्रिस्तुवर्षे नवमे शतके (८२० -

८९०)। अभिनवगुप्तः (९५० - १०१६) ध्वन्यालोकस्य व्याख्यानं रचितवान्। 'लोचनम्' इति नाम। पि.वि. काने महाशयः एवं सूचयति-यत् अलङ्कारशास्त्रे आनन्दवर्धनस्य ध्वन्यालोकः उन्नतं स्थानं वहति। व्याकरणशास्त्रे पाणिनेः अष्टाध्यायी इव वेदान्ते शङ्कराचार्यस्य वेदान्तभाष्यमिव प्राधान्यमर्हति ध्वन्यालोकः। अपि च डानियल् एच्.एच्. इन्गल्स् आनन्दवर्धनं संस्कृतनिरूपकेषु नितरां प्रशोभमानः सम्राट् इव गणयति। शास्त्रग्रन्थेषु ध्वन्यालोकः, विनिश्चयटीकाविवृतिः, तत्त्वालोकः इति त्रीन् ग्रन्थान् च व्यरचयत्। काव्यविभागे आनन्दवर्धनः त्रयः ग्रन्थाः विरचितवान्। ते विषमबाणलीला, अर्जुनदेवचरितं, देवीशतकं च इति। आनन्दवर्धनाचार्यः ध्वन्यालोकस्य माध्यमेन प्रतिपादयामास यत् ध्वनिरेव सर्वेषु काव्येषु जीवातुरूपेण विराजते। ध्वनिं विना काव्यं नीरसं चित्रमात्रमेव स्यात्। इदमेव कारणं वर्तते यत् काव्यशास्त्रस्य क्षेत्रे ध्वनिसिद्धान्तस्यैव सर्वापेक्षया अधिकः प्रसारश्चाभूत्।

## Assignments

**I. उत्तरं लिखत।**

1. आनन्दवर्धनः कस्य पुत्रः आसीत्?
2. आनन्दवर्धनस्य स्थितिकालः कः?
3. आनन्दवर्धनस्य प्रसिद्धतमः ग्रन्थः कः?
4. ध्वन्यालोकग्रन्थस्य रचयिता कः?
5. ध्वन्यालोकग्रन्थे मुख्यं किं प्रतिपादितम्?
6. आनन्दवर्धनस्य कति प्रमुखग्रन्थाः ?
7. देवीशतके कस्य काव्यलक्षणस्य चमत्कारः दृश्यते?
8. अर्जुनचरितं कस्य प्रकारस्य काव्यमस्ति?
9. आनन्दवर्धनस्य प्राकृतभाषायां रचितं काव्यं किम्?
10. धर्मोत्तमा नामकविवृत्तिः कस्य ग्रन्थस्य टीका अस्ति?
11. कः काव्यस्य आत्मा इति आनन्दवर्धनस्य मतम्?

**II. टिप्पणिं लिखत।**

1. ध्वन्यालोकस्य वैशिष्ट्यानि लिखत।

2. ध्वनिसिद्धान्तस्य स्वरूपं संक्षेपेण निरूप्यताम्।
3. आनन्दवर्धनः ध्वनिसम्प्रदायस्य प्रवर्तकः आसीत्। स्पष्टयत।
4. आनन्दवर्धनस्य कृतीः संक्षेपेण वर्णयत।
5. आनन्दवर्धनस्य तत्त्वालोकः ग्रन्थः कस्य विषयं सम्बद्ध्य लिखितः अस्ति?
6. आनन्दवर्धनस्य शास्त्रीयग्रन्थानां विषयं विस्तरेण वर्णयत।
7. ध्वनिसिद्धान्तस्य स्वरूपं संक्षेपेण निरूप्यताम्।

**III. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत।**

1. साहित्ये आनन्दवर्धनस्य योगदानं संक्षेपेण वर्णयत।
2. ध्वन्यालोके ध्वनिसिद्धान्तस्य प्रतिपादनं कथं कृतम् इति वर्णयत।

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015
2. E.V.Damodaran, Dhvanyaloka with Alacanam, National Book Stall, Kottayam, 1973
3. English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, Harvard University Press, Cambridge, London, 1990,
4. P.V.Kane, History of Sanskrit Poetics, Motilal Banarsidass, New Delhi, 1987
5. Ed. C.M.Neelakanthan, Dhvanyaloka, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. Dr. K Krishnamoorti, The Dhvanyaloka and Its Critics, Kavyalaya Publishers, Mysore, 1968.

# References

1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९० ।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. श्रीराजेन्द्रप्रसादः कोठ्यारी, ध्वन्यालोकप्रकाशिका, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# ध्वन्यालोकग्रन्थपरिचयः - चत्वारः उद्योताः - लोचनव्याख्या - अभिनवगुप्तः - अन्यानि व्याख्यानानि

## Learning Outcomes

- काव्यरूपेषु ध्वनिसिद्धान्तानां प्रयोगपरिज्ञानम्।
- ध्वनितत्वावबोधं लभते।
- ध्वनिसम्प्रदायस्य परिचयः।
- ध्वन्यालोकग्रन्थपरिचयः।
- ध्वन्यालोकव्याख्यानपरिचयः।

## Background

काव्यस्य अङ्गानि बहूनि सन्ति। रस, गुणालङ्कारादिकानि। एतेषां समेषां तत्त्वानां सर्वे आचार्याः निरुपणमकार्षुः। परञ्च सर्वापेक्षया प्रधानतया विचारणीयो विषय आसीत् काव्यस्यात्म-तत्त्वनिरूपणम्। अस्यैव काव्यात्मतत्त्वस्य निरूपणविषये काव्याशास्त्रप्रणेतृणामनेके सम्प्रदाया अभूवन्।

तत्र अलङ्कारसर्वस्वनामकस्य ग्रन्थस्य व्याख्याकारः षण्णां काव्यशास्त्रस्य सम्प्रदायानां समर्थनमकार्षीत्। ते च सम्प्रदायाः सन्ति, १. रससम्प्रदायः २. अलङ्कारसम्प्रदायः, ३.रीतिसम्प्रदायः, ४. वक्रोक्तिसम्प्रदायः, ५. ध्वनिसम्प्रदायः, ६. औचित्यसम्प्रदायश्च ॥ काव्यशास्त्रस्य पञ्चमस्य सम्प्रदायस्य नाम ध्वनिसम्प्रदायो वर्तते। अस्य सम्प्रदायस्य प्रवर्तकः आचार्य आनन्दवर्धनो विद्यते। सः ध्वनेरेव काव्यात्मत्वं प्राह । तेनाभिहितमपि स्वकीये ध्वन्यालोकनामके ग्रन्थे - काव्यस्यात्मा ध्वनिरिति। अस्मिन् ग्रन्थे *ध्वनिसिद्धान्तः* सम्यक्तया निरूपितः। अन्ये गुण-रीति-अलङ्कारादयः काव्यशोभायाः साधकाः भवन्ति, किन्तु काव्यस्य प्राणस्वरूपं केवलं ध्वनिः। ध्वनिः व्यङ्ग्यार्थस्वरूपः भवति। ध्वनिं विना काव्यं केवलं चित्रवद्भवेत्। ध्वनिना सह हृदयस्पर्शी चमत्कारः संभवति। अस्मिन् पाठभागे आनन्दवर्धनाचार्यस्य ध्वन्यालोकं ग्रन्थं अधिकृत्य वयं पठामः।

## Keywords

ध्वन्यालोके त्रयोंऽशाः, १२९ कारिकाः, चत्वारः उद्योताः, ध्वनेः द्वैविध्यं-विवक्षितान्यपरवाच्यध्वनिः-अविवक्षितवाच्यध्वनिः, लक्षणा मूलकस्य भेदद्वयं, अलङ्कारध्वनिः, काव्यशरीरं शब्दमेव, तिस्रः शब्दशक्तयः, सगुणीभूतव्यङ्ग्यस्य ध्वनेः प्रयोजनं, ध्वन्यालोकस्य व्याख्यानं, ध्वन्यालोकलोचनम्, अभिनवभारती, अन्यानि व्याख्यानानि।

## Discussion

### 1.3.1. ध्वन्यालोकग्रन्थपरिचयः

ध्वन्यालोके १२९ कारिकाः वृत्तयः, उदाहरणानि सन्ति

ध्वनिसिद्धान्तः आनन्दवर्धनाचार्येण प्रतिपादितः प्रमुखः साहित्यसिद्धान्तः अस्ति। तेन ध्वन्यालोकग्रन्थे स्पष्टतया उक्तं यत् ध्वनिः एव काव्यस्य आत्मा इति। ध्वन्यालोके त्रयोंऽशाः-कारिकाः, वृत्तयः, उदाहरणानि च। अस्मिन् ग्रन्थे १२९ (एकशत् एकोनत्रिंशत्) कारिकाः। तत्र हि चत्वार उद्योताः, प्रथमे हि उद्योते ध्वनिप्रतिष्ठापना, द्वितीये व्यङ्ग्यमुखेन ध्वनिस्वरूपविवेकः, तृतीये तु व्यञ्जकमुखेन तत्स्वरूपविवेकः, चतुर्थे तु ध्वनिव्युत्पादनप्रयोजनं चेति निरूपितविषयाः। अस्याचार्यस्य कवित्वशक्तिरपि विलक्षणा वर्तते। एतस्य महाकवेर्नाम काव्यशास्त्रेतिहासे सुवर्णाक्षरेणाङ्कितुं योग्यम्। रसगङ्गाधरकृता सत्यमेवेदं कथ्यते यदयमानन्दवर्धनः साहित्यशास्त्रस्य मार्गं परिष्कृतवानिति। तथाहि- 'ध्वनिकृतामालङ्कारिकसरणि-व्यवस्थापकत्वादिति'।

### 1.3.2. चत्वारः उद्योताः

ध्वन्यालोके चत्वारः उद्योताः (अध्यायाः) सन्ति

ध्वन्यालोके चत्वारः उद्योताः (अध्यायाः) सन्ति। प्रथमे उद्योते विष्णुस्तुतिरूपस्य मङ्गलाचरणस्य अनन्तरं ध्वनिसिद्धान्तमवतर्तुं काव्यस्यात्मा ध्वनिः इति सिद्धान्तमवतार्य ध्वनेरभाववादिनां भाक्तवादिनां अनिर्वचनीयवादिनां च मतान् निरस्य ध्वनिभेदान्

विस्तारयति। विवक्षितान्यपरवाच्यध्वनिः, अविवक्षितवाच्यध्वनिः इति ध्वनेः द्वैविध्यं समर्थयति। विवक्षितान्यपरवाच्यध्वनिः अभिधामूलकः। अविवक्षितवाच्यध्वनिः लक्षणामूलकः। द्वयोरपि पुनः द्वैविध्यम्। अभिधामूलकस्य संलक्ष्यक्रमव्यङ्ग्यध्वनिः, असंलक्ष्यक्रम-व्यङ्ग्यध्वनिः इति भेदद्वयम्। लक्षणामूलकस्य अर्थान्तरसंक्रमित-वाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः इति भेदद्वयम्।

**विवक्षितान्यपरवाच्यध्वनिः अभिधामूलकः इत्युक्तम्**

तद्यथा -




**द्वितीयोद्योते अविवक्षितवाच्य-ध्वनिं विशदयति**

द्वितीयोद्योते अविवक्षितवाच्यध्वनिं विशदयति। प्रथमं लक्षणा-मूलकस्य भेदद्वयं विशदयति । अनन्तरं विवक्षितान्यपरवाच्यध्वनेः द्वितीयभेदं विशदयति। शब्दशक्तिमूलकानुरणनध्वनेः श्लेषस्य च मिथः भेदः अस्ति। अर्थशक्त्युद्भवानुरणनध्वनिं सोदाहरणं विशदयति। असंलक्ष्यक्रमव्यङ्ग्यध्वनौ रसध्वनिरन्तर्भवति। यत्र रसः प्रबलतया व्यङ्ग्यार्थप्रतीतिं जनयति तत्र रसध्वनिः।

**अभिधा, लक्षणा, व्यञ्जना च शब्दशक्तयः त्रयः**

अर्थशक्त्युद्भवे अलङ्कारध्वनिः। उपमा - आक्षेप - उत्प्रेक्षादिषु ध्वनिं निरूप्य अलङ्कारध्वनिं स्थापयति। शब्दादेव ज्ञानार्जनम्। शब्द-अर्थ-ज्ञानानि भिन्नानि सत्यपि मिथः तादात्म्यं वर्तते। काव्यशरीरं शब्दमेव। उद्दिष्टार्थबोधने शब्दस्य या शक्तिः सा शब्दशक्तिः। तिस्रः शब्दशक्तयः। अभिधा-लक्षणा-व्यञ्जना चेति। सङ्केतितार्थबोधनम् अभिधा। सङ्केतितार्थगोचरो शब्दव्यापारो अभिधा। वाच्यार्थानुपपत्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा। अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थम् अर्थान्तरविषयः शब्दव्यापारो व्यञ्जनावृत्तिः। वाच्य-लक्ष्य-व्यङ्ग्यत्वेन अर्थजातमपि त्रिविधम्। व्यङ्ग्यप्रधानो ध्वनिः।

**सङ्केतितार्थबोधनम् अभिधा**

तृतीये उद्योते अविवक्षितवाच्यस्य सोदोहरणं पदप्रकाशत्वादीन् निरूपयति। यथा भगवद्गीतायाम् –

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।**

(हे अर्जुन! सर्वभूतानां या रात्रिः व्यामोहजनकत्वात् सर्वपदार्थानाम् अविवेककरी तस्यां जितेन्द्रियः योगी प्रबुद्धः जागर्ति। सा परमार्थतत्त्वजानतः मुनेः निशा)

अत्र निशार्थो न जागरणार्थः विवक्षितः किन्तु तत्त्वज्ञानसम्पादने अवधानवत्त्वम्।

अर्थशक्तिमूले ध्वनौ पदप्रकाशताम् एवं सूचयति –

**वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च**
**यावल्लुलितालकमुखो गृहे परिष्वङ्क्ते स्नुषा।**

हे वाणिजक, यावत् अस्माकं गृहे लुलितालकमुखा पुत्रवधूः सविलासं भ्रमति तावत् पुत्रेण नीयमानः हस्तिदन्ताः व्याघ्रकृत्तयश्च कुतः स्युः?

ध्वनेः विविधान् भेदान् विशदय्य चित्रकाव्यानां प्रसक्तिं संसूच्य ध्वनिकृदुक्तस्यैव ध्वनिलक्षणस्य साधुतां समर्थयति।

चतुर्थे उद्योते सगुणीभूतव्यङ्ग्यस्य ध्वनेः प्रयोजनं विशदीकरोति

ध्वन्यालोकस्य चतुर्थे उद्योते सगुणीभूतव्यङ्ग्यस्य ध्वनेः प्रयोजनं विशदीकरोति। सूचयति च 'अनेनानन्त्यमायाति कवीनां प्रतिभागुणाः' इति। पुनः रामायणे करुणरसस्य, महाभारते शान्तिरसस्य च मुख्यत्वं प्रतिपादयति। सुकविवाण्याः माहात्म्य-वर्णनावसरे 'सुकविरुपनिबन्धान्निन्द्यतां नोपयाति' इति। अपि च सत्काव्यस्य यत् प्रतीयमानार्थस्वरूपं परिपक्वबुद्धीनां हृदयेषु चिरं प्रसुप्तमस्तु इत्युक्त्वा ध्वन्यालोकं समाप्यते।

### 1.3.3. लोचनव्याख्या -

'काव्यस्यात्मा ध्वनिः' इति आनन्दवर्धनः। रससिद्धान्तवत् न केवलं भारते किन्तु समस्तेऽस्मिन् प्रपञ्चे विख्यातं बभूव

'लोचन' नामकं व्याख्यानं अभिनवगुप्तः कृतवान्

आनन्दवर्धनस्य ध्वनिसिद्धान्तः। अभिनवगुप्तः (९५० - १०१६) ध्वन्यालोकस्य व्याख्यानं रचितवान्। 'लोचनम्' इति नाम।

अस्य ध्वन्यालोकस्य लोचनाभिधाना व्याख्या तु ध्वनिसिद्धान्तं स्वेतरसमस्तसिद्धान्तेभ्यः औत्कृष्ट्यप्रतिपादने पूर्णरूपेण सहायिकाऽभूत्। अनया व्याख्यया एव अभिनवगुप्तपादाचार्यः काव्यशास्त्रस्य क्षेत्रे प्रख्याततमोऽभवत्।

पि.वि. काने महाशयः एवं सूचयति यत् अलङ्कारशास्त्रे आनन्दवर्धनस्य ध्वन्यालोकः उन्नतं स्थानं वहति। व्याकरणशास्त्रे पाणिनेः अष्टाध्यायी इव वेदान्ते शङ्कराचार्यस्य वेदान्तभाष्यमिव प्राधान्यमर्हति ध्वन्यालोकः। अपि च डानियल् एच्.एच्. इग्नल्स् आनन्दवर्धनं संस्कृतनिरूपकेषु नितरां प्रशोभमानः सम्राट् इव गणयति।

### 1.3.4. अभिनवगुप्तः -

अभिव्यक्तिवादस्य प्रवर्तकः आचार्यः अभिनवगुप्तः अस्ति

भरतमुनेः रसनिष्पत्तिसूत्रव्याख्यानेषु प्रसिद्धतमस्य अभिव्यक्तिवादस्य प्रवर्तयिताऽस्ति आचार्यप्रवरोऽभिनवगुप्तपादः। अस्य जीवनवृत्तविषये नास्ति गुप्तम्। प्रायः स्वकृतीनामन्ते स्वयमुल्लिखति तत्कृतिकालम्।

अभिनवगुप्तस्य पिता महान् पण्डितः परमशैवश्चासीत्। तस्य माताऽपि तथैव धर्मपरायणा चारुशीला चासीत्। अभिनवगुप्तस्तयोरेकमात्रपुत्रो 'योगिनीभूरासीत्। "योगिनीभूः' पुत्रस्य यल्लक्षणं तन्त्रालोकटीकायां वर्णितमस्ति तत्सम्पूर्णतया अभिनवगुप्ते घटते।

आनन्दवर्धनोऽपि तस्य गुरुरासीदिति केषाञ्चिन्मतम्। रसनिष्पत्तितत्त्वालोककारेण द्वौ आनन्दवर्धनौ ध्वन्यालोककर्तृत्वेनाङ्गीकृतौ। तयोरेकः कारिकाकारोऽन्यस्तु वृत्तिकारः। तत्र द्वितीयो हि आनन्दवर्धनः वृत्तिकृत्त्वेनाभ्यूहितः आचार्येण स एवाभिनवगुप्तस्य गुरुः स्यादिति तेषां सम्भावना। अभिनवगुप्तः आनन्दवर्धनस्य साक्षाच्छिष्यो

भवतु वा न वा किन्तु अवश्यमेव तेन ध्वन्यालोकस्य अध्ययनं गुरुपरम्परया कृतमिति ज्ञायते, लोचने वारं वारं गुरुपदव्यपदेशदर्शनात्।

अभिनवगुप्तस्य प्रमुखौ द्वौ साहित्यशास्त्रीयग्रन्थौ

अभिनवगुप्तप्रणीताः एकचत्वारिंशद् ग्रन्थाः सन्ति ख्यातिं गताः यद्यपि न सन्ति सर्वे प्रकाशिताः। एतेषु 'ध्वन्यालोकलोचनम्' 'अभिनवभारती' च साहित्यशास्त्रस्य ग्रन्थरत्ने। ध्वन्यालोकलोचनम् आनन्दवर्धनेन प्रणीतस्य ध्वन्यालोकस्य टीकारूपेण कृतो ग्रन्थः, मूलादप्यतिशायी वर्तते। अभिनवभारत्यां 'तच्च मदीयादेव तद्विवरणात् सहृदयालोकलोचनादवधारणीयम्', इति ध्वन्यालोकलोचनस्योल्लेखवात् तस्य पूर्वनिर्मितिः सुतरां प्रकाशिता। अत्र हि ग्रन्थे सर्वानपि ध्वनिविरोधिनस्तर्कान् समालोच्य प्रतीयमानार्थस्य संसिद्धये व्यञ्जनाव्यापारस्यावश्यकता बहुविधैः प्रमाणैः प्रमाणिताऽस्ति।

अभिनवभारती भरतमुनिप्रणीता नाट्यशास्त्रस्यैकमात्र-समुपलुब्धा टीकाऽस्ति

अभिनवभारती भरतमुनिप्रणीता नाट्यशास्त्रस्यैकमात्रसमुपलुब्धा टीकाऽस्ति। यद्यपि अद्यावधि तस्याः अविकलः पाठो नोपलब्धः। नाट्यशास्त्रस्यानुशीलने नितान्तमुपयोगिनी कृतिरियमाचार्यस्य।

साहित्यशास्त्रे अभिनवगुप्तस्य स्थानं व्याकरणशास्त्रे पतञ्जलिरेव वर्तते। वस्तुतः सत्यमिदं तथ्यं यद् अभिनवगुप्तं विना न सम्भवति साहित्यशास्त्र-प्रतिपत्तिः पारमार्थिकी।

### 1.3.5. अन्यानि व्याख्यानानि

ध्वन्यालोकस्य द्वे व्याख्ये चन्द्रिका, लोचनम् च

ध्वन्यालोकस्य व्याख्याः अभिनवगुप्ताश्च। ध्वन्यालोकस्यास्य द्वे व्याख्ये- चन्द्रिका, लोचनश्चेति। तत्राद्याऽनुपलम्भदोषदूषिता। लोचनं च अस्माकं सौभाग्यवशात् उपलभ्यते। अस्य च निर्मातारः श्रीमद् आचार्याभिनवगुप्तपादाः। चन्द्रिकाम् अवलोक्यैवेमे लोचनमरचयन्निति प्रतीयते। तत्र तत्र लोचने 'इत्यलमस्मत्पूर्ववंशीयैस्सह विवादेन' इति निर्दिशन्तः 'पूर्ववंशीयै'रिति पदेन चन्द्रिकाकारमेव अभिप्रयन्ति इत्यनुमीयते। एतेषां पाण्डित्यमधिकृत्य विवेचने न अस्माकमधिकारः।

## Summarised Overview

आनन्दवर्धनाचार्येण विरचितः ध्वन्यालोकः नामको ग्रन्थः काव्यशास्त्रक्षेत्रे एकः अतीव महत्वपूर्णः ग्रन्थः अस्ति। अस्मिन् ग्रन्थे १२९ कारिकाः, वृत्तयः, उदाहरणानि च अन्तर्भवन्ति। ग्रन्थः चतुर्षु उद्योतेषु (अध्यायेषु)विभक्तः अस्ति। ध्वनिः काव्यस्य आत्मा इति प्रतिपाद्य ध्वनिविरोधिनां मतानि निरस्यन्ते। ध्वनिभेदः विवक्षितान्यपरवाच्यः, अविवक्षितवाच्यः इति द्विधा प्रतिपाद्यते। ध्वन्यालोके आनन्दवर्धनाचार्येण ध्वनिसिद्धान्तः पूर्णरूपेण विवेचितः अस्ति। अस्य ग्रन्थस्य महत्त्वं काव्यशास्त्रे अतीव प्रधानं वर्तते। 'लोचनं' नामकं व्याख्यानग्रन्थं अभिनवगुप्तः विरचितवान्। एषः ग्रन्थः आनन्दवर्धनाचार्यस्य ध्वन्यालोकस्य विस्तृतव्याख्यानरूपेण प्रसिद्धः अस्ति। एषा व्याख्या ध्वनिसिद्धान्तस्य औत्कृष्ट्यं प्रतिपादयति। ध्वनिरेव काव्यस्य आत्मा इति विचारस्य गम्भीरं विवेचनम् अत्र लभ्यते। लोचनग्रन्थः न केवलं ध्वन्यालोकस्य व्याख्यानरूपेण प्रख्यातः, अपि तु काव्यशास्त्रस्य प्रचारप्रसारे अतीव प्रभावशाली ग्रन्थः भवति। यः मूलग्रन्थात् अपि उत्कृष्टः मन्यते। अभिनवगुप्तः भारतीयसाहित्यशास्त्रस्य एकः महान् आचार्यः आसीत्। सः अभिव्यक्तिवादस्य प्रवर्तकः मन्यते। व्याकरणशास्त्रे पतञ्जलेः सदृशं स्थानं साहित्यशास्त्रे अभिनवगुप्तस्य अस्ति। ध्वन्यालोकस्य द्वे व्याख्ये चन्द्रिका लोचनम् च। लोचनस्य रचयिता आचार्याभिनवगुप्तः अस्ति। चन्द्रिकामवलोक्य एव लोचनं विरचितम् इति प्रतिपाद्यते।

## Assignments

**I.उत्तरं लिखत**

1. ध्वन्यालोके कति कारिकाः सन्ति?
2. ध्वन्यालोकग्रन्थे कति उद्योताः सन्ति?
3. ध्वन्यालोकग्रन्थे त्रयः अंशाः सन्ति। ते के?
4. ध्वन्यालोके प्रथम उद्योते कः सिद्धान्तः प्रतिपादितः?
5. विवक्षितान्यपरवाच्यध्वनिः कस्य मूलकः अस्ति?
6. लक्षणामूलकस्य ध्वनेः द्वौ भेदौ कौ?
7. ध्वन्यालोकस्य 'लोचन' नामकं व्याख्यानं कः कृतवान्?

8. डानियल् एच्.एच्. इन्गल्स् आनन्दवर्धनं कस्य रूपेण वर्णयति?

9. पि. वि. काने महाशयः 'ध्वन्यालोकं' कथम् उपमीयते?

10. ध्वन्यालोकस्य द्वे व्याख्ये के ?

11. लोचनस्य रचयिता कः?

12. अभिनवगुप्तस्य प्रमुखौ द्वौ साहित्यशास्त्रीयग्रन्थौ कौ ?

13. साहित्यशास्त्रे अभिनवगुप्तस्य स्थानं किम्?

14. चन्द्रिकाव्याख्यायाः दोषः कः निर्दिष्टः अस्ति?

15. लोचनं कस्मात् कारणात् विरचितम् इति प्रतिपद्यते?

**II. टिप्पणिं लिखत**

1. ध्वन्यालोकस्य रचना, विषयविन्यासः च संक्षेपेण निरूप्यताम्।
2. 'लोचनं' नामकस्य ग्रन्थस्य रचयिता कः? तस्य महत्त्वं च संक्षेपेण लिखत।
3. ध्वन्यालोकस्य व्याख्यानयोः नामानि एवं तयोः विषये संक्षेपेण विवरणं च लिखत।

**III. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत।**

1. ध्वन्यालोके चतुर्णां उद्योतानां विषयमधिकृत्य संक्षेपेण वर्णनं कुरुत।
2. साहित्ये आनन्दवर्धनस्य ध्वनिसिद्धान्तस्य महत्वं विवृणुत।
3. अभिनवगुप्तस्य साहित्यशास्त्रे योगदानं विशदयत।

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015
2. E.V.Damodaran, Dhvanyaloka with Alacanam, National Book Stall, Kottayam, 1973
3. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, Harvard University Press, Cambridge, London, 1990,
4. P.V.Kane, History of Sanskrit Poetics, Motilal Banarsidass, New Delhi, 1987

5. Ed.C.M.Neelakanthan, Dhvanyaloka, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. Dr. K Krishnamoorti, The Dhvanyaloka and Its Critics, Kavyalaya Publishers, Mysore, 1968.

## References

1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९० ।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. ध्वन्यालोकप्रकाशिका, श्राराजेन्द्रप्रसादः कोठ्यारी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# कुन्तकाचार्यपरिचयः- वक्रोक्तिजीवितम्-ग्रन्थविभागः- वक्रोक्तिजीविते प्रस्तुताः विषयाः

## Learning Outcomes

- वक्रोक्तितत्त्वावबोधनम्।
- आचार्यकुन्तकस्य परिचयं लभते।
- वक्रोक्तिजीविते वर्णितानां विषयाणां संक्षेपणम्।
- वक्रोक्तिं परिचाययति।

## Background

वक्रोक्तिप्रस्थानस्य प्रवर्तको राजानककुन्तको वर्तते। एवं कुन्तकोऽलङ्कारशास्त्रे वक्रोक्तिप्रस्थानस्य प्रवर्तको विद्यते। अतोऽस्यापि महत्त्वपूर्णं स्थानं वर्तते। यद्यपि प्रसिद्धकथनरीतितो भिन्ना चमत्कारिणी योक्तिः सा वक्रोक्तिः काव्यस्य प्राणरूपेण स्वीकृता तथापि तस्याः काव्यप्राणत्वं पश्चात्तनैः खण्डितं, यतो हि उक्तेः सम्बन्धौ शब्दार्थाभ्यां भवति, वक्रोक्तिः शब्दार्थधर्मो वर्तते, शब्दार्थौ काव्यस्य शरीरवत् मन्यते, शरीरधर्मोऽलङ्कार एव भवितुमर्हति, न तु आत्मा। एवं यद्यपि वक्रोक्तेः काव्यात्मता खण्डिता तथापि वक्रोक्तेः काव्ये महत्त्वं कथमपि न हीयते। साहित्यस्य लक्षणं कुन्तकेन यादृशं कृतं तादृशमन्येन केनचिदपि आचार्येण न कृतम्। एतत् कुन्तकस्य महदवदानम्। तन्मते शब्दार्थयोः अन्यूनानतिरिक्तचमत्कारित्वं साहित्यमुक्तम्। कुन्तकः वक्रोक्तिप्रस्थानस्य प्रवर्तकत्वेन चिरस्मरणीयो वर्तते। अनेन रचितस्य वक्रोक्तिजीवितस्य अलङ्कारशास्त्रेषु विशिष्टं स्थानं वर्तते। अस्मिन् पाठभागे कुन्तकाचार्यः वक्रोक्तिजीविते प्रतिपादितान् विषयान् च अधिकृत्य वयं पठामः।

# Keywords

'वक्रोक्तिकारः', वक्रोक्तिः काव्यजीवितम्, काव्यलक्षणम्, वक्रतायुक्तं रचनावैचित्र्यचमत्कारकारि काव्यम्, चतुर्भिरुन्मेषैः, वर्णविन्यासवक्रतायाः सामान्यं स्वरूपं, वर्णविन्यवक्रता त्रिधा, ग्रन्थः त्रिधा विभक्तः।

# Discussion

## 1.4.1. कुन्तकाचार्यपरिचयः

कुन्तकस्य नामान्तरं "वक्रोक्तिकारः" इति प्रसिद्धम्

साहित्यशास्त्रपरम्परायामाचार्यकुन्तकस्यातिविशिष्टं स्थानं वर्तते। यथा ध्वनिसम्प्रदायप्रवर्तकस्य आनन्दवर्धनस्य 'ध्वनिकार' इति नामान्तरं तथैवास्यापि 'वक्रोक्तिकार' इति। वक्रोक्तिसिद्धान्तस्यायं प्रवर्तयिता। वक्रोक्तिः काव्यजीवितमिति तस्य प्रमुखः सिद्धन्तः। काव्यस्य सारभूततया वक्रोक्तिं प्रतिपाद्य 'काव्यस्यात्मा' ध्वनिरिति सिद्धान्तो ध्वनिवादिनां प्रत्याख्यातोऽनेन। तस्मादयमपि ध्वनिर्विरोधि-ष्वाचार्येषु परिगण्यते। यद्यपि नानेन तथा ध्वनिर्विध्वंसितो यथा महिमभट्टादिना तथापि वक्रोक्तेः काव्यात्मत्वेन प्रतिपादनात् स्वयमेव ध्वनिविरोधः समुपस्थितः।

कुन्तकस्य काव्यलक्षणम्

कुन्तकः क्रिस्त्वब्धे दशमे शतके लब्धजन्माऽभूत्। वक्रोक्तिः काव्यजीवितमिति कुन्तकमतम्। कुन्तकस्तु काव्यलक्षणमेवं सूचयति–

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥**

राजानकः कुन्तकः क्रिस्तुवर्षे ९५०-१०५० वर्षयोः मध्ये कालमनैषीत्। सोऽयम् आनन्दवर्धनस्य अभिनवगुप्तस्य च जीवितकालमध्ये एवेति गणयन्ति चरित्रकाराः। सोऽयं धनञ्जयस्य राजशेखरस्य च समकालिकः।

### 1.4.2. वक्रोक्तिजीवितम्-

वक्रोक्तिजीविते चत्वारः उन्मेषाः सन्ति

वक्रता काव्ये अवश्यं वर्तितव्यमिति। वक्रतायुक्तं रचनावैचित्र्यचमत्कारकारि काव्यम्। सः चतुर्भिरुन्मेषैः (अध्यायः) स्वमतं स्थापयति। प्रथमे उन्मेषे काव्यसामान्यलक्षणं, काव्यविशेषलक्षणं, वक्रोक्तेः अलङ्कारत्वसाधनम्, वर्णविन्यास-वक्रताम्, पदपूर्वार्धवक्रताम्, वाक्यवक्रताम्, पदपरार्धवक्रताम्, प्रकरणवक्रताम्, प्रबन्धवक्रताञ्च नाम्ना सूचयन् सामान्यस्वभावं विशदयति।

वर्णविन्यासवक्रतायाः उदाहरणम्

**प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-**
**स्तदनु विरहोत्ताम्यत्तन्वीकपोलद्युतिः।**
**प्रसरति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे**
**सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः।। इति।**

वर्णविन्यासवक्रतायाः उदाहरणं प्रदर्शयति। केचन इदमनुप्रासस्य उदाहरणत्वेन परिगण्यन्ते। वाक्यवक्रतां प्रदर्शयति।

**वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा**
**यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति।**

वाक्यस्य वक्रभावः अन्यः। श्लोकादेर्वक्रभावो भङ्गीभणितवैचित्र्यं अन्यः।

प्रबन्धवक्रता

प्रबन्धे नाटकादौ वा सहजाहार्यसौकुमार्यमनोहरा वक्रता एव प्रबन्धवक्रता। यथा - रामायणे मारीचमायामृगमनुसारिणः रामस्य करुणाक्रन्दनमिति विचार्य सीतायाः श्रीरामरक्षणाय लक्ष्मणं प्रति प्रेक्षणम्।

### 1.4.3. ग्रन्थविभागः

कुन्तकस्यैक एव ग्रन्थोऽस्ति वक्रोक्तिजीवितम् परञ्चानेनैव ग्रन्थेन कुन्तकः काव्यशास्त्रस्येतिहासेऽमरोऽभूत्। कुन्तकेन कृतं वक्रोक्तिजीवितम् चर्तुषून्मेषेषु विभक्तमस्ति।

वर्णविन्यासवक्रता त्रिविधा- एकाक्षरविन्यासः, द्वयाक्षरविन्यासः, बहुवर्णविन्यासश्च

प्रथमे उन्मेषे वर्णविन्यासवक्रतायाः सामान्यं स्वरूपं विशदीकुर्वन् कुन्तकः, द्वितीये उन्मेषे वर्णविन्यासवक्रतायाः त्रैविध्यम् आरचितवान्। अपि च पदपूर्वार्धवक्रतां पदपरार्धवक्रतां उपसर्ग-निपातजनितवक्रतां च विशदयति। वर्णविन्यवक्रता त्रिधा।

**एको द्वौ बहवो वर्णा बन्धमानाः पुनः पुनः।**
**स्वल्पान्तरास्त्रिधा सोक्ता वर्णविन्यासवक्रता॥**

वर्णशब्दः व्यञ्जनपर्यायः। एकः द्वौ बहवः वा वर्णाः पुनः पुनः बन्ध्यमानः इति भेदात्।

एकाक्षरवर्णविन्यासस्य उदाहरणं यथा –

'कदलीस्तम्बताम्बूलजम्बूजम्भीराः' इति।

द्वितीयप्रकारस्योदाहरणं यथा- प्रथममरुणच्छायः इत्यस्य द्वितीयं चतुर्थं च पादः।

चतुर्थ पादं यथा - सरसबिसिनीकन्दच्छेदच्छविर्मृगलाच्छनः।

तृतीयस्योदाहरणं यथा – सौन्दर्यधुर्यं स्मितम् इत्यत्र।

तृतीयोन्मेषे वस्तुवक्रताम् उपवर्ण्य स्वभावोक्ति- रसवद्- समासोक्ति-यथासंख्य-हेतु-उपमा-रूपकादीनां विवरणं दत्तमस्ति।

कुन्तकः वक्रतां षड्विधां शास्त्रीयदृष्ट्या निरूपयति

चतुर्थोन्मेषे प्रकरणवक्रतां प्रबन्धवक्रतां च विशदयति। भाषायाः षड्विधभेदेषु वर्तमानां वक्रतां कुन्तकः शास्त्रीयरीत्या विशकलनं करोति।

स्वरसम्बन्धः (phonetic) - वर्णविन्यासवक्रता।

शब्दकोशसम्बन्धः - पदपूर्वार्धवक्रता।

व्याकरणसम्बन्धः - पदपरार्धवक्रता।

रससम्बन्धः - वाक्यवक्रता।

ग्रन्थसम्बन्धः (काव्यसम्बन्धः) -प्रकरणवक्रता

रचनासम्बन्धः - प्रबन्धवक्रता।

भाषायाः आधुनिकविकासपरिणामादीन् ज्ञात्वैव राजानकः कुन्तकः स्वालङ्कारसिद्धान्तं सहृदयपुरस्सरं समर्पितवान्।

### 1.4.4. वक्रोक्तिजीविते प्रस्तुताः विषयाः

केचिद् वदन्ति यद् वक्रोक्तिजीवितम् अपूर्णमस्ति। किन्तु तथा कथनं समीचीनं न प्रतिभाति, यतो हि अत्र सर्वेऽपि विषयाः पूर्णतया निरूपिताः सन्ति। अन्त्यस्यैकस्यैव पद्यस्य अपूर्णतया वक्रोक्तिजीवितस्य अपूर्णता स्वीकर्तुं न शक्यते।

वक्रोक्तिजीवितस्य कारिकाभागस्य नाम "काव्यालङ्कारः" इति

वक्रोक्तिजीवितं प्रकारान्तरेण त्रिधा विभक्तुं शक्यते कारिका, वृत्तिः उदाहरणं च। महामहोपाध्यायः पाण्डुरङ्गवामनो वदति यत् वक्रोक्तिजीवितस्य कारिकाभागस्य नाम काव्यालङ्कारो वर्तते, किन्तु पश्चात्तनैर्विद्वद्भिः वृत्त्युदाहरणाभ्यां सहिता कारिका अर्थात् सम्पूर्णो ग्रन्थो वक्रोक्तिजीवितमिति नाम्ना व्यवहृतः। कारिकाभागस्य काव्यालङ्कार इति नाम्नि 'काव्यस्यायमलङ्कारः' इति, 'ग्रन्थस्यास्यालङ्कार इत्यभिधानम्' इति च कुन्तकवचनं प्रमाणम्। किन्तु अन्ये विद्वांसः कथयन्ति यत् समग्रस्य ग्रन्थस्य वक्रोक्तिजीवितमेव नाम वर्तते। उक्तस्य कुन्तकवचनस्य अभिप्रायो वर्तते यत् उपमाद्यलङ्कारनिरूपणात् सर्वे काव्यशास्त्रग्रन्था अलङ्कारग्रन्था उच्यन्ते। यथा भामहस्य काव्यालङ्कारः प्रसिद्ध एव। अत्रेदमेव ज्ञातव्यं यत् कुन्तकप्रणीतस्य ग्रन्थस्य सर्वप्रसिद्धं नाम वक्रोक्तिजीवितमेव वर्तते।

## Summarised Overview

आचार्यकुन्तकः संस्कृतसाहित्ये वक्रोक्तिवादस्य प्रवर्तकः महान् आचार्यः आसीत्। तेन वक्रोक्तिः काव्यस्य आत्मा इति प्रमुखः सिद्धान्तः वक्रोक्तिजीविते ग्रन्थे प्रतिपादितः। अस्य ग्रन्थस्य चत्वारः उन्मेषाः सन्ति। प्रथमे उन्मेषे, वक्रोक्तेः सामान्यस्वरूपं तथा वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, पदपरार्धवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता इत्यादयः भेदाः निरूपिताः। द्वितीये उन्मेषे, वर्णविन्यासवक्रतायाः त्रैविध्यं (एकाक्षर- द्व्यक्षर- बहुवर्ण) विशदं कृतम्। तृतीये उन्मेषे, वस्तुवक्रता तथा स्वभावोक्ति- उपमा- रूपक- रसवदादीनां विवरणं कृतम्। चतुर्थे उन्मेषे, प्रकरणवक्रता तथा प्रबन्धवक्रता च निरूपिते।

प्रत्युन्मेषं समाप्तौ "इति श्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालङ्कारे..." इति वाक्येन समाप्तिर्भवति। अत्र कतिपये विद्वांसः अन्तिमपदस्य अपूर्णत्वात् ग्रन्थं अपूर्णं इति मन्यन्ते, किन्तु वस्तुतः सर्वे विषयाः पूर्णरूपेण विवृता एव सन्ति, अतः ग्रन्थस्य सम्पूर्णता स्वीकर्तव्या। एष ग्रन्थः त्रिधा विभक्तः – कारिका, वृत्तिः, उदाहरणं च। महामहोपाध्यायः पाण्डुरङ्गवामनमतम् यत् कारिकामात्रं काव्यालङ्कारः नाम्ना ख्यातम्, किन्तु वृत्त्युदाहरणयोः सहितं सम्पूर्णं रूपं वक्रोक्तिजीवितम् इत्येव प्रसिद्धम्। अन्ये विद्वांसः अपि एतत् नामैव सम्यक् इति स्वीकुर्वन्ति। अतः अयं ग्रन्थः काव्यशास्त्रेतिहासे अत्यन्तं महत्वपूर्णं स्थानं धारयति।

## Assignments

**I.उत्तरं लिखत।**

1. कुन्तकस्य साहित्यशास्त्रे कः विशेषः अस्ति?
2. कुन्तकस्य नामान्तरं किम्?
3. कुन्तकस्य काव्यलक्षणं किम्?
4. कुन्तकः केषां समकालीनः आसीत्?
5. वक्रोक्तिजीवितग्रन्थस्य कर्ता कः?
6. वक्रोक्तिः कस्य आत्मा इति कुन्तकमतम्?
7. वक्रोक्तिजीविते कति उन्मेषाः सन्ति?
8. वर्णविन्यासवक्रतायाः उदाहरणं किम्?
9. प्रबन्धवक्रता का?
10. वर्णविन्यासवक्रता कति प्रकाराः?
11. कुन्तकः किं शास्त्रीयदृष्ट्या वक्रतायाः भेदान् निरूपयति?
12. कुन्तकविरचितः ग्रन्थः कथं विभक्तः वर्तते?
13. वक्रोक्तिजीवितस्य कारिकाभागस्य नाम किम्?

**II. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत।**

1. काव्यशास्त्रस्य क्षेत्रे आचार्यकुन्तकस्य योगदानं संक्षेपेण वर्णयत।
2. आचार्यकुन्तकस्य वक्रोक्तिवादः तथा वक्रोक्तिजीविते वर्णिताः वक्रताभेदाः संक्षेपेण वर्णयत।
3. वक्रोक्तिजीविते वर्णितं वक्रतासिद्धान्तं संक्षेपेण वर्णयत।
4. वक्रोक्तिजीवितस्य नाम, स्वरूपं, पूर्णता च संक्षेपेण प्रतिपाद।

## Suggested Readings


1. P.V.Kane, History of Sanskrit Poetics, Motilal Banarsidass, New Delhi, 1987
2. लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अक्कादमी, वारणासि, 2016


## References


1. राजानकः कुन्तकः, वक्रोक्तिजीवतम् , व्यारव्या निरुपणं च सुशील् कुमार्, कल्कत्ता ओरियन्टल् सीरीस्, कल्कत्ता, १९२९
2. K.Krishnamurthy(ed), Vakroktijivitam of Kuntaka, Karnataka University, Dharwad, 1977
3. Chattanatt Achutanunni, Vakroktijivitam Mal Trans, Vallathol Vidyapeetham Edappal, 2009


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

# ध्वन्यालोकप्रथमोद्योतः

## BLOCK - 2

SGOU

UNIT 1

# ध्वन्यभावनिरूपणपर्यन्तम्-आदितः अभाववादीनां निरूपणपर्यन्तम्

## Learning Outcomes

- मङ्गलश्लोके त्रिविधध्वनिनिरूपणं ज्ञायते।
- आनन्दवर्धनस्य ध्वनिवादं ज्ञायते।
- "काव्यस्यात्मा ध्वनिः" इत्यस्य औचित्यं लभते।
- ध्वनिस्वरूपं जानाति।

## Background

ध्वन्यालोकः कारिका-वृत्ति-उदाहरणेति भागत्रयेण रचितः। उदाहरणानि बहुशः पूर्वकाव्येभ्यः स्वीकृतानि, क्वचित् स्वीयानि च। कारिका -वृत्त्योः कर्ता आनन्दवर्धनः एव इति कश्चन अभिप्रायः। तत्र केचन विद्वांसः कारिका-वृत्तिभागयोः कर्तृकार्ये भिन्नत्वमामनन्ति। तेषु जैकोबीवुहलर कीथ्-डे काणे-आदयः प्रधानाः सन्ति। तत्र वृत्तिकारं तु सर्वे एव आनन्दवर्धनमत्र स्वीकुर्वन्ति, कारिकाकारं तद्भिन्नं कञ्चन सहृदयनामानं स्वीकुर्वन्ति। इतरे डा० सङ्करन-प्रभृतयः कारिकावृत्तिभागयोः उभयोरेव रचयितारम् आनन्दवर्धनमेव स्वीकुर्वन्ति।

ध्वन्यालोके तु क्वचिदपि कारिकावृत्तिकारयोर्भेदस्थापकं सङ्केतं न मिलति। परन्तु तट्टीकाकारैरभिनवगुप्तपादैः स्वध्वन्यालोकलोचने क्वचित् कारिकाकारः मूलग्रन्थकृदिति वृत्तिकारश्च ग्रन्थकृदिति संज्ञाभेदेन स्मृतः तदेवात्र मतभेदमूलम्। तथा चाभिनवगुप्तपादैः क्वचित् ध्वन्यालोकः सहृदयालोक इति नाम्ना लिखितः। तेन कारिकाकारः सहृदयः वृत्तिकारश्चानन्दवर्धन इति अनुमितः।

अस्मिन् पाठ्यांशे प्रथमोद्योतगतविषयान् वयं पठामः।

## Keyword

मङ्गलाचरणम्, त्रिविधं ध्वनिं, ध्वन्यभाववादिनः, “काव्यस्यात्मा ध्वनिः”, "तेन ब्रूमः सहृदयमनः-प्रीतये तत्स्वरूपम्", ध्वनिस्वरूपविषये प्रमुखविप्रतिपत्तिकारणानि, 'भाक्तमाहुः तमन्ये' 'आनन्दो मनसि लभतां प्रतिष्ठाम्', ध्वनिस्वरूपं प्रयोजनं च।

## Discussion

मङ्गलाचरणम्

आनन्दवर्धनः ध्वन्यालोकग्रन्थं रचयितुमारब्धः निर्विघ्नपरिसमाप्त्यर्थम् इष्टदेवतानमस्कारपूर्वकं मङ्गलाचरणं करोति।

**स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।**
**त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः॥**

**अन्वयः** - स्वेच्छाकेसरिणः मधुरिपोः स्वच्छस्वच्छायायासितेन्दवः प्रपन्नार्तिच्छिदः नखाः वः त्रायन्ताम्।

**लोचनम्** - स्वयमव्युच्छिन्नपरमेश्वरनमस्कारसम्पत्तिचरितार्थोऽपि व्याख्यातृश्रोतृणामविघ्नेनाभीष्टव्याख्या श्रवणलक्षणफलसम्पत्तये समुचिताशीः प्रकटनद्वारेण परमेश्वरसांमुख्यं करोति वृत्तिकारः- स्वेच्छेति।

स्वेच्छाकेसरिणः - यः स्वेच्छया सिंहरूपं धारणं कृतवान्, सः नरसिंहस्वरूपः विष्णुः

**अन्वयः** - स्वेच्छाकेसरिणः = स्वाभीष्टानुसारं सिंहरूपं स्वीकृतवन्तः ; मधुरिपोः = विष्णोः; स्वच्छस्वच्छायायासितेन्दवः = निर्मलया स्वकान्त्या बाधितचन्द्रस्य, प्रपन्नार्तिच्छिदः = शरणागतबाधा-विच्छेदकाः ; नखाः= कररुहाः ; वः युष्मान् ; त्रायन्ताम् = रक्षन्तु।

स्वेच्छाकेसरिणः विष्णोः नखाः युष्मान् रक्षन्तु इति विधेयवाक्यम्। कीदृशाः नखाः इति संशये स्वच्छस्वच्छायया आयासितचन्द्राः प्रपन्नबाधाविनाशकाश्च इति समाधानम्। विष्णुश्च

स्वेच्छाकेसरी अर्थात् स्वयंस्वीकृतसिहंस्वरूपः। हिरण्यकशिपु-संहरणवेलायामिति शेषः।

### 2.1.1. मङ्गलश्लोके - ध्वनित्रयनिरूपणम्

ध्वनिः, वस्तु, अलङ्कार-रसभेदेन त्रिविध इति

ध्वनिः वस्तु अलाङ्कार रसभेदेन त्रिविध इति, तत्रापि रसध्वनेरेव प्राधान्यमिति च वक्ष्यति ध्वनिकारः अग्रे। तादृशं त्रिविधमपि ध्वनिं मङ्गलश्लोके निरूपयति ग्रन्थकर्ता आनन्दवर्धनः यथा-

#### 2.1.1.1 रसध्वनिः

मधुरिपु शब्देन मधुः तादृशश्च अन्ये अत्र विभावः

मधुरिपोः नखाः वः युष्मान् व्याख्यातॄन् श्रोतॄन् त्रायन्ताम्। अत्र नित्योद्योगिनश्च भगवतः असम्मोहाध्यवसाययोगित्वेन उत्साहप्रतीतेः-वीररसो ध्वन्यते। वीररसस्य उत्साहः स्थायीभावः। उत्साहस्य च आश्रयः मधुरिपुः। मधुरिपोः त्राणयरायणतानित्योपयोगिता चात्र उत्साहवर्धकाः। मधुरिपु शब्देन मधुः तादृशश्च अन्ये अत्र विभावः। अतः अत्र वीररसध्वनिः।

#### 2.1.1.2. वस्तुध्वनिः

त्राणे (रक्षणे) मधुरिपुः कर्ता। प्रहरणञ्च कर्तव्यम्। करणानि नखाः। ते च शरीरात् अव्यतिरिक्ता इति आभ्यन्तरकरणानि। वस्तुतः करणमात्राणां नखानां रक्षणकर्तव्ये कर्तृत्वं नास्ति। तथापि कर्तृत्व-कथनं नखानामतिशयशक्तिमत्तां सूचयति। अर्थात् त्राणे कर्तव्ये परमेश्वरस्य आयुधान्तरापेक्षा नास्ति नखाः एव पर्याप्ताः इति वस्तुध्वनिः। मधुरिपु इति शब्दः जगद्भयापसरणे परमेश्वरः सर्वदा सन्नध्द इति वस्तु अपि ध्वनयति।

नखानां तेजस्वित्वं तथा चन्द्रस्य बालचन्द्रत्वं ध्वन्यते, यः वस्तुध्वनिः अस्ति

स्वच्छस्वच्छायायासितेन्दवः इति पदे नखानां चन्द्रस्य आयासकारित्ववर्णनात् चन्द्रस्य बालचन्द्रत्वं ध्वन्यते। तच्च अर्थशक्तिः पुनः वस्तुकृतः वस्तुध्वनिः।

### 2.1.1.3. अलङ्कारध्वनिः

लोके नखानामायासकारित्वं प्रसिद्धम्। मधुरिपुनखाः पुनः प्रपन्नार्तिच्छेदकाः इति व्यतिरेकालङ्कारध्वनिः। एवं मङ्गलश्लोके एव वस्तु -अलङ्कार रसभेदेन ध्वनित्रयं निरूपयति आनन्दवर्धनः।

### 2.1.2. ध्वन्यभाववादप्रतिपादनम् -

काव्यस्य आत्मा ध्वनिः इति बुधैः समाम्नातम्

ध्वनेः स्वरूपं प्रतिपादयितुमुद्युक्तः आनन्दवर्धनः ध्वन्यभाववादान् आदौ प्रकटयितुमारभते कारिकया प्रथमया यथा-

**काव्यस्यात्मा ध्वनिरिति बुधैर्यस्समाम्नातपूर्वः**
**तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥ १।।**

सहृदयजनानां प्रीत्यर्थं ध्वनेः स्वरूपं वयं प्रतिपादयिष्यामः

**अन्वयः-** यः ध्वनिः काव्यस्य आत्मा इति बुधैः समाम्नातपूर्वः अपरे तस्य अभावं जगदुः; अन्ये तं भाक्तं आहुः केचित् तदीयं तत्त्वं वाचां अविषये स्थितं ऊचुः, तेन सहृदयमनःप्रीतये तत्स्वरूपं; ब्रूमः।

बुधैः = विद्वद्भिः; काव्यस्य आत्मा ध्वनिः इति; यः; समाम्नातः = आसमन्तात् प्रकटितः (अस्ति) तस्य अभावम्, अन्ये जगदुः; अन्ये; तम् = ध्वनिम् ; भाक्तम् = भक्तौ अन्तर्भूतम्; आहुः = वदन्ति; केचित् =अपरे; तदीयं तत्त्वम्; वाचाम् अगोचरम् = वागातीतम् (अनिर्वचनीयं) वा; ऊचुः तेन = तस्मात् कारणात् सहृदयमनःप्रीतये = सहृदयमनःपरितोषाय; तत्स्वरूपं; ब्रूमः।

**बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरिति संज्ञितः परम्परया यः समाम्नातपूर्वः सम्यक् आसमन्तात् म्नातः प्रकटितः तस्य सहृदयजनमनःप्रकाशमानस्याप्यभावमन्ये जगदुः।**

ध्वनिः सहृदयस्य मनसि प्रकाशमानः भवति

अर्थात् ध्वनिः इति व्यवहारः परम्परया बुधेषु अस्ति। तैः सः सम्यक् प्रकटितः। स च सहृदयजनमनःप्रकाशमानः। तथापि न कस्मिन्

अपि ग्रन्थे सः नोल्लिखितः। तावता तदभाववादिनः मूर्खतया तस्य अभावं वदन्ति।

### 2.1.3. ध्वन्यभाववादविकल्पाः

अत्र ध्वनिविरोधिना त्रय विकल्पाः निर्दिष्टाः।

१. अभाववादिनः, २. भक्ति-वादिनः, ३. अलक्ष्यतावादिनः।

ध्वनिविरोधिनां त्रय-विकल्पाः

तदाहुः लोचनकाराः - 'तत्र समयोपेक्षणेन शब्दोऽर्थप्रतिपादक इति कृत्वा वाच्यव्यतिरिक्तं नास्ति व्यङ्ग्यम्, सदपि वा तदभिधावृत्त्याक्षिप्तं शब्दावगतार्थबलाकृष्टत्वाद् भाक्तम्, तदनाक्षिप्तमपि वा न वक्तुं शक्यं कुमारीष्विव भर्तृसुखमतद्विंत्सु इति त्रय एवैते प्रधानविप्रत्ति-पत्तिप्रकाराः। त एव क्रमशो विपर्ययपरकसन्देहपरक-अज्ञानपरकाः दृश्यन्ते।

'काव्यस्यात्मेति' कारिकायाः द्वितीयतृतीयपादयोः ध्वनिव्यतिरेकविकल्पान् त्रिप्रकारान् दर्शयति। तथाहि -१. अपरे तस्य अभावं जगदुः, २. अन्ये तं भाक्तमाहुः, ३. केचित् तदीयं तत्त्वं वाचामविषये स्थितमूचुः।

तत्र प्रथमे पक्षे सर्वात्मना तस्य ध्वनेः तिरस्कृतिः। द्वितीये पक्षे अस्तित्वमङ्गीकृत्यापि अन्यत्र अन्तर्भावनम्। तृतीयपक्षे अस्तित्वम् अङ्गीकृत्य अपि तत्त्वस्य अनिर्वचनीयत्वकथनम्।

### 2.1.4. ध्वन्यालोके प्रदत्ताः पञ्च विकल्पाः

काव्यध्वनितत्त्वस्य प्रतिपादनसंदर्भे ये ध्वनिविरोधिभिः पञ्च विकल्पाः निर्दिष्टाः

- काव्यस्य शब्दार्थमयत्वात् शब्दार्थचारुताहेतवः
- यदि भवति सः शोभाकारी न भवति। यदि शोभाकारी तर्हि गुणालङ्कारेषु अन्तर्भावः नामामात्रेण नूतनत्वम्।
- यदि उक्तेषु गुणालङ्कारेषु अन्तर्भावः तर्हि न कोऽपि विशेषलाभः।
- ध्वनेः भक्तौ अन्तर्भावः।

- ध्वनिः अनिर्वचनीयः।

एतान् पञ्चानपि विकल्पान् ध्वन्यालोकवृत्त्यनुसारं सविस्तरं विशदयति।

**नास्त्येव ध्वनिरिति व्युत्पत्त्या ध्वनेरभावं वदन्तीति अभाववादिनः**

अभाववादिनः - नास्त्येव ध्वनिरिति व्युत्पत्त्या ध्वनेरभावं वदन्तीति अभाववादिनः। तेषां त्रयो विकल्पा ध्वनिकारेण सम्भाविताः। ते यथा -

**अभाववादे त्रयः विकल्पाः**

**2.1.4.1. अभाववादे प्रथमः विकल्पः -**

**तत्र केचिदाचक्षीरन्- शब्दार्थशरीरन्तावत् काव्यम्। तत्र च शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव। अर्थगताश्चोपमादयः। वर्णसंघटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते।**

शब्दार्थौ काव्यशरीरत्वेन प्रसिद्धौ। तच्छोभाकारिणः गुणालङ्काराः, तद् व्यतिरिक्तं यदेव स्यात् तन्न शोभाकर इति प्रथमः।

**शब्दानां स्वरूपनिष्ठं चारुत्वं यमक, अनुप्रासादि भ्यः शब्दालङ्कारेभ्यः प्राप्तयः सन्ति**

शब्दार्थशरीरं काव्यम्। शब्दो वा अर्थो वा उभौ वा ध्वनिः न। नूतननामकरणेन प्रयोजनं किम् ? अतः शब्दार्थयोः चारुत्वं यत् सः ध्वनिः तथापि किं प्रयोजनम्? चारुत्वं द्विविधम्। स्वरूपमात्रनिष्ठं, सङ्घटनाश्रितञ्च। तथाहि स्वरूपमात्रनिष्ठं चारुत्वं शब्दानां शब्दालङ्कारेभ्यः सम्भवति। यमकानुप्रासादिभ्यः शब्दालङ्कारेभ्यः सम्भवति। यमकानुप्रासादयः शब्दालङ्काराः उक्तपूर्वा एव प्रसिद्धाः। शब्दानां सङ्घटनाश्रितं चारुत्वञ्च शब्दगुणेभ्यः। स्वरूपमात्रनिष्ठचारुत्वम् उपमादिभ्यः अर्थालङ्कारेभ्यः। अर्थालङ्काराश्च अन्यैः बहुप्रकाराः उक्ताः। सङ्घटनानिष्ठं चारुत्वं पुनः अर्थानामर्थगुणेभ्यः सिद्ध्यति।

इत्थं शब्दार्थचारुत्वहेतुषु सुस्पष्टमन्यैः प्रकाशितेषु गुणालङ्कारेषु तद् व्यतिरिक्तः कश्चित् ध्वनिः न सम्भवति। अर्थात् गुणालङ्कारभिन्नः चारुत्वहेतुः न भवति। चारुत्वहेतुत्वे पुनः गुणालङ्कारान्तर्गतत्वं न परिहार्यते।

**वृत्तिरीत्योरपि गुणालङ्कारान्तःपातित्वम्**

**तदनतिरिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः ताः अपि गताः श्रवणगोचरम्। रीतयश्च वैदर्भीप्रभृतयः तद्व्यतिरिक्ताः को ध्वनिर्नामेति।**

वृत्तयः रीतयः च गुणालङ्कारान्तर्गताः एव, न तु तद्भिन्नाः इति भाष्यकारेण निरूपितम्

ननु वृत्तयः रीतयश्च सन्ति। ते तु गुणालङ्कारभिन्नाः काव्यचारुत्वहेतवश्च। तद्वत् ध्वनिरपि गुणालङ्कारव्यतिरिक्तोऽपि चारुत्वहेतुः भवत्येव इति चेत् उच्यते। वृत्तयः रीतयो वा गुणालङ्कारव्यतिरिक्ताः न भवन्ति। तस्मात् वृत्तयः अनुप्रासादिभ्यः अनतिरिक्तवृत्तयः एव। तासां व्यापारोऽपि अनुप्रासेभ्यः भिन्नः नैव। रीतयः अपि गुणातिरिक्तव्यापाराः न भवन्ति। वैदर्भी गौडीया पाञ्चाली इति तत्तद्देशप्राचुर्यात् तत्तद्देशनाम्ना रीतिः त्रिधा प्रोक्ता। रीतिश्च माधुर्यादीन् गुणान् अतिक्रम्य न प्रवर्तते। यथा गुडमरीचादिरसाः अन्योन्यमेलनक्षमत्वेन पानके सम्मिलन्ति तथा माधुर्यादिगुणा अपि समुचितवृत्तिसमर्पिताः रीतयो भवन्ति। संक्षेपतः वृत्तिः जातिः, अनुप्रासः, जातिमान्। जातिः जातिमतः अन्या न भवति। तद्वत् समुदायरूपरीतिः समुदायिभ्यः गुणेभ्यः भिन्ना न भवति।

वृतिः जातिः, अनुप्रासः जातिमान्

एतद्भिन्नः ध्वनिर्नाम कः? अखण्डबुद्धितः आस्वादनीयमपि काव्यं विभज्य अंशतः परिशील्यमानमपि तस्मिन् ध्वनिशब्दवाच्यः गुणालङ्कारादिभिन्नः कश्चित् अर्थः न लभ्यते। अतः ध्वनिर्नास्ति।

### 2.1.4.2. अभाववादे द्वितीयः विकल्पः -

**अन्ये ब्रूयुः - नास्त्येव ध्वनिः। प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्। न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सम्भवति। न च तत्समतान्तःपातिनः सहृदयान् कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितामवलम्बते।**

ये गुणालङ्काराः अस्माभिर्गणिता तद्व्यतिरिक्तो यदि कश्चित् ध्वनिर्नाम पदार्थः स्यात् तर्हि न तत् शोभाकरमिति प्रसिद्धप्रस्थानव्यतिक्रमादिति द्वितीयः प्रकारः।

शब्दार्थमयौ एव सहृदयहृदयानां ह्लादजनकौ इति कथ्यते

सहृदयहृदयानामाह ह्लादजनकौ शब्दार्थौ एव काव्यम्। प्रसिद्धमार्गभिन्नस्य काव्यप्रकारस्य कुतः काव्यत्वम्? न च कांश्चन सहृदयान् परिकल्प्य ध्वनिमार्गानुयायिनः तत्प्रसिद्धिमात्रेण ध्वनौ काव्यव्यपदेशे कृतेऽपि सः सकलविद्वन्मनोरञ्जकः न भवेत्। तेन तैः न गृह्यत एव।

### 2.1.4.3. अभाववादे तृतीयः विकल्पः -

**पुनरपरे तस्याभावमन्यथा कथयेयुः-न सम्भवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्त-र्भावात्। तेषामन्यतमस्यैव वा अपूर्वसमाख्यामात्रकरणे यत्किञ्चन कथनं स्यात्।**

शब्दार्थशोभाकराः गुणालङ्कारा अस्माभिः गणिता एव। यदि कश्चित् ध्वनिर्नाम काव्यशोभाकरः स्यात् तर्हि तस्यापि गुणालङ्कारेषु एव अन्तर्भाव इति तृतीयः।

ध्वनिः यदि अपूर्वः स्यात्, तर्हि सः प्राचीनैः गुणालङ्कारेषु न अन्तर्भवेत्; किन्तु तस्य अपूर्व-त्वं केवलं नाममात्रम्

प्राचीनैः अनुक्तः गुणालङ्कारेषु अन्तर्भूतः कोऽपि विशेषलेशः स्यादिति विकल्पः। ध्वनिः नाम अपूर्वः (प्राचीनैः अप्रकटितः) न कोऽपि सम्भवति। कमनीयताहेतुत्वेन भाव्यमानः सः तथा सम्भाव्य प्राचीनैः उक्तेषु चारुताहेतुषु गुणालङ्कारिषु अन्तर्भूत एव भवेत्। तेषु विवृतपूर्वेषु गुणालङ्कारेषु अन्यतमस्य केवलमिदं नूतनं नाम स्यात्।

**किञ्च वाग्विकल्पानामानन्त्यात् सम्भवत्यपि वा कस्मिंश्चित् काव्यलक्षणविधायिभिः प्रसिद्धैरप्रदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति यदेतदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते, तत्र हेतुं न विद्मः। सहस्रशो हि महात्मभिरन्यैरलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च। न च तेषामेषा दशा श्रूयते। तस्मात् प्रवादमात्रं ध्वनिः। न त्वस्य क्षोदक्षमं तत्त्वं किञ्चिदपि प्रकाशयितुं शक्यम्।**

ध्वनिवादिनः 'अलीकसहृदयत्व-भावनामुकुलितलोचनैः' अनावश्यकं नृत्यन्ति इति तेषां दोषः दर्श्यते

अथवा अङ्गीक्रियताम् यथा इदं नूतनं नाम न भवति। प्राचीनैः काव्यलक्षणकर्तृभिः अप्रदर्शितः कोऽपि प्रकारलेशः अपि न भवति, इदं नूतनमेव प्राचीनैः अप्रदर्शितमेव इति। तावता किं कृतं भवेत्। नूतनाविष्कारभावेन अलीकसहृदयत्वभावेन च मुकुलितलोचनैः किमर्थं नृत्यते न जानीमः। यतः काव्यचारुताहेतुभूताः गुणाः अलङ्काराः अन्ये वा केचित् प्रकाराः तदन्तर्भूतः अन्तर्भूताः वा एकेनैव आलङ्कारिकेण एकवारमेव न प्रकटिताः, नापि सम्भाविताः। सहस्रशः सन्ति आलङ्कारिकाः काव्यलक्षणविधायिनः। परम्परया तैः नूतनाः अलङ्कारप्रकाराः प्रकाशिताः प्रकाश्यमानाः, प्रकाश्यन्ते च। तावता ते लक्षणकर्तारः एवं नर्तनं न कुर्वन्ति। ध्वनिवादिभिः ध्वनिरूपस्य काव्यचारुताहेतुप्रकारलेशस्य आविष्कारमात्रेण 'स एव सर्वस्व' मिति, 'सर्वमपि तस्मिन्नेव अन्तर्भवतीति कथनम् अलीकसहृदयत्व-भावनाफलरूपम्। तस्मात् ध्वनिः प्रवादमात्रम्, तस्य तत्त्वमपि स्पष्टतया प्रतिपादयितुमशक्यम्।

'काव्यशोभायाः कर्तारः धर्माः गुणाः तदतिशयहेतवः अलङ्कारा' इति वामनः

'काव्यशोभायाः कर्तारः धर्माः गुणाः तदतिशयहेतवः अलङ्कारा' इति वामनः उवाच काव्यशोभाहेतुत्वे तस्य गुणालङ्कारेभ्यः व्यतिरिक्तत्वं न। व्यतिरिक्तत्वे शोभाहेतुत्वं न। शोभाहेतुत्वेऽपि आदरास्पदं न भवति तादृशानां शोभाहेतूनां सहस्रशः सत्त्वात्, ध्वनेरपि तदन्यतमत्वात् च।

एवं अभाववादीनां त्रयो विकल्पाः प्रदर्शिताः। तदेवोच्यते समासेन कथितः। तानेव पुनः निर्दिशति-

**यस्मिन्नस्ति न वस्तु किञ्चन मनःप्रह्लादि सालंकृति**
**व्युत्पन्नैः रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्।**
**काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो**
**नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥**

**अन्वयः-** यस्मिन् किञ्चन वस्तु मनःप्रह्लादि सालंकृति न अस्ति, व्युत्पन्नैः रचितं न एव, यत् वक्रोक्तिशून्यं च तत् काव्यं ध्वनिना समन्वितं इति

प्रशंसन् जडः, सुमतिना ध्वनेः स्वरूपं पृष्टः किं अभिदधाति इति न विद्मः।

### 2.1.4.4. भाक्तवादः चतुर्थः विकल्पः

**भाक्तमाहुस्तमन्ये। अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः। यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः, तथापि अमुख्यवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्टोऽपि न लक्षित इति परिकल्प्यैवमुक्तम्- 'भाक्तमाहुस्तमन्ये' इति।**

'भाक्तमाहुः तमन्ये' इत्यनेन भाक्तवादः, अर्थात् ध्वनिः गुणवृत्तिरूपेण एव अस्ति इति

केचित् ध्वनिः गुणवृत्तिरेव इति वदन्ति। प्राचीनैः आलङ्कारिकैः ध्वनिपदेन गुणवृत्तिर्वा अन्यः कोऽपि पदार्थो वा न लक्षितः। किन्तु तैः अभिधाभिन्ना कापि अमुख्या वृत्तिः प्रकाशिता। तदनुसारं व्यवहारः दर्शितः। ध्वनेरपि अभिधा भिन्नवृत्तित्वात् तैः ध्वनिमार्गः लेशतः एव किन्तु न लक्षितः इत्यभिप्रायेण 'भाक्तमाहुस्तमन्ये' इति कथनम्।

### 2.1.4.5. ध्वनिः अनिर्वचनीयः पञ्चमविकल्पः

**केचित्पुनर्लक्षणकरणशालीनबुद्धयो ध्वनेस्तत्त्वं गिरामगोचरं सहृदय-हृदयसंवेद्यमेव समाख्यातवन्तः।**

पञ्चमे विकल्पे ध्वनिः अनिर्वचनीयः, अर्थात् वाग्गोचरातीतः तथा केवलं सहृदयहृदय-संवेद्यः इति

केचित् लक्षणकथने अप्रगल्भमतयः ध्वनेः तत्त्वं वागगोचरमिति वदन्ति। सहृदयैः केवलं ज्ञायते न तु लक्षयितुं शक्यते इति तेषाम् अभिप्रायः।

पञ्चविकल्पेषु प्रथमादित्रयं सर्वात्मना ध्वनिं निरस्यति। ते विपर्यस्ताः। भाक्तवादिनः तद्रूपं जानन्तोऽपि सन्देहेन वर्तन्ते। तृतीयस्तु अज्ञानिनः इति ध्वन्यभाववादाः।

### 2.1.5. ध्वनेः स्वरूपम्

**तेनैवंविधासु विमतिषु स्थितासु सहृदयमनःप्रीतये तत्स्वरूपं ब्रूमः। तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीय-मणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलित-**

**पूर्वम्, अथ च रामायणमहाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते ॥1॥**

‘तेन ब्रूमः सहृदयमनः प्रीतये तत्स्वरूपम्’

ध्वन्यालोकस्य प्रथमकारिकायामेव ग्रन्थरचनाया अनुबन्धचतुष्टयमध्ये प्रयोजनमुच्यते। 'तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्' इति। अस्यार्थः तस्य काव्यस्यात्मभूतस्य ध्वनितत्त्वस्य स्वरूपं ब्रूमः किमर्थमिति सहृदयमनःप्रीतये, कस्मात्? तेन इति विप्रतिपत्तीनां सत्त्वात् इति। ध्वनेः स्वरूपं ब्रूमः इति प्रयोजनम्, सहृदयमनःप्रीतये इति प्रयोजनम्। यशोऽर्थेत्यादयस्तु गौणप्रयोजनानि अथवा तुच्छत्वात् त्याज्यानि।

**अनुबन्धचतुष्टयम्** -

**अधिकारी** - काव्यात्मतत्त्वजिज्ञासुः।

**विषयः** - ध्वनिनिरूपणं तद्विषयकविप्रतिपत्तिनिराकरणञ्च।

**सम्बन्धः**- ग्रन्थविषयस्य ग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः।

**प्रयोजनम्** - निस्थापना तेन सहृदयमनःप्रीतिश्च। इति।

काव्यप्रयोजनेषु - यशः अर्थप्राप्तिः व्यवहारज्ञानं परमानन्दञ्चेति मुख्यप्रयोजनानि स्वीक्रियन्ते। तेषु परमानन्दप्राप्तिः प्रधानतमं प्रयोजनम्। यशोदयस्तु गौणभूता एव तदेवोच्यते सहृदयमनःप्रीतये इति। यथाह तत्रैव वृत्तिग्रन्थे- "तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम्, अतिरमणीयम्, अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्। अथ च रामायण-महाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानाम् आनन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते" इति।

ध्वनेः स्वरूपम्

सकलसत्कविकाव्यरहस्यभूतम्, अतिसुन्दरं यत्तत्त्वम् अतिसूक्ष्मतत्त्वप्रकाशके काव्यलक्षणविधायिभिरपि अव्याख्यातं

यत्तत्त्वं सकलसत्काव्यात्मभूतम् आनन्दप्रदमपि अप्रकाशितं ध्वनितत्त्वं प्रतिष्ठापयामः।

ध्वनिस्वरूपस्य प्रकाशनेन अभाववादिनः, भाक्तवादिनः, तथा अनिर्वचनीयतावादिनः - एते निराकृताः

ध्वनिविरोधिनः त्रयः पक्षाः। तत्र च अभाववादिनां त्रयो विकल्पाः ध्वनिकारेण प्रदर्शिताः। एवं सम्मेलनेन पञ्च ध्वनिविरोधिपक्षाः स्वीकृताः। तेषामेव निराकरणाय चत्वारि विशेषणानि प्रदर्शितानि। तेन सकलसत्कविकाव्योपनिषद्-भूतमित्यनेन अभाववादिनाम्, अतिरमणीयमित्यनेन भाक्तवादिनाम्, अणीयसीभिरित्यादिभिः अलक्षणीयतावादिनां निराकरणं कृतम्।

'आनन्दो मनसि लभतां प्रतिष्ठाम्' एतेन रसध्वनेः प्राधान्यं तथा ध्वनेः काव्ये प्रतिष्ठा सूच्यते

'आनन्दो मनसि लभतां प्रतिष्ठाम्' इत्यनेन रसध्वनेः प्राधान्यं तथा च ध्वनेर्प्रतिष्ठा अपि सङ्केतिता।

सहृदय इत्यनेन काव्यानुशीलनाभ्यासवशादविशदीभूतमनसाम् इति।

**2.1.6 ध्वनिनिरूपणप्रतिज्ञा -**

वृत्तिकारः चतुर्भिः कारणैः ध्वनेः प्रतिष्ठां कथयति

अत्र वृत्तिकारः चतुर्भिः कारणैः ध्वनेः प्रतिष्ठां कथयति। तानि च कारणानि क्रमशः १. ध्वनिस्वरूपं सकलसत्कविकाव्योपनिषद्भूतम् २. अतिरमणीयम् ३. प्रचीनकाव्यलक्षणकर्तृभिः अकथितम् ४. रामायणमहाभारतादिलक्ष्ये प्रसिध्दव्यवहारम्।

**2.1.6.1. सकलसत्कविकाव्योपनिषद्भूतम् -**

ध्वनिः सत्कविकाव्येषु तत्रापि सकलानां सत्कवीनां काव्येषु दृश्यमानः इति। उपनिषत् शब्देन तस्यैव सारभूतत्वं, कविमनस्सु तस्य स्थेयमानत्वञ्च सूचयति।

अतिरमणीयम्' इति विशेषणेन भाक्तवादं निराकरोति

**2.1.6.2. अतिरमणीयम्**

पदमिदं भाक्तवादं निराकरोति। गङ्गायां घोषः, सिंहो माणवक. इत्यादिवचनेषु रम्यता काचिदपि नास्ति। केवलं रूढितः प्रयोजनदृष्ट्या वा मुख्यार्थसम्बन्धे अर्थप्रयोगमात्रम्।

### 2.1.6.3. प्राचीनकाव्यलक्षणकर्तृभिः अकथितम्

‘अनुन्मीलितपूर्वम्’ इत्यनेन प्राचीनकाव्यलक्षण कर्तृभिः अपि ध्वनिः स्पष्टतया न उक्तः

प्राचीनलक्षणकर्तारः अपि मेधाविनः । तेषां मतयः सूक्ष्माः । तथापि ताभिः मतिभिः अनुन्मीलितः एव ध्वनिः । सः अनुन्मीलित एव न तु अस्थितः । अनेन गुणालङ्कारयोः ध्वनेः अन्तर्भूतत्वं सूच्यते ।

### 2.1.6.4 रामायणमहाभारतादि लक्ष्ये प्रसिद्धव्यवहारः

"तत्समयान्तःपातिनः कांश्चित् परिकल्प्य" इति वादं निरवकाशीकरोति 'रामायण' - इत्यादिना । आदिकवेः प्रभृति सर्वैरपि आदृत एव । कार्यनुरोधेन कारणं कल्पनीयमिति न्यायानुसारं लक्ष्ये दृश्यमानत्वात् ध्वनेः लक्षणं वक्तव्यमेव भवति "लक्षयता" मिति पदं तस्य अनिर्वचनीयत्वं निराकरोति ।

## Summarised Overview

मङ्गलश्लोके त्रिविधध्वनिनिरूपणात् आनन्दवर्धनस्य वीक्षणं स्पष्टं प्रकाशते - सः ध्वनिवादस्य प्रमुखसमर्थकः। रसध्वनिः तु तेषु मुख्य इति मन्यते। तथापि मङ्गलाचरणे अपि सः रस वस्तु अलङ्कारेषु त्रिषु प्रकारेषु ध्वनिं एकत्र संयोजयति। अतः स्पष्टं दृश्यते यत् ध्वनिः न केवलं काव्यलक्षणमात्रम्, अपि तु काव्यस्य प्राणतत्त्वं इति तस्य दृढं मतम्। मङ्गलश्लोक एव तस्य सम्पूर्ण- ध्वनिसिद्धान्तस्य संकेतस्वरूपं दृश्यते।

"काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः" इत्यत्र आनन्दवर्धनः उक्तवान् यत् - विद्वांसः काव्यस्य आत्मा ध्वनिः इति पूर्वमेव स्वीकृतवन्तः। तथापि अपरे तस्य ध्वनेः अभावं वदन्ति। अन्ये तं भाक्तम्, अर्थात् प्रतिपाद्यत्वेन अप्रत्यक्षं तत्त्वम् इति मन्यन्ते। केचित् तु ध्वनिं वाचाम् अगोचरं तत्त्वम् इति वदन्ति। एतेषां विविधमतानां मध्ये आनन्दवर्धनः तद्विषये स्पष्टं मतं दातुम् इच्छति। काव्यं सहृदयस्य मनसि आनन्दं जनयति, तस्य रहस्यम् ध्वनिरूपेण स्फुटं भवति। तेन सः ध्वनिस्वरूपं निरूपयति।

अत्र ध्वनिविरोधिनः त्रय विकल्पाः निर्दिष्टाः। १. अभाववादिनः, २. भक्ति-वादिनः, ३. अलक्ष्यतावादिनः। अभाववादिनः - नास्त्येव ध्वनिरिति व्युत्पत्त्या ध्वनेरभावं वदन्तीति

अभाववादिनः। तेषां त्रयो विकल्पा ध्वनिकारेण सम्भाविताः। ते यथा -शब्दार्थौ काव्यशरीरत्वेन प्रसिद्धौ। तच्छोभाकारिणः गुणालङ्काराः, तद् व्यतिरिक्तं यदेव स्यात् तन्न शोभाकर इति प्रथमः। ये गुणालङ्काराः अस्माभिर्गणिता तद्व्यतिरिक्तो यदि कश्चित् ध्वनिर्नाम पदार्थः स्यात् तर्हि न तत् शोभाकरमिति प्रसिद्धप्रस्थानव्यतिक्रमादिति द्वितीयः प्रकारः। शब्दार्थशोभाकराः गुणालङ्कारा अस्माभिः गणिता एव। यदि कश्चित् ध्वनिर्नाम काव्यशोभाकरः स्यात् तर्हि तस्यापि गुणालङ्कारेषु एव अन्तर्भाव इति तृतीयः।

तत्र काव्यशास्त्रिभिः ध्वनिशब्दोल्लेखेन गुणवृत्तेः कश्चित् प्रकारः न प्रदर्शितः तथापि गौणवृत्त्या ध्वनिमार्गोऽपि मनाक् स्पृष्ट एव। तदेव 'भाक्तमाहुस्तमन्ये' इत्युक्तम्। आहु इत्यनेन किञ्चित् स्पृष्टः इत्येवार्थो ग्राह्यः। केचित् लक्षणकथने अप्रगल्भमतयः ध्वनेः तत्त्वं वागगोचोरमिति वदन्ति। सहृदयैः केवलं ज्ञायते न तु लक्षयितुं शक्यते इति तेषाम् अभिप्रायः।

वृत्तिग्रन्थे- "तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतम्, अतिरमणीयम्, अणीयसीभिरपि चिरन्तनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्। अथ च रामायण-महाभारतप्रभृतीनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्ष्ययतां सहृदयानाम् आनन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते" इति।

# Assignments

**I. उत्तरं लिखत।**

1. स्वच्छस्वच्छायायासितेन्दवः इति पदे वस्तुध्वनिः कथं व्यज्यते?
2. स्वेच्छाकेसरिणः इति श्लोके रसध्वनिव्यञ्जकपदं किम्?
3. कः स्वेच्छाकेसरी?
4. रसध्वनिः कथं दश्यते मङ्गलश्लोके?
5. अलङ्कारध्वनिः केन प्रकारेण दृश्यते?
6. ध्वनिविरोधिनां त्रयः विकल्पाः के?
7. भाक्तः इति शब्दस्य कः अर्थः ?
8. "काव्यस्यात्मा ध्वनिः" इत्यस्य औचित्यं किम्?

9. वृत्तयः रीतयः च ध्वनिवादे कथं विचार्यन्ते?

10. तृतीयेन विकल्पेन ध्वनिं केन प्रकारेण न विराजते?

11. भाक्तवादिनः ध्वनिं किमर्थं 'गुणवृत्तिः' इति मन्यन्ते?

12. 'आनन्दो मनसि लभतां प्रतिष्ठाम्' इत्यनेन कस्य ध्वनेः प्राधान्यं निर्दिश्यते?

13. 'अतिरमणीयम्' इत्युक्त्या कः वादः निराकृतः?

**II. टिप्पणिं लिखत ।**

1. आनन्दवर्धनः मङ्गलश्लोकेन ध्वनित्रयं कथं निरूपयति?
2. ध्वन्यभाववादिनः ध्वनिं कथं निरस्यन्ति?
3. ध्वनिस्वरूपं प्रयोजनं च संक्षेपेण वर्णयत ।
4. "काव्यस्यात्मा ध्वनिरिति" इत्यस्य कारिकायाः विस्तृतं व्याख्यानं कुरुत ।
5. धन्यभाववादीनां मते ध्वनेः कुत्र अन्तर्भावः? कुतः?
6. "वृत्तिरित्योरपि गुणालङ्कारान्तःपातित्वम्" इत्यस्मिन् वाक्ये वृत्तिः रीतिश्च ध्वनेः विकल्परूपेण न स्वीकर्तव्या इति कथं सिद्ध्यति? विवेचनं कुरुत ।
7. ध्वनिनिरूपणप्रतिज्ञायाः मुख्यकारणानि संक्षेपेण वर्णयत ।

**III. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत ।**

1. काव्यस्यात्मा ध्वनिरित्यत्र प्रतिपक्षरूपाणाम् अभाववादीनां मतं दर्शयताम् ।
2. काव्यस्यात्मा ध्वनिः इत्यस्य विप्रतिपत्तीः वर्णयत ।

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015
2. Dhvanyaloka with Alacanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
3. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, Harvard University Press, Cambridge, London, 1990,
4. History of Sanskrit Poetics, P.V.Kane, Motilal Banarsidass, New Delhi, 1987

5. Dhvanyaloka, Ed.C.M.Neelakanthan, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968..

# References

1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९० ।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. ध्वन्यालोकप्रकाशिका, श्राराजेन्द्रप्रसादः कोठ्यारी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# वाच्यात् व्यतिरिक्तस्य व्यङ्ग्यस्य सद्भावप्राधान्यकथनम्

## Learning Outcomes

- व्यङ्ग्यार्थः अस्तीति सप्रमाणं ज्ञायते।
- व्यङ्ग्यार्थः वाच्याद् भिन्न इति स्पुटमवगच्छति।
- ध्वनिशब्दस्य अर्थत्रैविध्यं ज्ञायते।
- व्यङ्ग्यार्थस्य प्राधान्यम्।
- व्यङ्ग्यार्थं ग्रहीतुं शक्तो भवति।

## Background

पूर्वस्मिन् एकके आनन्दवर्धनः ध्वन्यालोकग्रन्थस्य आरम्भे मङ्गलश्लोकं रचयन् त्रिविधं ध्वनिं प्रतिपादयति। एतेषु त्रिषु प्रकारेषु ध्वनिं एकत्र संयोजयति। अतः स्पष्टं दृश्यते यत् ध्वनिः न केवलं काव्यलक्षणमात्रम्, अपि तु काव्यस्य प्राणतत्त्वम् इति तस्य दृढं मतम्। मङ्गलश्लोक एव तस्य सम्पूर्ण-ध्वनिसिद्धान्तस्य संकेतस्वरूपं दृश्यते। ध्वनिः यद्यपि लौकिकग्रन्थेषु न स्पष्टः, तथापि अनुभवानुग्राह्यः। तेन सहृदयजनस्य प्रीत्यर्थं काव्यध्वनेः सुस्पष्टं स्वरूपं प्रतिपादयति। अस्मिन् एकके वाच्यात् भिन्नः व्यङ्ग्यः अस्तीति सप्रमाणं वयं पठामः।

## Keywords

प्रतीयमानस्य अर्थः, वाच्यार्थस्य विस्तृतं निरूपणम् , प्रतीयमानः अर्थः वाच्यार्थात् भिन्नः, प्रतीयमानं कथं भवतीति, प्रतीयमानस्य स्वरूपं, वस्तुध्वनिः पञ्चविधः, व्यङ्ग्यार्थस्तु वाच्यार्थात् भिन्नमेव,

रसध्वनेः वाच्याद्भिन्नविषयत्वम्, व्यञ्जनाशक्त्या रसादीनां प्रतिपत्तिः स्फुटम्, रसात्मा अर्थ एव काव्यस्य आत्मा, वाल्मीकिकाव्ये 'प्रतीयमानस्य' स्वरूपं, प्रतिभास्वरूपम्, व्यङ्ग्यार्थस्य प्राधान्यम्।

# Discussion

शरीरस्य आत्मा इव काव्यस्य साररूपतया स्थितः अर्थः

अर्थस्य द्वैविध्यं- वाच्यार्थः प्रतीयमानार्थश्च इति। कीदृशस्य अर्थस्य? शरीरस्य आत्मा इव काव्यस्य साररूपतया स्थितस्य अर्थस्य। 'शब्दार्थशरीरं तावत्काव्यमिति' प्राचीनैरेव लक्षितम्। तत्र शरीरपदमेव शरीरस्य अनुप्राणकेन केनचित् आत्मना भवितव्यमिति सूचयति। शब्दः शरीरभागः स्थूलः कृशः इत्यादि धर्मवत् सर्वजनसंवेद्यः अंशः भवति। अर्थस्य स्थितिः न तथा। सकलजनसंवेद्यत्वं तस्य न भवति। अर्थमात्रेणापि काव्यपदव्यवहारः न सम्भवति लौकिकवाक्यैः वैदिकवाक्यैश्च अर्थः अवगम्यत एव। तावता तेषां काव्यत्वं न। किं तर्हि? यत्र अर्थः सहृदयश्लाघ्यः भवति तत्रैव काव्यपदव्यपदेशः। अतः सहृदयश्लाघ्यः इति अर्थस्य विशेषणम्।

अर्थः द्विधा-वाच्यः प्रतीयमानः च इति- भेदद्वयं स्मृतं भवति

स एक एवार्थः (सहृदयश्लाघ्यः) विवेकिभिः द्विधा विभाज्यते। वाच्यप्रतीयमानयोः द्वयोरपि अर्थरूपत्वं समानमेव। वस्तुतस्तु शब्दार्थः द्विप्रकारः। अभिधातः वाच्यः, व्यञ्जनातः प्रतीयमानः।

### 2.2.1. प्रतीयमानार्थः काव्ये आत्मरूपेण गण्यते

काव्यस्यात्मा ध्वनिरिति' कारिकया ग्रन्थविषयप्रयोजनावुपस्थाप्य ध्वनेः व्याख्यां कर्तुकामः भूमिकां रचयति ध्वनिकारः - प्रतीयमानार्थं स्थापयति यथा-

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**

**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥ २॥**

ध्वनिकारस्य मते सहृदयैः श्लाघ्यः यः अर्थः, स एव काव्यस्य आत्मा इति व्यवस्थितः

**अन्वयः -** काव्यात्मा इति व्यवस्थितः सहृदयश्लाघ्यः यः अर्थः तस्य वाच्यप्रतीयमानाख्यौ उभौ भेदौ स्मृतौ।

सहृदयश्लाघ्यः = सहृदयैः प्रशंसनीयः, यः अर्थः काव्यात्मा इति व्यवस्थितः निर्णीतः। तस्य वाच्यप्रतीयमानाख्यौ = वाच्यः, प्रतीयमानः इति नाम्ना द्वौ भेदौ स्मृतौ प्रकटितौ।

वाच्यश्च प्रतीयमानश्च तथाऽऽख्या ययोस्तौ वाच्यप्रतीयमानाख्यौ। उभयपदप्राधान्येन द्वन्द्वः अथवा द्वन्द्वत्वात् उभयपदप्राधान्यम्। अस्यार्थः प्रतीयमानार्थः वाच्यार्थ इव निर्विवादसिद्धः। उभयोरपि निर्विवादप्राधान्यं च। तथाविधः य अर्थः स काव्यात्मेति सहृदयश्लाध्येति च।

**2.2.1.1. वाच्यार्थस्य अनिरूपणे हेतुः**

प्रतीयमानमर्थमेव विशदीकर्तुकामः ध्वनिकारः वाच्यस्य अर्थस्य अनिरूपणे हेतुमाह यथा -

**तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः।**

**बहुधा व्याकृतः सोऽन्यैः -काव्यलक्षणविधायिभिः**

**ततो नेह प्रतन्यते॥ ३॥**

वाच्यः प्रसिद्धः सः अन्यैः काव्यलक्षणविधा-यिभिः उपमादिभिः प्रकारैः बहुधा व्याकृतः

**अन्वयः** - तत्र यः वाच्यः प्रसिद्धः सः अन्यैः काव्यलक्षणविधायिभिः उपमादिभिः प्रकारैः बहुधा व्याकृतः ततः इह न प्रतन्यते।

तत्र = वाच्यप्रतीयमानरूपे द्विप्रकारे अर्थ; प्रसिद्धः = लोकसिद्धः; अर्थः= वाच्यार्थः; सः; अन्यैः = इतरैः (काव्यलक्षणविधायिभिः); उपमादिभिः प्रकारैः = उपमादिभिः अलङ्कारैः गुणरीत्यादिभिश्च; बहुधा = नानाविधं विस्तरशः; व्याकृतः = विशदीकृतः; ततः = तस्मात् कारणात्, इह = अत्र ध्वनिनिरूपणप्रसङ्गे, न प्रतन्यते = न विस्तरीक्रियते।

इतः पूर्वमेव वाच्यार्थविशेषाः उपमादयः अलङ्काराः, सङ्घटना-धर्माः माधुर्यादयः, उपनागरिकादयो वृत्तयश्च बहुधा प्रोक्ताः भामह-

दण्डि-उद्भटादिभिः आलङ्कारिकैः काव्यलक्षणप्रस्तावनाप्रसङ्गे। अतः अत्र न प्रतन्यते। केवलं यथावसरं यथोपयोगञ्च अनूच्यते।

### 2.2.1.2. प्रतीयमानस्वरूपम्

काव्ये प्रतीयमानमर्थं वाच्यार्थात् भिन्नमस्तीति प्रतिपादयति प्रतीयमानं पुनरन्यदेव इति। तथा चात्र श्लोकः -

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**

**यत् यत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ ४॥**

**अन्वयः -** महाकवीनां वाणीषु पुनः प्रतीयमानं अन्यत् वस्तु अस्ति एव यत् यत् अङ्गनासु प्रसिद्धावयवातिरिक्तं लावण्यम् इव विभाति।

अङ्गनासु = कान्तासु, प्रसिद्धावयवातिरिक्तम् = प्रसिद्धाङ्गेभ्यः भिन्नम्; यत्; लावण्यम् = सौन्दर्यम्, विभाति, तत् = तथाविधम्; प्रतीयमानं पुनः = प्रतीयमानस्तु अर्थः, अन्यदेव = (वाच्यात्) भिन्न एव; महाकवीनां वाणीषु अस्ति।

प्रतीयमानः अर्थः वाच्यार्थात् सर्वथा भिन्नः अस्ति

काव्येषु एक व्युत्पत्तिगतोऽवयवार्थस्तु भवत्येव तद् व्यतिरिक्तमपि कश्चिद् अन्योऽर्थः काव्ये भवति तदेवार्थः प्रतीयमानमिति शब्दैः प्रकटितः। तदर्थस्तु वाच्यार्थाद् भिन्नमस्ति एवेति निश्चयार्थम्। तेन प्रतीयमानमित्यादिना प्रतीयमानस्यार्थस्य नितान्तभिन्नत्वं प्रतिपादितम्।

प्रतीयमानार्थः वाच्यार्थविरोधि, वाच्यार्थसमर्थकः, उभयरूप वा भवेत्

तत् प्रतीयमानं कथं भवतीति प्रतिपादयति लावण्यमिवाङ्गनासु इति। यथा अङ्गनासु लावण्यम् अधरनासिकाकपोलादिभ्यो व्यतिरिक्तं किञ्चिदन्यमेव हृदयाह्लादकं भवति तथैव महाकवीनां वाणीषु वाच्यार्थाद् भिन्नं सर्वथा अकथनीयमेवार्थः भवति। तत्प्रतीयमानार्थस्तु क्वचिद् वाच्यार्थविरोधि क्वचिद् वाच्यार्थसमर्थकं क्वचिच्चानुभयरूपं भवति। तदेवोच्यते - 'स ह्यर्थो वाच्यार्थ सामर्थ्याक्षिप्तं वस्तुमात्र

अलङ्काररसादयश्चेति अनेकप्रभेदभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्।'

### 2.2.1.3. प्रतीयमानस्य वाच्यात् विभिन्नत्वम्

एवं च प्रतीयमानार्थः क्वचिद् वस्तुरूपः क्वचिद् अलङ्काररूपः क्वचिच्च रसरूपः इति त्रिप्रकारः।

प्रतीयमानः अर्थः केवलं वस्तुरूपः न, अलङ्काररूपः, रसरूपोऽपि भवति। सर्वेष्वपि तेषु प्रभेदेषु प्रतीयमानस्य वाच्यात् विभिन्नत्वमेव। रसरूपः प्रतीयमानार्थः स्वप्नेऽपि स्वशब्दवाच्यः न भवति। लौकिकव्यवहारे न पतति। स च रसनीयरूपध्वनिरेव भवति।

त्रिविधोऽपि वस्तु-अलङ्कार-रसध्वनिरूपः प्रतीयमानार्थः वाच्यात् भिन्न एव




एवं त्रिविधोऽपि वस्तु-अलङ्कार-रसध्वनिरूपः प्रतीयमानार्थः वाच्यात् भिन्न एव।

### 2.2.2. वस्तुध्वनेः वाच्यात् विभिन्नत्वम्

वस्तुरूपस्तु विधिप्रतिषेधोभयानुभयरूपत्वात् पञ्चविधः

वस्तुमात्रस्य ध्वनेः वाच्यात् दूरतः विभिन्नत्वं भवति तन्निरूपयति वृत्तिकारः। वस्तुरूपस्तु विधिप्रतिषेधोभयानुभयरूपत्वात् पञ्चविधः। तद्यथा - विधिरूपे वाच्ये प्रतिषेधरूपः, प्रतिषेधरूपे वाच्ये विधिरूपः, विधिरूपे वाच्ये अनुभयरूपः, वाच्ये प्रतिषेधरूपे अनुभयरूपः, तथा च वाच्याद्भिन्नरूपे व्यवस्थित इति।

**व्यङ्ग्यर्थस्य वाच्यार्थाद् वैलक्षण्यम्**

अभिधाव्यापारस्तु वाच्यार्थं प्रकाश्य एव विरतो भवति

व्यङ्ग्यार्थस्तु वाच्यार्थात् भिन्नमेव भवति। क्वचिदपि तस्य वाच्यार्थरूपत्वं न सम्भवति। अत एव ये 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापार' इति कथयन्ति ते देवानां प्रियाः। तथा सति 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति सिद्धान्तविरुद्धत्वम्। अभिधाव्यापारस्तु वाच्यार्थं प्रकाश्य एव विरतो भवति अन्यथा अनेकार्थानां शब्दानां प्रयोगे सर्वेषामर्थानां वाच्यत्वात् प्रकरणादिना एकार्थनियमनमसम्भव एव स्यात्।

'गतोस्तमर्कः' इत्यादौ व्यङ्ग्यार्थस्य सन्ध्यावन्दन गोदोहन अभिसरणाद्यनेक-विधत्वम्

तथा च वाच्यार्थः सर्वदा एक एव व्यङ्ग्यार्थस्तु प्रकरणादिवशादनेकार्थान् बोधयति यथा 'गतोस्तमर्कः' इत्यादौ व्यङ्ग्यार्थस्य सन्ध्यावन्दन-गोदोहन-अभिसरणाद्यनेकविधत्वम्। एवं काल-आश्रय-निमित्त-संज्ञा-कार्यादिषु वाच्यार्थव्यङ्ग्यार्थस्य भिन्नत्वं स्थितमेव। तथा च स्वरूपभेदेनापि वाच्यार्थात् व्यङ्ग्यार्थस्य भेदः। तत्र क्वचित् विधिरूपे वाच्ये सति व्यङ्ग्यार्थस्तु निषेधरूपः।

विधिनिषेधयोः सर्वात्मना विरुद्धविषयत्वात् तन्मुखेनैव प्रतीयमानस्य वाच्यात् विभिन्नत्वं निरूपणमस्ति।

### 2.2.2.1. वाच्यस्य विधिरूपत्वे प्रतीयमानस्य निषेधरूपत्वम्

**लोचनम्-**

**भ्रम धार्मिक! विस्रब्धः स शुनकोऽद्य मारितस्तेन।**

**गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन॥**

**अन्वयः -** हे धार्मिक! विस्रब्धः भ्रम गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन द्य सः शुनकः मारितः।

धार्मिक! विस्रब्धः = विश्वस्तः सन्, भ्रम = भ्रमणं कुरु सः शुनकः; गोदावरीनदीकूललतागहनवासिना = गोदावरीतीरकुञ्जनिवासिना दृप्तसिंहेन =गर्वितेन सिंहेन, मारितः = हतः।

अत्र पुष्पावचयार्थं स्वसङ्केतस्थानभूते गोदानदीकूलनिकुञ्जे यान्तमभिसरणविघ्नकारिणं कञ्चन धार्मिकं भीषयितुं कस्याश्चिद् अभिसारिण्याः स्वविनयं सूचयन्त्या उक्तिरियम्। हे धार्मिक! परश्रेयोविघातकत्वेन सापक्षे सम्बोधनं त्वं विस्रब्धः विश्वस्तः सन् भ्रम यथेच्छं विचर। स यद्भयाद् ग्रामे भ्रमणं त्यक्तमासीत् स शुनकः श्वा अद्य तेन प्रसिद्धेन गोनद्याः कच्छकुञ्जे जलप्रायदेशसम्बन्धिनि कुञ्जे वासिना दर्पयुक्तेन सिंहेन मारितः इति वाच्यार्थः। सिंहस्य दृप्तता नगरमागत्य हननात् तेनेत्यनेन मित्था मया नोच्यत इति व्यज्यते। इति काव्यप्रकाशस्य नागेश्वरी टीकायाम्।

### 2.2.2.2. वाच्ये प्रतिषेधरूपे प्रतीयमानस्य विधिरूपत्वम् यथा -

**लोचनम्-**

**श्वश्रूरत्र शेते (अथवा निमज्जति) अत्राहं दिवसकं प्रलोकय।**

**मा पथिक रात्र्यन्ध शय्यायामावयोः शयिष्ठाः॥**

**अन्वयः** - श्वश्रूः अत्र शेते, अथवा निमज्जति, अत्र अहं दिवसकं प्रलोकय रात्र्यन्ध पथिक आवयोः शय्यायां मा शयिष्ठाः।

कस्याश्चन प्रोषितभर्तृकायाः वचनमिदम्। हे रात्र्यन्ध! पथिक! श्वश्रूः अत्र निमज्जति (शेते) अहम् अत्र (शये)। दिवसकम् (अहनि) एव प्रलोकय (सम्यक् पश्य)। आवयोः शय्यायां मा निमङ्क्षसि (मा शायीहि) इति भावः।

वाच्यप्रतीयमानयोः भाव (निषेध) तदभाव (विधि) रूपत्वात् विरोधः स्फुट एव

अस्मिन् श्लोके 'मा निमक्ष्यसि' इति निषेधः। तेन निषेधेन 'सा तरुणी तस्य पथिकस्य भावमवगत्य तेन सह समागममङ्गीकरोति' इति भावेन निषेधाभावः प्रतीयते। वाच्यस्य निषेधरूपत्वं, प्रतीयमानस्य च निषेधाभावरूपः, न तु निमन्त्रणरूपः। वाच्यप्रतीयमानयोः भाव- (निषेध) तदभाव (विधि) रूपत्वात् विरोधः स्फुट एव।

### 2.2.2.3. वाच्ये विधिरूपे प्रतीयमानस्य अनुभयरूपत्वम् - यथा-

**लोचनम्-**

**व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि।**

**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत॥**

**अन्वयः -** व्रज मम एकस्या एव निःश्वासरोदितव्यानि भवन्तु, दाक्षिण्यहतस्य तव अपि तया विना (निःश्वासरोदितव्यानि) मा जनिषत।

कस्याश्चन खण्डितायाः नायिकायाः वचनमिदम्। "व्रज (गच्छ) निःश्वासरोदितव्यानि मम एकस्या एव भवन्तु। दाक्षिण्यहतस्य (दाक्षिण्येन पीड्यमानस्य) तव अपि तया विना मा जनिषत (न स्युः)।

वाच्यम् - विधिरूपम्
व्यङ्ग्यम् - अनुभयम्

नायिके अन्या समागमलिङ्गेषु ज्ञातेषु ईर्ष्यायुक्ता नायिका खण्डिता। "त्वं दक्षिणोऽसि। दाक्षिण्यहतोऽसि। अतः त्वं व्रज। निःश्वासाः रोदितव्यानि च अहम् एका एव अनुभवामि। किमर्थं तवापि" इति वदन्त्या अस्याः गाढमन्युरूपः अभिप्रायः विधिरूपः दृश्यते। अतः अत्र विधिः वाच्यः। किन्तु नात्र व्रजाभावरूपः प्रतीयते। नापि विध्यान्तररूपः निषेधाभावः। अतः वाच्यस्य विधिरूपत्वेऽपि प्रतीयमानस्य अनुभयरूपत्वम्।

### 2.2.2.4. वाच्ये प्रतिषेधरूपे प्रतीयमानस्य अनुभयरूपत्वम् - यथा -

**लोचनम्-**

**प्रार्थये तावत् प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमो निवहे।**

**अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे॥**

**अन्वयः -** मुखशशिज्योत्स्नाविलुप्ततमो निवहे प्रार्थये तावत् प्रसीद निवर्तस्व हताशे अन्यासामपि अभिसारिकाणां विघ्नं करोषि।

मुख-शशि-ज्योत्स्ना-विलुप्त-तमो-निवहे = मुख- चन्द्र-चन्द्रिकया-अपसारित-अन्धकारसमूहे; अन्यासाम् अभिसारिकाणाम् अपि; विघ्नं

करोषि = अन्तरायं जनयसि। अत्र श्लोके वाच्यस्य 'निवर्तस्व' इति विधिरूपत्वे प्रतीयमानस्य अनुभयरूपत्वम्। कथम्?

**अनुभयरूपत्वविवेकः**

नायिका नायकगृहं गता। नायके तदानीं सापराधे कुपिता सा ततः प्रतिगन्तुं व्यवसिता। ततः नायकः चाटुपक्रमपूर्वकं तां निवर्तयति। त्वं न केवलं स्वात्मनः मम च किन्तु अन्याभिसारिकाणामपि विघ्नं करोषि इति चाटुविशेषः वल्लभाभिप्रायरूपः प्रतीयते। अत्र चाटुः व्यङ्ग्यः।

वाच्य-प्रतीयमानौ निवर्तन-अनिवर्तन-रूपौ

अयमत्र सारः। अस्मिन् श्लोके वाच्य-प्रतीयमानौ निवर्तन-अनिवर्तन- रूपौ। किन्तु नायकः गृहगमनरूपं वा नायिकागृहगमनरूपं वा इति प्रतीयमानस्य अनुभयरूपत्वं, वाच्यस्य विधिरूपत्वेऽपि।

**2.2.2.5. वाच्याद् विभिन्नरूपत्वेन स्थितिः प्रतीयमानस्य -यथा -**

**लोचनम्-**

**कस्य वा न भवति रोषः दृष्ट्वा प्रियायाः सव्रणमधरम्।**

**सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्॥**

**अन्वयः-** प्रियायाः सव्रणमधरं दृष्ट्वा कस्य वा रोषः न भवति? सभ्रमरपद्माघ्राणशीले (षट्पदसहितकमलाघ्राणस्वभावे) वारितवामे (निवारितापि प्रतिकूले)इदानीं सहस्व।

अत्र अविनीतां कुतश्चित् खण्डिताधराम् अत एव वल्लभेन सरोषं तिरस्कृतां नायिकां प्रति 'सवल्लभः तत्र सविधे एव वर्तत' इति ज्ञात्वापि तम् अनवलोकमानाया इव कस्याश्चन सख्यः उक्तिरियम्। तस्याः नायिकायाः वचनीयत्वं परिहर्तुं प्रयत्नः अयं सख्याः।

सहस्व इति वाच्यम्। नायिकां प्रति भर्तारमुद्दिश्य 'तस्याः अपराधो नास्ती'ति आवेद्यमानं व्यङ्ग्यम्। इदानीं मया एवं रक्षिता। पुनः कदापि एवं न प्रवर्तनीयम् इति चौर्यकामुकं प्रति व्यङ्ग्यम्।

सहस्व इति वाच्यं नायिकां प्रति भर्तारमुद्दिश्य 'तस्याः अपराधो नास्ती'ति आवेद्यमानं व्यङ्ग्यम्

'भ्रम धार्मिक..' 'श्वश्रूरत्र निमज्जति..' इत्यादिषु प्रागुदाहृतेषु श्लोकेषु वाच्यव्यङ्ग्ययोः एक एव विषयः। अत्र 'कस्य वा....' इत्यादिश्लोके तु वाच्यं प्रति नायिका विषयः, व्यङ्ग्यं प्रति तु तद्वल्लभः, लोकाचौर्यकामुकः, तदस्य विदग्धाः इति विशेषः।

एवं प्रकाराः अन्ये च वाच्याद् विभेदिनः प्रतीयमानभेदाः सम्भवन्त्येव। एतत् दिन्मात्रं प्रदर्शितम् इति वृत्तिकारः वाच्यात् प्रतीयमानस्य भिन्नत्वम् सूचयित्वा उपसंहरति।

द्वितीयःअलङ्कारध्वनिः

द्वितीयस्य अलङ्कारध्वनेः वाच्याद् विभिन्नत्वम् अग्रे सप्रपञ्चं दर्शयिष्यते।

तृतीयः रसध्वनिः वाच्यात् भिन्न एवेति इदानीं निरूप्यमाणं अस्ति।

### 2.2.3. रसादिरूपः प्रतीयमानोऽर्थोऽपि वाच्याद् विभिन्न एव

ध्वनिप्रभेदेषु तृतीयस्य रसध्वनेः वाच्याद्विद्भिन्नविषयत्वं निरूपयति वृत्तिकारः यथा तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते; न तु साक्षात् शब्दव्यापारविषय इति वाच्याद् विभिन्न एव।

रसध्वनिः तृतीयः ध्वनिप्रभेदः अस्ति

अयं भावः। तृतीयः रसादिरूपः प्रतीयमानभेदः (ध्वनिभेदः) वाच्यसामर्थ्येन आक्षिप्त एव प्रकाशते (आस्वाद्यते) न तु शब्दव्यापार (अभिधा) विषयः। यदि अभिधाविषयत्वं (वाच्यत्वं) रसादीनामङ्गीक्रियते तर्हि तस्य द्वयी गतिः। १. वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्यात्। २. विभावादिप्रतिपादनमुखेन वा स्यात्।

तत्र प्रथमपक्षे यत्र यत्र रसादीनाम् स्वशब्दनिवेदितत्वं तत्र तत्र तेषां प्रतीतिः। यत्र यत्र तेषां स्वशब्दनिवेदितत्वाभावः तत्र तत्र तेषां (रसादीनाम्) अप्रतीतिः इति वक्तव्यं स्यात्। एतन्न समीचीनम्। यतः रसप्रतीतौ सत्यामपि सर्वत्र रसाधीना (स्वशब्दनिवेदितत्वस्थले) रसप्रतीतिः केवलम् अनूद्यते, न तु आस्वाद्यते। यतः श्रृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसप्रतीतिः अस्ति।

विभावादीनां स्पष्टप्रतिपादनम् एव रसप्रतीतेः कारणम्

द्वितीयक्षे यत्र यत्र विभावादिप्रतिपादनं तत्र तत्र रसप्रतीतिः, यत्र यत्र विभावादीनाम् अप्रतिपादनं तत्र तत्र रसस्य अप्रतीतिः इति वक्तव्यं भवति। इदं च सर्वात्मना सङ्गच्छते। विभावादीनां नाम्ना अभिधानाभावेऽपि तेभ्यः रसादीनां प्रतीतिः वक्ष्यते। स्वाभिधानाच्च अप्रतीतिः दृश्यते।

तस्मात् रसादीनां वाच्यसामर्थ्याक्षिप्तत्वमेव न तु कथञ्चिदपि अभिधेत्वमिति रसादिरूपः प्रतीयमानोऽर्थोऽपि वाच्याद् विभिन्न एव।

**2.2.4. रसादीनां व्यङ्ग्यत्वं स्फुटं प्रतिपादयति**

व्यञ्जनाशक्त्या रसादीनां प्रतिपत्तिः स्फुटं प्रदर्श्यते

रसादयस्तु रसभाव - रसाभास - भावाभास - भावशान्ति - भावोदय - भावसन्धि - भावशबलताः। ते रसादयस्तु कदापि वाच्या न भवन्तीति ध्वनिकाराः। तस्यार्थः रसादीनां प्रतीतिः तु कदापि अभिधाशक्त्या न भवति। शक्तयस्तु अभिधा-लक्षणा-तात्पर्या-व्यञ्जनाः। तत्र रसादीनां प्रतीतिः नैवाभिधामुखेन न च व्यञ्जनातात्पर्येऽत्र समर्थौ भवतः।

**2.2.5. प्रतीयमनस्य काव्यात्मत्वनिरूपणम्**

वस्त्वलङ्काररसरूपस्य त्रिप्रकारस्यापि प्रतीयमानस्य वाच्याद् विभिन्नत्वं दर्शयित्वा तत्रापि रसस्यैव प्राधान्यात् रसभावमुखेनैव तस्य काव्यात्मत्वं निरूपयन् वदति ध्वनिकारः।

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**

**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ ५॥**

वाल्मीकेः काव्ये करुणरसः प्रतीयते

**अन्वयः-** काव्यस्य आत्मा सः अर्थः तथा एव पुरा आदिकवेः क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वम् आगतः।

सः अर्थ एव ध्वन्यमानः रसरूपः अर्थ एव, काव्यस्य आत्मा, तथा च = तेनैव प्रकारेण, पुरा = पूर्वम्, क्रौञ्चद्वन्द्ववियोगोत्थः = क्रौञ्चपक्षिद्वन्द्ववियोगेन सञ्जातः, शोकः, श्लोकत्वम्, आगतः = प्राप्तः।

ध्वन्यालोककारेण रसात्मा अर्थ एव काव्यस्य आत्मा इत्युक्तम्

प्रतीयमानः रसरूपः अर्थ एव काव्यात्मा। तेन प्रकारेण एव पूर्वम् (प्राचीनकाले) आदिकवेः वाल्मीकेः क्रौञ्चद्वन्द्ववियोगजातः शोक एव श्लोकतया परिणतः।

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समाः।**

**यत्क्रौञ्चमिथुनादेकमवधीः काममोहिताम्॥**

**अन्वयः** - हे निषाद, त्वं शाश्वतीस्समाः प्रतिष्ठां मा अगमः यत् क्रौञ्चमिथुनात् काममोहितम् एकं अवधीः।

अत्र शोकः स्थायीभावः दृश्यते, स एव करुणरसतां प्राप्तः

शोकः करुणरसस्य स्थायीभावः। स एव अत्र प्रतीयते। अयं भावः। क्रौञ्चस्य सहचरीमरणकारणेन द्वन्द्ववियोगः जातः। तेन उत्थितः शोकः स्थायीभावः। स स्थायी विप्रलम्भश्रृङ्गारानुगुणा न भवति, प्रत्याशायाः अभावात् सः शोकः वाल्मीकिमहर्षौ करुणरसतां प्रतिपन्नः। अत्र वाल्मीकिगतस्य करुणरसस्य विभावः सहचरीविहीनः क्रौञ्चः। तदीयानि आक्रन्दनादीनि अनुभावः। तदनुभावचर्वणया हृदयसंवाद-तन्मयीभावसहृयकारेण आस्वास्यमानतां नीतः शोकः एव करुणः।

"काव्यस्यात्मा" इत्यादिश्लोकेन प्रतीयमानस्य इतिहासमुखेन काव्यात्मतां प्रदर्श्य, तस्य स्वसंवित्तिसिद्धत्वमपि निरूपयितुमुपक्रमते ध्वनिकारः यथा-

"सरस्वती" इत्यनेन वाणी वा कविप्रज्ञा उच्यते

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**

**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥ ६॥**

‘अलोकसामान्यम्’ इत्यनेन लोकातीतं, सामान्यबुद्ध्यगम्यं न भवति इत्यर्थः

**अन्वयः -** स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनां सरस्वती अलोकसामान्यं परिस्फुरन्तं प्रतिभाविशेषं अभिव्यनक्ति।

स्वादु = मधुरम्; तदर्थवस्तु = शब्दार्थसम्बन्धिनीवस्तु, निःष्यन्दमाना = प्रवहमाना; कवीनाम्, सरस्वती = वाक्; अलोकसामान्यम् = लोकातीतम् (अत एव) परिस्फुरन्तम् = सर्वतः, प्रकाशमानम्; प्रतिभाविशेषम् = नवनवोन्मेषशालिनीं प्रतिभाम्; अभिव्यनक्ति = प्रकटीकरोति।

यः प्रतिभाया विशेषः कवित्वस्य कारणं भवति

ध्वन्यालोकः - महाकवीनां सरस्वती वाणी या नवनवोन्मेषशालि-प्रज्ञाविशेषप्रस्फुटं आत्मतत्त्वविशेषं तदेव साधारणीकरणव्यापारद्वारा सहृदयान् 'ममैवेते शत्रोरेवैते न ममैवेते न शत्रोरेवैते' इत्येवंरूपेण विशेषेण चमत्कुर्वन् अलौकिकमेवानन्दं वितरति। तदेवोच्यते महाकवीनां वाणी निःष्यन्दमाना आलोकसामान्यमभिव्यनक्ति इति।

### 2.2.5.1. प्रतिभावैशिष्ट्यम् -

**तत् वस्तुतत्त्वं निःष्यन्दमाना महतां कवीनां भारती अलोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति। येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।**

प्रतिभा स्वरूपं - प्रतिभा अपूर्ववस्तुनिर्माणक्षम प्रज्ञा भवति

प्रतिभाविशेषस्य स्वरूपमिदम्। अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा प्रतिभा भवति। तस्याः विशेषस्तु काव्यनिर्माणक्षमत्वम्। तस्मिन् सति एव रसावेशवैशद्यसौन्दर्यस्य अभिव्यक्तिः।

वस्तुनिर्माणमात्रेण कवित्वसिद्धिः न भवति। वस्तुनि अपूर्वत्वं साधनीयम्। कथायां प्राचीनायामपि कथने नूतनत्वं साधनीयम्। भावस्य प्राचीनत्वेऽपि भावप्रकटने अपूर्वत्वं सम्पादनीयम्। चतुर्थे उद्योते ध्वनिकार एव एतान् विशेषान् दर्शयिष्यति।

### 2.2.5.2. कालिदासप्रभृतयः-

अयं संसारः अतिविचित्रः। कविपरम्परावाही काव्यशब्द-वाच्यानि वा विरच्य लोके कवयः कति गताः? परिसंख्यातुमपि न शक्यते। तर्हि कालिदासप्रभृतीनां द्वित्राणां पञ्चषां वा महाकवित्वगणने किं प्रमाणम्? इति प्रश्ने अलोकसामान्यप्रतिभापरिस्फुरणमेव तत्र हेतुः

समग्रे निर्दोषे च कारयित्र्यां प्रतिभायां तथा व्युत्पत्तौ च स्थितायां कवित्वलाभः संभवति

सर्वेषामपि कवीनां शब्दाः व्याकरणादिशास्त्रसिद्धाः समाना एव, अर्थाश्च निघण्टुसम्पादिताः, लोकसिद्धा वा समाना एव। लोको वा लोकवृत्तं वा समानमेव। तथापि प्रतिभा भिन्ना भवति। ततोऽपि भिन्ना भवति कारयित्री प्रतिभा। एषा एव मान्यान्, कवींश्च सामान्यापेक्षया पृथक्करोति। अत एव कविपरम्परावाहिनि संसारे कालिदासप्रभृतीनां द्वित्राणां पञ्चषां वा महाकवित्वगणना।

### 2.2.6. प्रतीयमानस्य (व्यङ्ग्यस्य) एव प्राधान्यम्

"एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्य सद्भावं प्रतिपाद्य, प्राधान्यं तस्यैव इति दर्शयति -

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**

**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ ८॥**

**अन्वयः** - सः अर्थः तद्व्यक्तिसामर्थ्ययोगी कश्चन शब्दः च महाकवेः तौ शब्दार्थौ यत्नतः प्रत्यभिज्ञेयौ।

सः अर्थः = सः व्यङ्ग्यः अर्थः, तद्व्यक्तिसामर्थ्ययोगी = तद्व्यञ्जनसामर्थ्यसहितः, कश्चन शब्दश्च, तौ = शब्दार्थौ, महाकवेः यत्नतः = सप्रयत्नं, प्रत्यभिज्ञेयौ = लक्षणीयौ।

महाकविना व्यङ्ग्यं तस्य व्यञ्जकशब्दं च यत्नतः प्रत्यभिज्ञेयम्

स प्रतीयमानार्थः तदभिव्यक्तिसमर्थः शब्दश्च द्वावेव महाकविना सम्यक् प्रत्यभिज्ञेयौ इति। कः शब्दः कमर्थमभिव्यञ्जयति इति महाकविना युक्त्या ज्ञातव्यमिति।

**व्यङ्ग्यः अर्थः, तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन न शब्दमात्रम्। तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ।** अयमर्थः कारिकायाः -

आदौ व्यङ्ग्यः अर्थः यत्नतः महाकविना लक्षणीयः। तदर्थवाचकसामर्थ्यापेक्षया तदर्थ व्यञ्जकसामर्थ्यं शब्दे स्यात्। तादृशः शब्दोऽपि कविना यत्नतः ज्ञेय एव। महाकविना व्यङ्ग्यव्यञ्जकौ शब्दार्थौ यत्नतः प्रत्यभिज्ञेयौ। व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवीनां महाकवित्वलाभः। वाच्यवाचकरचनामात्रेण महाकवित्वं न सिद्ध्यति।

### 2.2.7. ध्वनिशब्दस्य अर्थत्रैविध्यम्

ध्वनिशब्दस्य त्रयः व्युत्पत्तयः

व्यङ्ग्यस्य अर्थस्य, व्यञ्जकस्य शब्दस्य च प्राधान्यमिति कथनेन व्यङ्ग्यव्यञ्जकभावस्यापि प्राधान्यमुक्तमेव। अतः ध्वनिशब्दस्य ध्वनयति इति ध्वनिः, इति व्युत्पत्या शब्दः अर्थः। ध्वन्यत इति ध्वनिः इति व्युत्पत्तया अर्थः। ध्वननं ध्वनिः इति व्युत्पत्त्या व्यञ्जनाव्यापारः अर्थः।

### 2.2.8. वाच्येन व्यङ्ग्यार्थसम्बन्धम्

इदानीं व्यङ्ग्यव्यञ्जकयोः प्राधान्येऽपि वाच्यवाचकावेव प्रथममुपाददते कवयः तदपि युक्तमेव इत्याह--

**आलोकार्थी यथा दीपशिखायां यत्नवान् जनः।**

**तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥९॥**

आलोकार्थी जनः दीपशिखायां यत्नं करोति, तथैव व्यङ्ग्यार्थलाभाय कविः वाच्यार्थे यत्नं करोति

आलोकार्थी = कान्त्यभिलाषी, जनः, तदुपायतया = तस्य आलोकस्य प्राप्तौ उपायतया; दीपशिखायाम् = दीपशिखायाम्(दीपज्वालायाम्); यत्नवान् (भवति), तद्वत्; तत् + आदृतः = तस्मिन् व्यङ्ग्यार्थे आदरबुद्धिः कविः, तत् + उपायतया = तस्य व्ङ्ग्यार्थस्य प्राप्तौ उपायतया; वाच्यार्थे, यत्नवान् भवति।

आलोकस्य ('आलोकनमालोकः वनितावदनारविन्दविलोकनमित्यर्थः' इत्यभिनवगुप्तपादाः) आकाङ्क्षी पुरुषः यथा उपायरूपत्वात् दीप-

शिखायो यत्नवान् भवति तथैव व्यङ्ग्यार्थं प्रति आदरवतः कवेः वाच्यार्थं प्रति आदरः स्यात्।

वाच्यार्थे सप्रयत्नत्वं कवौ दर्शयति वृत्तिकारः। अतः वस्तु-प्रतिपादकस्य कवेरपि व्यङ्ग्यार्थं प्रति व्यापारः दर्शितः।

**यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।**

**वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः॥ १०।।**

**अन्वयः** - यथा पदार्थद्वारेण वाच्यार्थः सम्प्रतीयते तद्वत् प्रतिपत् तस्य वस्तुनः वाच्यार्थपूर्विका।

व्यङ्ग्यार्थस्य प्रतिपत्तिः वाच्यार्थपूर्विका इति उक्तम्

वाक्यार्थः यथा पदार्थद्वारेण ज्ञायते, तद्वत् तस्य वस्तुनः (व्यङ्ग्यस्य अर्थस्य) अपि प्रतिपत् (ज्ञानम्) वाच्यार्थज्ञानपूर्वकत्वमेव। अर्थात् वाच्यार्थपूर्विका एव व्यङ्ग्यर्थस्यापि प्रतिपत्तिः।

अत्यन्तसहृदयः न सन् वाच्यार्थप्रतीतिम् पूर्वं, तदनन्तरं व्यङ्ग्यार्थप्रतीतिं अनुभवति

अत्यन्तशब्दवृत्तिज्ञानरहितस्य श्लोकावगमने आदौ पदार्थज्ञानं पश्चाच्च वाक्यार्थज्ञानमिति क्रमः स्फुटं लक्ष्यते। शब्दवृत्तिज्ञाने सति सः क्रमः सन्नपि न लक्ष्यते। तद्वत् यः अत्यन्तसहृदयः न भवति तस्य आदौ वाच्यार्थप्रतीतिः, तदनन्तरञ्च व्यङ्ग्यार्थप्रतीतिरिति क्रमः स्फुट एव लक्ष्यते। सहृदयभावे पराकाष्ठाङ्गते सति वाच्यव्यङ्ग्ययोः मध्ये क्रमे विद्यमानेऽपि न लक्ष्यते। सम्यगभ्यस्तस्य व्याप्तिस्मृतेः अनुमितेः च मध्ये विद्यमानेऽपि क्रमे न लक्ष्यते यथा तथा अत्राऽपि।

### 2.2.9. प्रतीयमान (व्यङ्ग्य) एव प्रधानः

व्यङ्ग्यार्थप्रतीतेः वाच्यार्थप्रतीतिपूर्वकत्वेऽपि प्राधान्यं पुनः व्यङ्ग्यस्य अर्थस्य एव न तु वाच्यस्य। व्यङ्ग्यार्थं प्राधान्यं यथा न व्यालुप्यते तथा दर्शयति ध्वनिकारः -

**स्वसा।।११।।मर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।**

**यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते।।११।।**

**तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्**

**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते॥ १२।।**

स्वसामर्थ्यवशेन + एव स्वीयसामर्थ्यशक्त्या एव, वाक्यार्थम् प्रतिपादयन् पदार्थः व्यापारनिष्पत्तौ यथा न विभाव्यते तद्वत् सः अर्थः (प्रतीयमानार्थः); वाच्यार्थं विमुखात्मानाम् = वाच्यार्थे अनासक्तानाम् ; सहृदयानाम्; तत्त्वार्थदर्शिन्यां बुद्धौ, झटित्येव = वाक्यश्रवणानन्तरमेव; अवभासते।

वाच्यार्थे विमुखात्मनाम् सहृदयानां मनसि व्यङ्ग्यार्थः झटित्येव स्फुरति

पदार्थः स्वसामर्थ्यवशेन वाक्यार्थं प्रकाशयन्नपि, व्यापारनिष्पत्तौ विभक्ततया न भाव्यते। क्रमे विद्यमानेऽपि न संवेद्यते। तद्वत् वाच्यार्थे अनासक्तानां सहृदयानां मनस्तु झटिति अवभासते व्यङ्ग्यार्थः। तत्र वाच्यार्थः अपि भासत एव। अपि तु विभक्ततया न भासते। सर्वथा वाच्यस्य अनवभासः इति वक्तुं न शक्यते। व्यग्यप्रतीतिकालेऽपि वाच्यप्रतीतिः न घटते इति भविष्यति तृतीये उद्योते दर्शयिष्यति ध्वनिकारः।

## Summarised Overview

ध्वनिकारः ग्रन्थस्य आरम्भे प्रतीयमानार्थं स्थापयितुमिच्छति। ध्वनिकारस्य मते सहृदयैः श्लाघ्यः यः अर्थः, स एव काव्यस्य आत्मा इति व्यवस्थितः। 'सहृदयश्लाघ्यः' इत्यस्य अर्थः-सहृदयैः प्रशंसनीयः इत्यर्थः। वाच्यप्रतीयमानयोः उभयोः अपि निर्विवादप्राधान्यं दर्शितम्।

प्रतीयमानस्य स्वरूपं सः प्रतिपादयति यत् महाकवीनां वाणीषु कश्चन अर्थः वाच्यार्थात् भिन्नः प्रतीयते, स एव प्रतीयमानः इति। सः अर्थः स्पष्टतया न उक्तः, किन्तु सहृदयहृदयेषु अनुभूयते। यथा अङ्गनायाः मुखे अधरनासिकादयः प्रसिद्धावयवाः भवन्ति, किन्तु तदतिरिक्तं यत् सौन्दर्यं लावण्यमिव भाति, तत् हृदयस्पर्शि भवति। प्रतीयमानः अर्थः केवलं वस्तुरूपः न, अलङ्काररूपः, रसरूपोऽपि भवति। सर्वेष्वपि तेषु प्रभेदेषु प्रतीयमानस्य वाच्यात् विभिन्नत्वमेव। रसरूपः प्रतीयमानार्थः स्वप्नेऽपि स्वशब्दवाच्यः न भवति। वस्तुमात्रस्य ध्वनेः वाच्यात् दूरतः विभिन्नत्वं भवति तन्निरूपयति वृत्तिकारः। वस्तुरूपस्तु विधिप्रतिषेधोभयानुभयरूपत्वात् पञ्चविधः। तद्यथा - विधिरूपे वाच्ये प्रतिषेधरूपः,

प्रतिषेधरूपे वाच्ये विधिरूपः, विधरूपे वाच्ये अनुभयरूपः, वाच्ये प्रतिषेधरूपे अनुभयरूपः, तथा च वाच्याद्भिन्नरूपे व्यवस्थित इति।

रसध्वनिः तृतीयः ध्वनिप्रभेदः अस्ति, यः केवलं वाच्येन प्रत्यक्षतया न अभिव्यक्तः, किन्तु वाच्यसामर्थ्येन आक्षिप्तः अर्थः भवति। रसः श्रृङ्गारादिशब्दप्रयोगे न तु स्वयमेव आस्वाद्यते, अपि तु विभावादिव्यवस्थया सन्तोषपूर्वकं ग्राह्यते।

ध्वनिकाराः मन्यन्ते यत् रसादयः - यथा रसः, भावः, रसाभासः, भावाभासः, शान्तिः, भावोदयः, भावसन्धिः, भावशबलता च - एते न कदापि वाच्याः भवन्ति। तेषां प्रतिपत्तिः न अभिधया, न लक्षणया, न तात्पर्येण, किन्तु केवलं व्यञ्जनाशक्त्या एव स्फुटं भवति। रसादीनां परोक्षप्रतीतिः शब्दस्य व्यञ्जनाशक्त्या सम्पद्यते इत्येतत् ध्वनिकारमतस्य सारः।

ध्वनिकारः प्रतिपादयति यत् वस्तु, अलङ्कार, रस इत्येते त्रयः अपि यदि प्रतीयमानरूपेण सन्ति, तर्हि रसस्यैव प्राधान्यं स्यात्। रसः प्रतीयमानो भवति चेत् सः एव काव्यस्य आत्मा भवति। उदाहरणरूपेण वाल्मीकेः "मा निषाद" इत्यत्र करुणरसः अप्रत्यक्षतया व्यञ्जनया प्रतीयते, सः एव काव्यात्मा इति। अतः काव्ये रसप्रतीतिः एव प्रधानः तत्वं भवति। 'प्रतिभा' शब्दस्य विशेषता- प्रतिभा अपूर्ववस्तुनिर्माणक्षमप्रज्ञा भवति। सा सामान्यशब्दार्थेषु विशेषं सौन्दर्यम् उत्पादयति। व्यङ्ग्यस्य प्राधान्यं तेन प्रतिपाद्यते यः अर्थः प्रत्यक्षतया न दृश्यते, किन्तु शब्दस्य सामर्थ्येन लक्ष्यमाणः भवति। स एव 'प्रतीयमानः' अर्थः भवति। तस्यैव कवित्वे मुख्यं स्थानम्। महाकवित्वे व्यङ्ग्यार्थः अत्यन्तं महत्वपूर्णः अस्ति।

व्यङ्ग्यार्थबोधे वाच्यार्थस्य स्थानं अत्यन्तं आवश्यकम्। वाक्यार्थः यथा पदार्थद्वारेण बोध्यते, तथैव व्यङ्ग्यार्थः अपि वाच्यार्थज्ञानपूर्वकः बोध्यते। सहृदयः यदि अत्यन्तसंवेदनशीलः न भवति, तर्हि तस्मिन् क्रमः स्पष्टतया दृश्यते - प्रथमं वाच्यार्थबोधः, ततः व्यङ्ग्यार्थबोधः। परंतु अभ्यासेन वा भावसंपत्त्या वा सहृदयभावे परिपक्के सति सः क्रमः न अनुभूयते। अतः वाच्यार्थः व्यङ्ग्यार्थस्य बोधनस्य अनिवार्यं साधनं भवति।

ध्वन्यालङ्कारशास्त्रे स्पष्टतया प्रतिपाद्यते यत् प्रतीयमानः अर्थः - व्यङ्ग्यार्थः - एव काव्यस्य आत्मा। यद्यपि व्यङ्ग्यार्थः वाच्यार्थप्रतीतेः अनन्तरं ज्ञायते, तथापि तस्यैव प्राधान्यमस्ति। तत्त्वार्थदर्शिनां

सहृदयानां बुद्धौ व्यङ्ग्यार्थः झटित्येव स्फुरति। पदार्थस्य यथा व्यापारनिष्पत्तौ भिन्नतया अनुभवः न स्यात्, तथैव वाच्यार्थोऽपि सहृदयेन व्यङ्ग्यार्थोपलम्भे निमित्तमात्रतया गृह्यते। एतस्मात् कारणात्, ध्वनिकारः व्यङ्ग्यार्थस्य प्राधान्यं पुनः पुनः प्रतिपादयति।

## Assignments

**I. उत्तरं लिखत।**

1. ध्वनिकारस्य मतानुसारं कः अर्थः काव्यस्य आत्मा इति व्यवस्थितः ?
2. वाच्यप्रतीयमानयोः कीदृशं प्राधान्यं दर्शितम् ?
3. प्रतीयमानं कथं भवतीति प्रतिपादयत ?
4. प्रतीयमानं वस्तु कासां, किमिव विभाति ?
5. प्रतीयमानार्थस्य के त्रयः मुख्यः प्रकाराः सन्ति?
6. रसरूपः प्रतीयमानार्थः कीदृशः अस्ति?
7. वस्तुध्वनि: कति प्रकारः भवति?
8. 'गतोऽस्तमर्कः' इत्यत्र व्यङ्ग्यार्थस्य बहुविधता कथं दृष्टा?
9. कस्मिन् पक्षे रसप्रतीतिः न तु आस्वाद्यते?
10. प्रतिभायाः स्वरूपं किम्?
11. व्यङ्ग्यस्य प्राधान्यं कथं प्रतिपाद्यते?

**II. टिप्पणिं लिखत।**

1. योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।
   वाच्यप्रतीयमानाख्यो तस्य भेदावुभौ स्मृतौ ॥ इति कारिकां विप्रतिपत्तिनिरासपूर्वकं व्याख्यात।
2. प्रतीयमानस्य वाच्यात् विभिन्नत्वं कथं प्रतिपाद्यते? विवेचयत।
3. वस्तुध्वनेः वाच्यात् विभिन्नत्वं वृत्तिकारस्य मतानुसारं कथं प्रतिपाद्यते? विवेचयत।
4. "रसध्वनिः वाच्याद् विभिन्नः" इत्यस्य व्याख्यां कुरुत।
5. प्रतीयमानार्थस्याह्लादकत्वे सहृदया एव प्रमाणरूपा इति व्याख्यायताम् ?

6. सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।

   यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः।। इति कारिकां व्याख्यात।

7. काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।

   क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ इति कारिकां व्याख्यात।

8. रसादीनां व्यङ्ग्यत्वं स्फुटं प्रपाद्यताम् ?

9. वाल्मीकिकाव्ये 'प्रतीयमानस्य' स्वरूपं कथं दृश्यते?

10. 'प्रतिभा' शब्दस्य विशेषता कथं कवित्वे प्रकाशते?

11. व्यङ्ग्यार्थबोधे वाच्यार्थस्य स्थानं किम्?

12. वाच्यार्थे अनासक्तानां मनसि व्यङ्ग्यार्थस्य झटित्यवभासः कथं घटते?

**III. निबन्धात्मप्रश्नानाम् उत्तरं लिखत।**

1. "वाच्यस्य विधिरूपत्वे प्रतीयमानस्य निषेधरूपत्वम्" तथा "वाच्यस्य निषेधरूपत्वे प्रतीयमानस्य विधिरूपत्वम्" - इत्यस्य उदाहरणसहितं वर्णनं कुरुत।
2. महाकवीनां वाणीषु यदाह्लादकत्वं तत्तु प्रतीयमानार्थवशादेव इति ध्वन्यालोकानुसारं प्रतिपादयति।
3. प्रतीयमानार्थेन वाच्यवाचकयोः सम्बन्धं ध्वन्यालोकमतानुसारं प्रतिपादयति।
4. व्यङ्ग्यार्थस्य प्राधान्यं कथं ध्वन्यालङ्कारशास्त्रे उपपाद्यते?

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015
2. Dhvanyaloka with Alacanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
3. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, Harvard University Press, Cambridge, London, 1990,
4. History of Sanskrit Poetics, P.V.Kane, Motilal Banarsidass, New Delhi, 1987

5. Dhvanyaloka, Ed.C.M.Neelakanthan, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968.

# References

1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९०।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. ध्वन्यालोकप्रकाशिका, श्राराजेन्द्रप्रसादः कोठ्यारी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# ध्वनिलक्षणकारिकानिरूपणम्

## Learning Outcomes

- ध्वनिलक्षणं सुस्पष्टम् अवगच्छति।
- ध्वन्यलङ्कारयोर्मध्ये भेदः सुस्पष्टं ज्ञायते।
- ध्वन्यभाववादीनां मते निस्सारत्वम् आमनन्ति।
- ध्वनिः अलङ्कारे नान्तर्भवतीति सप्रमाणमवगच्छन्ति।

## Background

वस्त्वलङ्काररसरूपस्य त्रिप्रकारस्यापि प्रतीयमानस्य वाच्याद् विभिन्नत्वं दर्शयित्वा तत्रापि रसस्यैव प्राधान्यात् रसभावमुखेनैव तस्य काव्यात्मत्वं निरूपयति। ध्वनिकारः प्रतिपादयति यत् वस्तु -अलङ्कार- रसाः इत्येते त्रयः अपि यदि प्रतीयमानरूपेण सन्ति, तर्हि रसस्यैव प्राधान्यं स्यात्। रसः प्रतीयमानो भवति चेत् सः एव काव्यस्य आत्मा भवति। प्रतिभा एव कवित्वस्य मूलः, व्यङ्ग्यस्य प्राधान्यं, वाच्यार्थः व्यङ्ग्यार्थस्य बोधनस्य अनिवार्यं भवति। व्यङ्ग्यार्थस्य प्राधान्यं च प्रतिपादितम्। अस्मिन् एकके ध्वनेः लक्षणं, तथैव स ध्वनिः अलङ्कारेषु नान्तर्भवतीत्यपि निरूप्यते।

## Keywords

SGOU

ध्वनिलक्षणं, त्रिविधान् ध्वन्यभाववादाः, उपसर्जनं, अनुप्रासादयः, चारुत्वहेतवः, सहृदयहृदयाह्लादकारि, कामनीयकमनतिवर्तमानस्य, वाच्यवाचकभावसम्बन्धिनः, अप्रधानीकृत-स्वस्वरूपः अर्थः, समासोक्तौ ध्वनेर्नान्तर्भावः, आक्षेपेऽपि ध्वनेः अन्तर्भावो न।

# Discussion

## 2.3.1. ध्वनिलक्षणम्

ग्रन्थारम्भे रचनाप्रयोजनं निर्दिशन् - 'तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्' इति यदुक्तं तदेव प्रतिज्ञापूर्तिहेतोः वाच्यार्थाद् भिन्नार्थस्यावश्यकतां निर्दिश्य सम्प्रति ध्वनेः स्वरूपं प्रतिपादयति -

व्यङ्ग्यस्य अर्थस्य वाच्यात् भिन्नत्वं सहेतुकं निरूप्य, तमेव प्रकृते ध्वनिलक्षणे उपयोजयन् ध्वनिकारः ध्वनिं लक्षयति। यथा-

ध्वनिलक्षणम्

लक्षणम्-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ।।१३।।**

**अन्वयः-** यत्र अर्थः शब्दः वा उपसर्जनीकृतस्वार्थौ तं अर्थं व्यङ्क्तः काव्यविशेषः सः ध्वनिः इति सूरिभिः कथितः।

यत्र = यस्मिन् काव्ये, अर्थः = अर्थः (वाच्यविशेषः) शब्दो वा शब्दः (वाचकविशेषः) वा; उपसर्जनीकृतस्वार्थौ = अप्रधानीकृत स्व = अर्थो, तम् अर्थम् = तं व्यङ्ग्यार्थं, व्यङ्क्तः = द्योतयतः; सः काव्यविशेषः ध्वनिरिति ; सूरिभिः विद्वद्भिः, कथितः = उक्तः।

'उपसर्जनीकृतस्वार्थौ' इत्युक्त्या दर्श्यते यत् शब्दः अथवा अर्थः स्वार्थं अप्रधानीकृत्य व्यङ्ग्यार्थं प्रकाशयति

स्वश्च अर्थश्च = स्वार्थौ, उपसर्जनीकृतौ (गुणीकृतौ) स्वार्थौ याभ्यां तौ = उपसर्जनीकृतस्वार्थौ। अर्थशब्दयोः विशेषणमिदम्। शब्दार्थावुभावपि क्रमशः स्वम्, अर्थञ्च उपसर्जनीकुरुतः। अर्थात् वाच्यविशेषः अर्थः स्वम् (आत्मानम्) उपसर्जनीकरोति (अप्रधानी-

करोति)। शब्दश्च स्वार्थमुपसर्जनीकरोति। अनेन अलङ्कारेषु ध्वनेः अन्तर्भावः निराक्रियते। यत्र गुणीकृतात्मा अर्थः (वाच्यो वा व्यङ्ग्यो वा) गुणीकृतस्वार्थः शब्दो वा। व्यङ्ग्यार्थं व्यक्तः सः काव्यविशेषः ध्वनिः इति।

### 2.3.2. ध्वन्यभाववादखण्डनम्

वृत्तिकारः त्रिविधान् ध्वन्यभाववादान् दर्शयामास

तत्र प्रथमः "काव्यस्मात्मा ध्वनिरिति..." इत्यादिश्लोके ग्रन्थारम्भे एव ध्वनिकारः तस्याभावं जगदुरपरे" इति ध्वन्यभाववादं निर्देशितवान्। वृत्तिकारः त्रिविधान् ध्वन्यभाववादान् दर्शयामास। 'अलङ्कार-गुण- वृत्ति-रीतिव्यतिरिक्तः ध्वनिर्नाम कः? इति। द्वितीयः "प्रसिद्धिप्रस्थानव्यतिरेकिणः काव्यप्रकाशकारस्य काव्यत्वहानेः ध्वनिर्नास्त्येव" इति। तृतीयः "ध्वनिर्नाम अपूर्वः कश्चित् न सम्भवति उक्तेषु चारुत्वहेतुषु एव तस्य अन्तर्भाव" इति। तान् वादान् खण्डयितुम् उद्युक्तो भवति वृत्तिकारः ध्वनिलक्षणप्रदर्शनानन्तरमेव।

#### 2.3.2.1. प्रथमाभाववादखण्डनम् -

**यत्रार्थो वाच्यविशेषः, वाचकविशेषः शब्दो वा तमर्थं व्यक्तः, स काव्यविशेषो ध्वनिरिति। अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्योऽनुप्रसादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्।**

वाच्यवाचकचारुत्व हेतुभ्यः उपमादिभ्यः अनुप्रासादिभ्यश्च विभक्त एव

तत्र प्रथमस्य ध्वन्यभाववादस्य खण्डनमिदम्। यथा "अनेन वाच्यवाचकचारुत्वहेतुभ्यः उपमादिभ्यः अनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्"।

प्रथमाभाववादे 'शब्दगतचारुत्वहेतवः अनुप्रासादयः। अर्थगताः उपमादयः सङ्घटनाधर्मः माधुर्यादयः वृत्तयः, रीतयश्च सन्ति। काव्यस्य शब्दार्थशरीररूपस्य शब्दार्थभिन्नाः चारुत्वहेतवः के भवन्ति ? इति स्पष्टम् खलु।

तत्समाधत्ते वृत्तिकारः। अनुप्रासादयः उपमादयो वा अलङ्काररूपाः। अनुप्रासादयः शाब्दिकाः। उपमादयस्तु आर्थिकाः।

सङ्घटना-रीति-वृत्तयोऽपि शब्दार्थधर्माः एव। अर्थात् वाच्यवाचक-चारुत्वहेतवः अलङ्कारादयः शब्दार्थसामग्रीविशेषाः। ध्वनिलक्षणे स्पष्टतः प्रतिपादितं यत् ध्वनिः अलङ्कारादिभ्यः भिन्न एव विषयः इति, व्यङ्ग्यव्यञ्जकभावसम्बन्धी इति च। वाचकः शब्दः, वाच्यः अर्थश्च अप्रधानीकृतस्वरूपौ व्यङ्ग्यार्थमभिव्यक्तः ध्वनौ। तस्मात् वाच्यवाचक- चारुत्वहेतुषु ध्वनेः अन्तर्भावः न भवति।

वाचकः शब्दः, वाच्यः अर्थश्च अप्रधानीकृतस्वरूपौ व्यङ्ग्यार्थमभि-व्यक्तः ध्वनौ

### 2.3.2.2. द्वितीयाभाववादखण्डनम्

**युदप्युक्तम्- 'प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यत्वहाने-र्ध्वनिर्नास्ति' इति, तदप्ययुक्तम्। यतो लक्षणकृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम्। ततोऽन्यच्चित्रमेवेति अग्रे दर्शयिष्यामः।**

"प्रसिद्धप्रस्थानातिरेकिणः ...." इत्यादिकं द्वितीयमभाववादं खण्डयन् वदति वृत्तिकारः "यतः लक्षणकृतामेव सकेवलं न प्रसिद्धः। लक्ष्ये तु परीक्ष्यमाणे स एव काव्यतत्त्वम्, ततोऽन्यच्चित्रमेवेति दर्शयिष्यामः"।

प्रसिद्धप्रस्थानातिक्रमिणः मार्गस्य काव्यत्वहानिर्भवति ध्वन्यङ्गीकारे इति खलु पूर्वपक्षिणः शङ्का, ध्वनिमार्गानुयायिभिः (बुधैः तस्य समाम्नातपूर्वत्वं प्रागेव प्रतिपादितम्) अङ्गीकरणमात्रेण स प्रसिद्धः इति न, लक्ष्ये तु परीक्ष्यमाणे तस्यैव दर्शनात्। अप्रसिद्धत्वात् लक्ष्ये ध्वनिः नास्तीत्यपि वक्तुं न शक्यते। असिद्धात् हेतोः तस्यापि हेत्वाभासत्वात्। सहृदयैः लक्ष्ये परीक्ष्यमाणे सहृदयहृदयानन्दकल्पकं काव्यतत्त्वं ध्वनिरूपमेव इति दृश्यमानत्वात्। अत एव ध्वनिभिन्नं काव्यं चित्र (काव्य) मेव इति अग्रे दर्शयिष्यति ध्वनिकारः।

सहृदयहृदयानन्द-कल्पकं काव्यतत्त्वं

### 2.3.2.3. तृतीयाभाववादखण्डम्

**यदप्युक्तम्- 'कामनीयकमनतिवर्तमानस्य तस्य उक्तालङ्कारादि-प्रकारेष्वन्तर्भाव' इति तदप्यसमीचिनम्, वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यंग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः,**

**वाच्यवाचकचारुत्वहेतवो हि तस्यांगभूताः, स तु अंगिरूप एवेति प्रतिपादयिष्यमाणत्वात्।**

कामनीयकमनति-वर्तमानस्य तस्य उक्तालङ्कारेषु अन्तर्भवः

"कामनीयकमनतिवर्तमानस्य तस्य उक्तालङ्कारेषु अन्तर्भावः" इति तृतीयाभाववादोऽपि असमीचीना एव।

अलङ्काराः उक्तिवैचित्र्यरूपाः। रसादिभिन्न-व्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या चमत्कृतिजनकतावच्छेदकता तदाश्रयत्व-मलङ्कारत्वम्। अतः अभिधाव्यापारमात्रमाश्रयन्ते अलङ्काराः। अत एव वाच्यवाचकसम्बन्धिनः। ध्वनिः पुनः व्यङ्ग्य-व्यञ्जकसमाश्रयः। वाचकचारुत्वहेतवः अर्थालङ्काराः वाचकचारुत्वहेतवः शब्दालङ्काराश्च, तस्य ध्वनेः अङ्गभूताः ध्वनिस्तु अङ्गी। अङ्गाङ्गिनोः कथमैक्यसिद्धिः ?

त्रिप्रकाराः अपि ध्वन्यभाववादाः वाच्यवाचकभावाश्रयिणः। शब्दार्थप्रधानवादाः। भामहादीनाम् आलङ्कारिकाणां मार्गमनुसृत्य प्रस्थिताः। त्रिविधानपि एतान् अभिप्रायान् पृथक् पृथक् निराकृत्य अन्ततः तदन्तस्सूत्रं परिकरश्लोकेन वदति वृत्तिकारः-

**व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धतया ध्वनेः।**

**वाच्यवाचकचारुत्वहेत्वन्तः पातिता कुतः॥**

अयं भावः। ध्वनेः व्यङ्ग्य-व्यञ्जकभावसम्बन्धेन निर्माणात्, वाच्यवाचकचारुत्वहेतुषु अलङ्कारेषु तस्य अन्तर्भावः कथं भवति ?

### 2.3.3. समासोक्तौ ध्वनेरन्तर्भावनिषेधः

अलङ्काराः वाच्यवाचकभाव-सम्बन्धिनः

अलङ्काराः वाच्यवाचकभावसम्बन्धिनः, तच्चारुत्वहेतवश्च। ध्वनिस्तु व्यङ्ग्य-व्यञ्जकभावसम्बन्धी। तत्कथमलङ्कारेषु ध्वनेरन्त-र्भावः? इति सिद्धान्तीकृतम्। अत्र पूर्वपक्षी पुनराशङ्कते इत्थम् -

अलङ्कारेषु अपि सर्वेषु प्रतीयमानस्य अर्थस्य प्रतीतिः भवत्येव, किन्तु क्वचित् वैशद्येन क्वचित् च अवैशद्येन। वैशद्यं नाम स्फुटता, चारुता वा। अतः यत्र अलङ्कारे प्रतीतस्य व्यङ्ग्यार्थस्य स्फुटता, चारुता वा नास्ति, सः अलङ्कारः ध्वनेः विषयः न भवति। तस्मिन् अलङ्कारे

ध्वनेरन्तर्भावः वक्तुं न शक्यत इति अङ्गीक्रियताम्। किन्तु सन्ति केचित् अलङ्काराः, यत्र प्रतीयमानस्य अर्थस्य चारुता स्पष्टता वा अस्ति। समासोक्तिः, आक्षेपः, अनुक्तनिमित्तिविशेषोक्तिः, पर्यायोक्तिः, अपह्नुतिः, दीपकम्, सङ्करालङ्कारः इत्यादयः ते अलङ्काराः। तेषु ध्वनेः कुतः न अन्तर्भावः इति पूर्वपक्षिणः अभिप्रायः।

अत्र समाधानम्-

"उपसर्जनीकृतस्वार्थौ" इति ध्वनिलक्षणे अप्रधानीकृत-स्वस्वरूपः अर्थः

"उपसर्जनीकृतस्वार्थौ"- इति ध्वनिलक्षणे अप्रधानीकृत-स्वस्वरूपः अर्थः, अप्रधानीकृतस्वार्थः, शब्दो वा अर्थान्तरं यत्र व्यक्तः स ध्वनिरिति उक्तम्। अलङ्कारेषु पुनः शब्दार्थयोः एव प्राधान्यम्। वाचकस्य शब्दस्य वा शब्दालङ्कारे, वाच्यस्य अर्थस्य वा अर्थालङ्कारे अप्राधान्यं न किन्तु प्राधान्यमेव। अतः ध्वनेः अलङ्कारेषु अन्तर्भावो न भवति।

समासोक्त्यादिषु अलङ्कारेषु व्यङ्ग्यस्य प्राधान्यं न भवति

व्यङ्ग्यस्य प्राधान्ये एव ध्वनिः। समासोक्त्यादिषु अलङ्कारेषु व्यङ्ग्यस्य प्राधान्यं न भवति। व्यङ्ग्योऽर्थः वस्तुरूपः तत्र भवत्येव, किन्तु तस्य प्राधान्यं नास्ति। गुणीभूतः सः व्यङ्ग्यः अर्थः वाच्यमेव अनुप्राणायन् तिष्ठति। वाच्योपकरणत्वादेव तस्य अलङ्कारता। तद्व्यङ्ग्यच्छायोपस्कृतात् वाच्यादेव चमत्कारसिद्धिः। अतः सत्यपि व्यङ्ग्ये तस्य प्राधान्यं न समासोक्त्यादिषु।

तथाहि - समासोक्तौ व्यङ्ग्यप्राधान्यतिरस्करणम् -

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**

**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥**

चन्द्रोदयवर्णनम्

**अन्वयः** - उपोढरागेण शशिना विलोलतारकं प्रियामुखं तथा गृहीतं, यथा समस्तं तिमिरांशुकं पुरोऽपि गलितं रागाद् तया न लक्षितम्।

उपोढरगेण = सन्ध्यारक्तवर्णेन शशिना = चन्द्रेण; विलोलतारकम् = चञ्चलनक्षत्रम्, निशामुखम् = निशायाः (रात्र्याः) मुखम्; तथा = तादृशेन प्रकारेण, गृहीतम् = स्वीकृतम्, यथा =

कथमिति चेत्; पुरः = पूर्वदिशि, रागात् = सन्ध्यारागात्, गलितम् = स्रस्तम्; तया = रात्र्या, समस्तम् = मिश्रितम्, तिमिरांशुकम् = अन्धकारमिश्रितः किरणसमुदायः, न लक्षितम् = न अभिज्ञातः।

अस्मिन् श्लोके समासोक्तिरलङ्कारः। यत्र प्रस्तुते वृत्तान्ते वर्ण्यमाने तत्समानैः विशेषणैः अन्यः अप्रस्तुतः अर्थः गम्यते स समासोक्तिः। अत्र श्लोके चन्द्रोदयवर्णनं प्रस्तुतम्। शशिना निशामुखमाभासितम् इति विधेयार्थः। किन्तु विशेषणसाम्येन अप्रस्तुतः नायिकानायकव्यवहारः गम्यते। अप्रस्तुतपक्षे अयमर्थः-

विशेषण-साम्येन अप्रस्तुतः

उपोढरागेण = स्वीकृतानुरागेण, शशिना = तन्नामकेन नायकेन विलोलतारकम् = चञ्चलनेत्रान्तम्, निशामुखम् = निशाख्यनायिकायाः मुखम्; तया; गृहीतम्; यथा; पुरः अग्रे; रागात्; गलितम्; तथा; समस्तम्; तिमिरांशुकम् = नीलवस्त्रम्; न लक्षितम्।

अत्र एवंविधेन विशिष्टशब्दप्रयोगेण निशानिशाकररूप-नायिकानायकव्यवहारः प्रतीयते। अतः समासोक्त्यलङ्कारः। पश्चाद्गतेन नायकेन चुम्बनोपक्रमे पुरो नीलांशुकस्य पतनरूपं वस्तु व्यज्यमानमपि तदनुगतः वाच्यार्थ एव प्राधान्येन प्रतीयते। समारोपित-नायिकानायकव्यवहारयोः निशाशशिनोरेव वाक्यार्थत्वात्। अतः सत्यपि व्यङ्ग्ये अत्र श्लोके, तस्य न प्राधान्यम्, किन्तु वाच्योपस्कारकत्वात् एव। अतः समासोक्तौ ध्वनेर्नान्तर्भावः।

व्यङ्ग्यानुगतवाच्यस्यैव प्रतीतिः प्रधानतया भवति

### 2.3.4. आक्षेपालङ्कारे ध्वनेरन्तर्भावनिषेधः

आक्षेपे अलङ्कारेऽपि वाच्यार्थः, व्यङ्ग्यविशेषमाक्षिपति। तथापि वाच्यस्यैव प्राधान्यम्। तस्य चारुताहेतुत्वात्। आक्षेपालङ्कारे आक्षेपः शब्देन उक्तः भवति। तत्र वस्तुतः विशेषाभिधानेच्छा कारणम्। विशेषाभिधानेच्छायाः विद्यमानत्वादेव प्रतिषेधरूपस्य तस्य आक्षेपस्य प्राधान्यम्। सत्यपि व्यङ्ग्येऽर्थे अभिधीयमानः वाच्यार्थरूपः, प्रतिषेध एव मुख्यं काव्यशरीरं भवतीति वाच्यार्थस्य एव तत्र प्राधान्यम्।

विशेषाभिधानेच्छायाः विद्यमानत्वादेव प्रतिषेधरूपस्य तस्य आक्षेपस्य प्राधान्यम्


SGOU

प्राधान्याप्राधान्यनिर्णये चारुत्वोत्कर्ष एव कारणं नान्यत्। यत्र वाच्ये वा व्यङ्ग्ये वा चारुता तस्यैव प्राधान्यम्। आक्षेपेऽपि तादृशी एव स्थितिः। अतः आक्षेपेऽपि ध्वनेः अन्तर्भावो न। दीपकापह्नुत्यादौ व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वात् न तथा व्यपदेशः तद्वदत्रापि द्रष्टव्यम्।

**2.3.5. अनुक्तनिमित्तविशेषोक्तौ ध्वनेः अन्तर्भावः**

समासोक्त्याक्षेपयोः ध्वनेः अन्तर्भावत्वं निरस्य, उद्देशक्रमेण अनुक्तनिमित्त-विशेषोक्तौ ध्वनेरन्तर्भावं निरूपयितुम् उपक्रमते अनुक्तनिमित्तायामपि इत्यादिना।

यथा -

**आहूतोऽपि सहायैरेमित्युक्त्वा विमुक्तनिद्रोऽपि।**
**गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति॥**

**अन्वयः -** सहायैः आहूतः अपि एमि इत्युक्त्वा विमुक्तनिद्रः अपि पथिकः सङ्कोचं न एव शिथिलयति।

केचित् पान्थाः रात्रौ कुत्रापि शयित्वा, पुनः प्रातरेव प्रस्थिताः। तथापि अनुत्थितं सहचरं जागरयन्ति। तत्प्रकरणवर्णनमिदम्।

सः पथिकः सहचरैः (सहायैः) मान्यैः आहूतः अपि, ओम् इति प्रत्युक्त्वा। त्यक्तनिद्रः अपि सङ्कोचं (तथाविधशयनप्रकारं) नैव शिथिलयति। पथिकः गन्तुमनाः (गन्तुमिच्छत्येव)। सहायैः आहूतः। न तावता। स विमुक्तनिद्रः। तथापि सङ्कोचं नैव शिथिलयति। निमित्तं किम्? तदेव नोक्तमिति अनुक्तनिमित्ता विशेषोक्तिरियम्।

प्रकरणसामर्थ्यात् व्यङ्ग्यस्य शीतबाधा तादृशी इत्याद्यर्थस्य प्रतीतिः

अत्र प्रकरणसामर्थ्यात् व्यङ्ग्यस्य शीतबाधा तादृशी इत्याद्यर्थस्य प्रतीतिः भवत्येव। तथापि वाच्यापेक्षया तस्य प्राधान्यं नास्ति। तद्व्यङ्ग्यकृत चारुत्वस्य कस्यापि अभावात्। अतः अस्मिन् अलङ्कारे ध्वनेः अन्तर्भावः स्फुटमेव।

### 2.3.6. पर्यायोक्तौ ध्वनेरन्तर्भावनिषेधः

पर्यायोक्ते व्यङ्ग्योऽर्थः अस्ति

उद्देश्यक्रमेण पर्यायोक्त्यलङ्कारे ध्वनेः अन्तर्भावत्वं पश्यामः- पर्यायोक्ते व्यङ्ग्योऽर्थः अस्ति। तस्य प्राधान्यमप्यस्ति। तावन्मात्रेण ध्वनेः महान् विषयः। सर्वत्र साहित्ये व्यापकश्च। पर्यायोक्तं पुनः अलङ्कारेषु अन्यतमम्। अत एव च अल्पविषयकम्। अन्यच्च ध्वनिः अङ्गी। सः अलङ्कार्यः। पर्यायोक्तं पुनरङ्गम्। अलङ्कारमात्रम्। अतः सरूपयोः विषययोः अल्पे विषये महाविषयस्य, अङ्गे वा अङ्गिनः अन्तर्भावः अनुचितः।

### 2.3.7. सङ्करालङ्कारे ध्वनेरन्तर्भावनिषेधः

अपह्नुति-दीपकालङ्कारयोः वाच्यस्य प्राधान्यं व्यङ्ग्यस्य च अनुयायित्वं निरूपितम् अन्तर्भावत्वं पश्यामः। साम्प्रतं सङ्करालङ्कारविषये ध्वनेः अन्तर्भावत्वं पश्यामः।

सङ्करालङ्करविषये गतिद्वयं दर्शयति

सङ्करालङ्करविषये गतिद्वयं दर्शयति ध्वनिकारः। कस्यचित् अलङ्कारस्य अलङ्कारान्तरच्छायाग्रहणम् अलङ्कारान्तरसहायकत्वम् इति प्रथमागतिः। अर्थात् अलङ्कारान्तरसहायकत्वम् इति प्रथमागतिः। अलङ्कारद्वयस्यापि समप्राधान्येनसम्भावनं द्वितीया गतिः।

तत्र प्रथमायां गतौ व्यङ्ग्यस्य प्राधान्येन अविवक्षितत्वात् तस्य ध्वनिविषयत्वमेव न। द्वितीयायां गतौ वाच्यव्यङ्ग्ययोः समं प्राधान्यम्। यदि व्यङ्ग्यस्य वाच्योपसर्जनीभावेन तत्र स्थितिः तदा सोऽपि ध्वनिविषयः भवति। न तु स एव ध्वनिः। पर्यायोक्त्यलङ्कारविषये यो न्यायः स्वीकृतः स एव अत्रापि अनुवर्तते। ध्वनेः महाविषयत्वं सङ्करालङ्कारस्य च अल्पविषयत्वमिति।

### 2.3.8. अलङ्कारध्वनौ ध्वनेः अन्तर्भावः

यत्र अलङ्कारे व्यङ्ग्यस्य प्राधान्यं भवति तत्र का गतिः इति चेत्, उच्यते-

**भवति न गुणानुरागः खलानां केवलं प्रसिद्धिशरणानाम्।**

**किल प्रस्तौति शशिमणिः चन्द्रे न प्रियामुखे दृष्टे॥**

केवलं प्रसिद्धि (लोकप्रचार) शरणानाम् खलानां गुणानुरागः न भवति। शशिमणिः चन्द्रे दृष्टे प्रस्तौति। प्रियामुखे दृष्टे न प्रस्तौति किल।

अत्र वाच्यकक्ष्यायां विशेषणवाक्येन सामान्यवाक्यस्य समर्थनात् अर्थान्तरन्यासालङ्कारः। चन्द्रप्रियामुखयोः औपम्यम्, उपमानात् चन्द्रादपि उपमेयस्य प्रियामुखस्य सुन्दरत्वमिति व्यतिरेकः, नायं चन्द्रः किन्तु प्रियामुखम् इति अपह्नवश्च व्यज्यते। व्यज्यमाना अलङ्काराः प्रधानतयो व्यज्यन्ते। तत्कुतः ध्वनेः अत्र न अन्तर्भावः ?

ध्वनेः महाविषयत्वम्, अलङ्कारध्वनेः ध्वनिभेदेषु अन्यतमत्वमिति अल्पविषयत्वं सुस्पष्टमेव

अत्र समादधाति। वस्तुतः अयं सङ्करालङ्कार एव न। प्रकरणस्य तत्सम्बन्धित्वात् तत्परामर्शः। अयं पुनः ध्वनिभेदेषु अन्यतमः अलङ्कारध्वनिरूपः। अत्रापि पर्यायोक्तन्यायः अनुसन्धेयः। ध्वनेः महाविषयत्वम्, अलङ्कारध्वनेः ध्वनिभेदेषु अन्यतमत्वमिति अल्पविषयत्वं सुस्पष्टमेव। अतः अलङ्कारध्वनेः ध्वनावन्तर्भावः समुचितः न तु ध्वनेः अलङ्कारध्वनावन्तर्भावः।

### 2.3.9. अप्रस्तुतप्रशंसायाम् ध्वनेः अन्तर्भावः

त्रिप्रकारायाः अपि अप्रस्तुतप्रशंसायाः ध्वनौ अन्तःपातित्वं वदति ध्वनिकारः

अप्रस्तुतप्रशंसायामपि ध्वनेः अन्तर्भूतत्वं कथमिति इदानीं पश्यामः। त्रिप्रकारायाः अपि अप्रस्तुतप्रशंसायाः ध्वनौ अन्तःपातित्वं वदति ध्वनिकारः। अप्रस्तुतप्रशंसालक्षणम्। प्रस्तुतत्वादपेतस्य अन्यस्य वस्तुनः या स्तुतिः सा अप्रस्तुतप्रशंसा। वर्ण्यमानमन्यत् वस्त्वपि अत्र प्रस्तुतेन सम्बद्ध एव स्यात्। सा त्रिविधा-

१. सामान्यविशेषभावात्,२. निमिनिमित्तं भावात्, ३. सारूप्यात् च।

#### 2.3.9.1. सामान्यविशेषभावात्

अप्रस्तुतप्रशंसायाम् सामान्यविशेषयोः वाच्यत्वेन व्यङ्ग्यत्वेन च युगपत् समप्राधान्यस्य स्थितेः ध्वनेः प्राधान्यं स्यात्

सामान्यविशेषभावेन समुत्पन्नायाम् अप्रस्तुतप्रशंसायाम् अप्राकरणिकं सामान्यं वस्तुशब्देन उच्यते। प्राकरणिकं विशेषस्तु गम्यते। इत्थं सामान्यविशेषाभावात् समुत्पन्नायामप्रस्तुतप्रशंसायां

प्रकारद्वयेऽपि सामान्यविशेषयोः वाच्यभूतयोः व्यङ्ग्यरूपयोर्वा युगपत् समप्राधान्यात् ध्वनेः प्राधान्यम्, अतः तस्मिन् अलङ्कारे ध्वनेरन्तर्भावः इति वक्तुं न शक्यते।

**2.3.9.2.निमिनिमितं भावात्**

यतः वाच्यस्य व्यङ्ग्यस्य च समप्राधान्यं विद्यते, अतः व्यङ्ग्यस्य वाच्यापेक्षा प्राधान्यं न स्यात्

अस्मिन् अपि प्रकारे द्वयी गतिः। क्वचित् निमित्तम् अप्रस्तुतं, नैमित्तिकञ्च प्रस्तुतं भवति। अत्रापि वाच्यव्यङ्ग्योः समप्राधान्यमेव। अतः वाच्यापेक्ष्या व्यङ्ग्यस्य प्राधान्यं नेति ध्वनेः अत्रापि नान्तर्भावः।

**2.3.9.3. सारूप्यात्**

सारूप्यवशेन उत्पन्नायाम् अप्रस्तुतप्रशंसायां द्वौ प्रकारौ स्तः

सारूप्यवशेन उत्पन्नायामपि अप्रस्तुतप्रशंसायां द्वौ प्रकारौ। कदाचित् अप्रस्तुतात् वाच्यात् चमत्कारः। कदाचित् च प्रस्तुतात् व्यङ्ग्यार्थात् चमत्कारः। अत्रापि वाच्यापेक्षया व्यङ्ग्यस्य प्राधान्यं नेति ध्वनेः अत्रापि नान्तर्भावः।

**2.3.10. व्याजस्तुत्यलङ्कारे ध्वनेः अन्तर्भावः**

निन्दास्तुतिभ्यां स्तुतिनिन्दयोः कथनं व्याजस्तुत्यलङ्कारः। यथा-

**किं वृत्तान्तैः परगृहगतैः किन्तु नाहं समर्थः**
**तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः।**
**गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या**
**मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः॥**

परगृहवृत्तान्तो किमपि प्रयोजनं नास्ति। तूष्णीं स्थातुं न समर्थः। हन्त। तव वल्लभा कीर्तिः गेहे गेहे, विपणिषु तथा चत्वरे, पानगोष्ठ्याञ्च उन्मत्ता इव भ्रमति।

यतः अत्र वाच्यार्थः (निन्दा) एव मुख्यः, स्तुतिरूपेण व्यङ्ग्यार्थः अनुगतः। व्यङ्ग्यस्य प्राधान्यं न सति, ध्वन्यलंकारः अत्र न स्यात्

अत्र वाच्यार्थः दोषारोपणरूपनिन्दात्मकः। किन्तु तया निन्दया सर्वत्र देशे तदीया कीर्तिः व्याप्ता इति स्तुतिः व्यज्यते। तेन च व्यज्यमानेन अर्थेन वाच्यार्थ एवं अलङ्क्रियत इति नात्र व्यङ्ग्यस्य प्राधान्यम्। अतः ध्वनेः अस्मिन् नान्तर्भावः।

## 2.3.11. ध्वनेः अन्यत्र अन्तर्भावः

ध्वनिः अङ्गी। तस्य सम्बन्धिनः अलङ्काराः, गुणाः, वृत्तयः च अङ्गानि भवन्ति। ध्वनिः अवयवी, अन्ये तु तस्य अवयवाः इव सन्ति

ध्वनिः अङ्गी। शब्दार्थसम्बन्धिनः अलङ्काराः गुणाः, वृत्तयश्च तस्य अङ्गाङ्गानि। ध्वनिः अवयवी। अलङ्कारादयः अवयवभूताः। अङ्गाङ्गिनोः परस्परं विरोधः। अङ्गी स्वामितुल्यः। अङ्गानि पुनः भृत्यसमानानि। स्वामिभृत्योः एककक्ष्यगतत्वं नैव सिद्ध्यति खलु। अवयविनः पृथग्भूतः अवयव एव अवयवी इति कथनमपि असङ्गतम्। पृथग्भूतस्य तथात्वाभावेऽपि अपृथग्भूतस्य तथात्वं कुतो नेति वाच्यम्। अपृथग्भूतत्वादेव तस्य तदङ्गत्वम्। न तु अङ्गित्वम् (अवयवित्वम्)। यत्र कुत्रापि अवयवस्यैव प्राधान्यम्- पर्यायोक्तादिकस्य अलङ्कारस्य प्राधान्यम्- तथापि ध्वनेः तत्र न अन्तर्भावः तस्य महाविषयत्वात्, तादृशालङ्कारभिन्नस्थलेष्वपि ध्वनेः दृश्यमानत्वात्। तस्मात् ध्वनेः अन्यत्र कुत्रापि नान्तर्भावः।

## 2.3.12. ध्वनेः सूरिभिः कथितत्वम्

सूरयः इत्यत्र वैयाकरणाः, तन्मतानुसारिणः, तथा च काव्यतत्त्वार्थदर्शिनः विद्वांसः अभिप्रेताः

ध्वनिलक्षणे (यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः) ध्वनेः सूरिभिः कथितत्वमुक्तवान् ध्वनेः प्रबलप्रमाणप्रदर्शने आनन्दवर्धनस्य प्रयत्न एव तस्य सूरिकथितत्वनिरूपणम्। अत्र सूरिणः वैयाकरणाः तन्मतानुसारिणः काव्यतत्त्वार्थदर्शिनश्च।

वैयाकरणमतानुसारं स्फोटे वर्णाः व्यञ्जकाः

ध्वनिरिति वचनं विद्वद्भिः प्रारब्धम्। ते च विद्वांसः वैयाकरणाः। विद्वत्सु ते एव प्राथमिकाः सर्वविद्यानामपि व्याकरणमूलत्वात्। श्रूयमाणेषु शब्देषु ध्वनिरिति तेषां व्यवहारः। वैयाकरणमतानुसारं स्फोटे वर्णाः व्यञ्जकाः। स्फोटश्च व्यङ्ग्यः। अतः अत्र व्यङ्ग्यव्यञ्जकभावः अस्ति वर्णशब्द-स्फोटशब्दयोः। अयमेव भावः वृत्तिकृता सूचितः, 'तथैव अन्यैः = तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिः 'काव्यस्यात्मा ध्वनिरिति' उक्तः।

### 2.3.13. ध्वनेः नूतनालङ्कारमात्रत्वं न

ध्वनेः उक्तेषु एव चारुत्वहेतुषु अन्तर्भावः, अथवा उक्तपूर्वेषु अन्यतमस्य नूतनसमाख्यामात्रम्, अथवा वाग्विकल्पानामानन्त्यात् नूतनः कश्चित् प्रकारलेशः इति पूर्वपक्षाभिप्रायं खण्डयति ग्रन्थकारः।

"ध्वनिः महाविषयः"

ध्वनिः महाविषयः तस्य मुख्ये रूपे द्वे। अविवक्षितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्चेति, तत्र आद्यः अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्चेति द्विप्रकारः द्वितीयश्च असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः। अवान्तरभेदाः च इतोऽपि बहवः प्रदर्शयिष्यन्ते। इत्थं महाविषयस्य, अङ्गिभूतस्य, अशेषलक्ष्यव्यापकस्य च ध्वनेः उक्तचारुत्वहेतुषु गुणालङ्कारवृत्तिरीत्यादिषु कथमन्तर्भावः? प्राचीनस्यैव कस्यापि नूतनं नामेति कथनमपि न युक्तम्। उक्तपूर्वाः चारुताहेतवः वाच्यवाचकभावसम्बन्धिनः, ध्वनिस्तु व्यङ्ग्यव्यञ्जक-भावसम्बन्धी। कोऽपि नूतन एव प्रकारलेशः इति कथनमपि न सङ्गच्छते। तस्य महाविषयत्वेन दृश्यमानत्वात्। अनया तृतीयोऽपि अभाववादः खण्डितः॥

## Summarised Overview

ध्वनिकारेण श्रीमता आनन्दवर्धनाचार्येण ध्वनिलक्षणं प्रतिपादयति। "काव्यस्यात्मा ध्वनिरिति..." इत्यादिश्लोके ग्रन्थारम्भे एव ध्वनिकारः तस्याभावं जगदुरपरे" इति ध्वन्यभाववादं निर्देशितवान्। तान् वादान् खण्डयितुम् उद्युक्तो भवति वृत्तिकारः ध्वनिलक्षणप्रदर्शनानन्तरमेव। शब्दार्थालङ्कारगुणरीतिवृत्तिव्यतिरिक्ता न ध्वनिर्गभेति प्रथमः कल्पः, प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्ति' इति द्वितीयः, 'कामनीयकमनतिवर्तमानस्य तस्य उक्तालङ्कारादि-प्रकारेष्वन्तर्भाव' इति तृतीयः कल्पः। ध्वनिविषये पूर्वपक्षे यदुक्तम् ध्वनिस्तु काव्ये कमनीयतत्त्वमेव तत्र कमनीयत्तत्त्वास्तु पूर्वैराचार्यैः अलङ्कारादिनाम्ना व्याख्याता। तत्र ध्वनेरपि कस्मिंश्चिदलङ्कारे एव अन्तर्भावः स्याद् इति तदेव निराकर्तुं समासोक्त्यादिभ्यः ध्वनेः भिन्नत्वं प्रतिपादयति। उपसर्जनीकृतस्वार्थौ ध्वनिस्तु तत्रैव भवति यत्र वाच्यवाचको स्वात्मानमप्रधानीकृत्य व्यङ्ग्यार्थं

प्रधानत्वेन चमत्कारकारितया अभिव्यनक्ति। न हि समासोक्त्यादिषु तथा सम्भवति इति। अत एव न समासोक्त्यादिषु ध्वनेरन्तर्भावः सम्भवति तदेव सविस्तरं दृढयति।

समासोक्ति-आक्षेप-अनुक्तनिमित्तविशेषोक्ति-पर्यायोक्ति-सङ्करादिषु ध्वनेः कथं नान्तर्भावः इति स्पष्टयति। अप्रस्तुतप्रशंसायामपि ध्वनेः अन्तर्भूतत्वं त्रिप्रकारायाः अपि अप्रस्तुतप्रशंसायाः ध्वनौ अन्तःपातित्वं वदति ध्वनिकारः। यतः अत्र वाच्यार्थः (निन्दा) एव मुख्यः, स्तुतिरूपेण व्यङ्ग्यार्थः अनुगतः। व्यङ्ग्यस्य प्राधान्यं न सति, ध्वन्यलङ्कारः अत्र न स्याद्। अतः व्याजस्तुत्यलङ्कारे ध्वनेः नान्तर्भावः। ध्वनेः अन्येषु अलङ्कारेषु नान्तर्भावः। यतः अङ्गी अङ्गात् विशिष्टः, स्वामिभृत्यभावः यत्र विद्यते, तत्र एककक्ष्यत्वं न सम्भवति। ध्वनिः स्वतन्त्रः महाविषयः, तस्य प्राधान्यं सदा स्थिरं, अतः सः अन्यत्र अलङ्कारेषु न अन्तर्भवति।

# Assignments

**I. उत्तरं लिखत।**

1. 'ध्वनिः' इत्यस्य लक्षणं किम् ?
2. ध्वनिं सूरयः कथं मानयन्ति ?
3. ध्वन्यभाववादिनां त्रयः मुख्याः प्रकाराः के?
4. ध्वन्यालोककारः प्रथमाभाववादं कथं खण्डयति?
5. द्वितीयाभाववादिनः कं दोषं आरोपयन्ति? तस्य खण्डनं कथं भवति?
6. ध्वनिलक्षणे 'ध्वनिः सूरिभिः कथितः' इत्यत्र 'सूरयः' के?
7. वैयाकरणानां ध्वनिशब्दप्रयोगे कः अर्थः दृश्यते?
8. "ध्वनिः महाविषयः" इत्यस्य आधारः कः?

**II. टिप्पणिं लिखत।**

1. यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
   व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः। इति कारिकां सविस्तरं व्याख्यात।
2. उपोढरागेण विलोलतारकं तया गृहीतं शशिना निशामुखम्।
   यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद् गलितं न लक्षितम्॥ इत्यस्मिन् श्लोके कस्य अर्थस्य प्राधान्यम्, कः अलङ्कारः?

3. समासोक्तौ आक्षेपालङ्कारे च ध्वनेरन्तर्भावं कथं न इति सोदाहरणं प्रतिपादयत।
4. पर्यायोक्त्यलङ्कारे ध्वनेरन्तर्भावः कथं न भवतीति प्रतिपादयत।
5. अप्रस्तुतप्रशंसायां ध्वनेरन्तर्भूतत्वं कथम्?

**III. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत।**

1. ध्वन्यभाववादान् यथाग्रन्थं खण्डयत।
2. समासोक्ति-आक्षेप-अनुक्तनिमित्तविशेषोक्ति-पर्यायोक्ति-सङ्करादिषु ध्वनेः कथं नान्तर्भावः इति स्पष्टतया निरूप्यत।

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015
2. Dhvanyaloka with Alacanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
3. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, Harvard University Press, Cambridge, London, 1990,
4. History of Sanskrit Poetics, P.V.Kane, Motilal Banarsidass, New Delhi, 1987
5. Dhvanyaloka, Ed.C.M.Neelakanthan, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968.


## References


1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९०।

2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. ध्वन्यालोकप्रकाशिका, श्रीराजेन्द्रप्रसादः कोठ्यारी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 4

# भाक्तवादनिरूपणं खण्डनं च

## Learning Outcomes

- ध्वनि-लक्षणयोः भेदं अवगच्छन्ति ।
- रूपभेदात् अयं ध्वनिः भक्त्या नैकत्वं बिभर्ति इति सुस्पष्टं ज्ञायते ।
- भाक्तवादनिरूपणं खण्डनं गृह्णाति च ।

## Background

ध्वन्यालोकग्रन्थे आनन्दवर्धनः ध्वनेः स्वरूपं प्रतिपाद्य, ध्वनेः लक्षणं, तथैव स ध्वनिः चारुत्वहेतुष्वलङ्कारेषु नान्तर्भवतीत्यपि निरूपयति । एवमेव समासोक्त्यादिष्वपि ध्वनेः अन्तर्भावः न सम्भवति, यतो हि ध्वनिः महान् विषयः इति प्रतिपादितम् । अस्मिन् एकके भाक्तवादनिरूपणं खण्डनं च वयं पठामः ।

## Keywords

व्यापाराः, लक्षणा एव ध्वनिः, भक्त्या नैकत्वं बिभर्ति, उपचारः, बिसिनीपत्रशयनं कृशाङ्ग्यः सन्तापं वदति, दोषद्वयम्, रूढाः, लावण्यं, भक्तिः ।

SGOU

# Discussion

### 2.4.1. भाक्तवादनिराकरणम्

ध्वनिः द्विप्रकारः

ध्वनिः अविवक्षितवाच्यः, विवक्षितान्यपरवाच्यश्च इति द्विप्रकारः उक्तः खलु। तत्र अविवक्षितवाच्यध्वनौ शब्दश्रवणादारभ्य प्रतीयमानार्थावगतिपर्यन्तं कति व्यापाराः सन्ति? इति आदौ अवगच्छामः। चत्वारः भवन्ति। अभिधा, तात्पर्यम्, लक्षणा, ध्वननञ्च इति।

विवक्षितान्यपरवाच्यध्वनौ वस्तुतः लक्षणायाः अवकाशः नास्ति। तत्र त्रयः एव व्यापाराः अभिधा, तात्पर्यं, ध्वननञ्च इति। तथापि केषुचित् स्थलेषु "शिखरिणि क्व नु नाम कियच्चिरम्" इत्यादिषु उदाहरणेषु लेशतः लक्षणायाः अवकाशः दृश्यते।

लक्षणा एव ध्वनिः

अविवक्षितवाच्ये लक्षणायाः प्राधान्यम्। विवक्षितान्यपरवाच्ये लक्षणायाः लेशतः स्थितिः क्वचित्। यत्र लक्षणास्पर्शः तत्र विवक्षितान्यपरवाच्येऽपि चत्वारः व्यापाराः अभिधा, तात्पर्यम्, लक्षणा, ध्वननञ्च इति। तथा च लक्षणामूलध्वनौ (अविवक्षितवाच्यध्वनौ) इव अभिधामूलध्वनौ (विवक्षितान्यपरवाच्यध्वनौ) अपि लक्षणास्पर्शस्य सम्भवात् लक्षणा-ध्वन्योः को भेदः? लक्षणा एव ध्वनिर्भवेत्। इति शङ्कां सम्भाव्य अस्मिन् एव प्रकरणे ध्वनेः भक्त्यन्तर्भावत्वं निराकुर्वन् वदति ध्वनिकारः -

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः। इति ।।१३.१/२**

अयम् उक्तपूर्वस्वरूपः ध्वनिः, भक्त्या एकत्वं न भजति, भिन्नरूपत्वात्। पाठकाः स्मरन्ति वा? प्रारम्भे ध्वनितिरस्कर्तॄणां मतप्रदर्शनप्रकरणे भाक्तमाहुस्तमन्ये इति ध्वनिः भक्तौ एव अन्तर्भवतीति भावयतां मतं प्रकटितम्। तत्र विस्तरशः विवृतं

तन्मतमत्र अनुसन्धेयम्। तस्य भाक्तवादस्य खण्डनमत्र आरभते ध्वनिकारः भक्त्या बिभर्ति इत्यादिना।

ध्वनि-भक्त्योः ऐक्यं यदि अङ्गीक्रियेत, तर्हि कीदृशं तत् तादूप्यम्? १. पर्यायपदद्वयमध्यगतेन तादूप्येण समानं वा? पदद्वयमध्ये अर्थसाम्येन तादूप्ये सत्यपि निरुक्तरीत्या भेदः भवत्येव, न कस्यापि पदस्य सर्वात्मना पर्यायरूपं पदं विद्यते। २. पृथिव्याः पृथिवीत्वमिव, भक्तिः ध्वनेः अन्यव्यावर्तकरूपतया लक्षणं वा? अर्थात् लक्षणायां सत्यामेव तदाधारतया ध्वनिः भवेत्। अस्य पूर्वपक्षस्य समाधानं वक्ति आनन्दवर्धनः "अयमुक्तप्रकारः ध्वनिः भक्त्या नैकत्वं बिभर्ति, भिन्नरूपत्वात्। वाच्यव्यतिरिक्तस्य अर्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः- उपचारमात्रं तु भक्तिः" इत्यादिना।

"अयमुक्तप्रकारः ध्वनिः भक्त्या नैकत्वं बिभर्ति, भिन्नरूपत्वात्

निर्दिष्टपूर्वे प्रथमशङ्कायाः समाधानमिदम्। ध्वनिः शब्दरूपो वा, अर्थरूपो वा, व्यापाररूपो वा, व्यङ्ग्यरूपो वा, समुदाय (काव्य) रूपो वा, पञ्चधापि भक्त्या भिन्न एव। ध्वनौ वाच्यव्यतिरिक्तस्य अर्थस्य प्रकाशनं (द्योतनं) स्यात्। तदपि वाच्यवाचकाभ्यां प्रकाशितं स्यात्, तदपि तात्पर्येण। अन्ततः प्रकाशितस्य तस्य व्यङ्ग्यस्य अर्थस्य प्राधान्यमपि स्यात्।

भक्तौ तु उपचारमात्रमेव। उपचारो नाम अतिशयितव्यापारः। अर्थात् शब्दस्य व्यवहारप्रसिद्धमर्थम् अतिक्रम्य, तत्सम्बद्धे अर्थ-व्यवहारः। भक्तौ लक्षणारूपः तावन्मात्र एव व्यापारः। भक्तौ अपि लक्षणाव्यापारात् अन्यस्य चतुर्थस्य प्रयोजनद्योतनरूपस्य व्यापारस्य स्थितिः भवत्येव। तथापि अनुपयुज्यमानत्वात् अत एव अनादृतत्वात् असत्समान एव। "यमर्थमधिकृत्य प्रवर्तते तत् प्रयोजनम्" इति न्यायदर्शनम्। इत्थं प्रयोजनमनधिकृत्य प्रवर्तते लक्षणा (भक्तिः) भवति। प्रयोजनमधिकृत्य प्रवर्तने एव ध्वनिः। अतः ध्वनिः भक्तिश्च भिन्न एव।

उपचारो नाम अतिशयितव्यापारः

द्वितीयशङ्कानिरासः -

भक्तिः ध्वनेः अन्यव्यावर्तकलक्षणमिति पक्षं निराकुर्वन् वदति ध्वनिकारः-

**यदि भक्तिरेव ध्वनिः तर्हि अतिव्याप्तिः, अव्याप्तिः च लक्षणगतौ दोषौ स्तः**

**अतिव्याप्तेरथाव्याप्तेर्नचासौ लक्ष्यते तथा।।१४।।**

यदि भक्तिः एव ध्वनेः लक्षणमित्युच्येत, तर्हि दोषद्वयं भवति अतिव्याप्तिरूपम्, अव्याप्तिरूपम्। क्रमशः दोषद्वयमपि निरूपयति।

### 2.4.2. अतिव्याप्तिदोषः

**अलक्ष्ये लक्षणसत्त्वमतिव्याप्तिः**

अलक्ष्ये लक्षणसत्त्वमतिव्याप्तिः। कस्यापि लक्षणं तस्य लक्ष्ये एव दृश्यते। यदि अलक्ष्येऽपि लक्षणस्य स्थितिः, तर्हि दोषः लक्षणस्य न तु लक्ष्यस्य भक्तिः एव ध्वनेः लक्षणमिति प्रतिपादने भक्तिः ध्वन्युदाहरणेष्वेव स्यात्। ध्वनिभिन्नस्थलेऽपि भक्तेः दृश्यमानत्वे अतिव्याप्तिदोषः यत्र व्यङ्ग्यकृतस्य महत्सौन्दर्यस्य अभावेऽपि उपचरित (लक्षणा) वृत्या लोकव्यवहारमनुसृत्य कृताः कवीनां व्यापाराः सौन्दर्यसम्पादकाः दृश्यन्त एव। यथा-

**परिम्लानं पीनस्तनजघनसङ्गादुभयत-**

**स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**

**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः**

**कृशाङ्ग्यः सन्तापं वदति बिसिनीपत्रशयनम्॥**

**अन्वयः-** पीनस्तनजघनसङ्गात् उभयतः परिम्लानं तनोः मध्यस्य अन्तः परिमिलनं अप्राप्य हरितं श्लथभुजलताक्षेपवलनैः इदं व्यस्तन्यासं बिसिनीपत्रशयनं कृशाङ्ग्यः सन्तापं वदति।

बिसिनी (कमलिनी) पत्रकल्पिता शय्या कृशाङ्ग्याः सन्तापं वदति। कीदृशी सा ? पीनस्तनजघनसम्बन्धे न तदुभयतः परिम्लाना; शिथिलयोः भुजलतयोः इतस्ततः आक्षेपेण वलनेन अस्तव्यस्ता च।

वदति इति पदे मुख्यार्थबाधे सत्यपि सति च लक्षणायां न कश्चित् चमत्कारः

अत्र श्लोके वदति शब्दः औपचारिकः (लाक्षणिकः) बिसिनीपत्रशयनस्य अचेतनस्य वदनकर्तृत्वा सम्भवात् सः शब्दः लक्षणया सम्यक् सूचयति इत्यर्थं बोधयति। सः अर्थ एव अत्र लक्षणा-प्रयोजनम्। तस्य प्रयोजनस्य वाच्यत्वेऽपि सौन्दर्यक्षतिः न, वदतीति कथने विशेषचारुत्वमपि न, अत एव अभिव्यज्यमानस्य प्रयोजनस्य सौन्दर्यहेतुत्वे एव ध्वनिः तस्य वाच्यकरणेऽपि भेदाभावे ध्वनिर्नभवति किन्तु भक्तिः। अतः ध्वनिरहितस्थलेषु अपि भक्तेः दर्शनात् भक्तेः एव ध्वनिलक्षणत्वे अतिव्याप्तिदोषः।

अमुमेव विषयमुपसंहरन्नाह- ध्वनिकारः -

**उक्त्यन्तरेणाशक्यं यत्तञ्चारुत्वं प्रकाशयन्।**

**शब्दो व्यञ्जकतां बिभ्रत् ध्वन्युक्तेर्विषयी भवेत्॥१५॥**

उक्त्यन्तरेण अशक्यं यत् तञ्च्चारुत्वं प्रकाशयन् व्यञ्जकतां बिभ्रत् शब्दः ध्वनिः

**अन्वयः** - उक्त्यन्तरेण अशक्यं यत् तञ्चारुत्वं प्रकाशयन् व्यञ्जकतां बिभ्रत् शब्दः ध्वन्युक्तेः विषयी भवेत्।

अन्या उक्तिः = उक्त्यन्तरम्, उक्त्यन्तरेण ध्वनिभिन्नेन शब्दार्थसम्बन्धेन व्यापारविशेषेण, अशक्यम् = असाध्यम्, यत् चारुत्वम् = यत् सौन्दर्यम्, तत्, प्रकाशयन्, व्यञ्जकत्वम्, बिभ्रत् = दधानः शब्दः = वाचकशब्दो वा, वाच्यार्थो वा, व्यङ्ग्यार्थो वा व्यञ्जनाव्यापारो वा, तत्समुदायत्वेन काव्यरूपो वा, ध्वन्युक्तेः = ध्वनिशब्देन व्यवहाराय विषयीभवेत्।

शब्दान्तरेण प्रकारान्तरेण वा असाध्यस्य सौन्दर्यस्य प्रकाशकत्वे एव ध्वनिः। उदाहृतपूर्वश्लोके "..... कृशांग्याः सन्तापं वदति बिसिनीपत्रशयनम्" इत्यत्र शब्दः शब्दान्तरेण अशक्यस्य चारुत्वस्य प्रकाशकः न भवति। स पुनः भक्तेः उदाहरणमेव। तत्र ध्वनिः नास्ति। ध्वनिभिन्नेऽपि स्थले भक्तेः दर्शनात् अतिव्याप्तिः।

### 2.4.3. लावण्यादिपदविषये ध्वनिव्यवहारनिराकरणम् -

अर्थान्तरे रूढा अपि शब्दाः प्रयोजनरहिताः, ध्वनिव्यवहारं नार्हन्तीति निरूपयन् वदति ध्वनिकारः यथा-

**रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।**

**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥ १६ ॥**

लक्षणोपयोगे किञ्चिदपि प्रयोजनं नास्ति

स्वविषयादपि = स्ववाच्यार्थादपि, अन्यत्र = भिन्ने, विषयेऽपि = अर्थेऽपि; रूढाः = प्रसिद्धाः, ये; लावण्य + आद्याः, शब्दाः, प्रयुक्ताः; भवन्ति, ते = ते शब्दाः, ध्वनेः पदं न भवन्ति = ध्वनिव्यवहारं नार्हन्ति। लावण्यशब्दः सौन्दर्यार्थे, आनुलोम्यशब्दः अनुक्रमार्थे, प्रातिकूल्यशब्दः व्यतिरेकार्थे, सब्रह्मचारिशब्दः तुल्यार्थे च प्रयुज्यते। लावण्यरसयुक्तत्वादयः मुख्यार्थाः। सौन्दर्यादयश्च उपचरिताः अर्थाः। उपचरितार्थस्वीकारे लक्षणा (भक्तिः) सहकारिणी। किन्तु अत्र लक्षणोपयोगे किञ्चिदपि प्रयोजनं नास्ति। अतः अत्र ध्वनेः प्रवृत्तिः न।

**मुख्यां वृत्तिं परित्यज्य गुणवृत्त्यार्थदर्शनम्।**

**यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः ॥ १७ ॥**

शब्दः यदि मुख्यवृत्तिम् (अभिधाम्) परित्यज्य गुणवृत्त्या (लक्षणया) लक्ष्यार्थं बोधयति

**अन्वयः** - मुख्यां वृत्तिं परित्यज्य गुणवृत्त्या अर्थदर्शनं शब्दः यत् फलं उद्दिश्य तत्र स्खलद्गतिः न एव।

मुख्यां वृत्तिम् = अभिधाव्यापारम्, परित्यज्य = परिसमाप्य; गुणवृत्त्या = लक्षणरूपया अप्रधानवृत्त्या, अर्थदर्शनम् = अमुख्यस्य अर्थस्य प्रत्यायनम्; यत् फलम् (प्रयोजनरूपम्) उद्दिश्य क्रियते; तत्र = तस्मिन् प्रयोजने (तद्विषये द्वितीयव्यापारे); शब्दः, न स्खलद्गतिः = न लाक्षणिकः।

अर्थात् शब्दः मुख्यार्थबाधे मुख्यार्थं परित्यज्य लक्ष्यार्थं बोधयति। तत्र शब्दः लाक्षणिकः। लक्ष्यार्थबोधनफलं पुनः प्रयोजनम्। प्रयोजनबोधनवेलायां शब्दः लाक्षणिकः न भवति (न स्खलद्गतिः) तत्र

मुख्यार्थबाधस्य अभावात्। तथाविधे द्वितीयेऽपि व्यापारे कस्यापि प्रयोजनान्तरस्य अन्वेषणम्, तेन च मुख्यार्थबाधकल्पनम्, तेन च लक्षणाङ्गीकारः भवेत्, तदानीम् अनवस्थाप्रसङ्गः। तृतीये, चतुर्थे अन्ततः प्रयोजनान्तरान्वेषणपुरस्सरं लक्षणाङ्गीकारापत्तेः। तदेवोक्तं वृत्तिकृता यथा - तत्र हि चारुत्वातिशयप्रकाशनलक्षणे प्रयोजने कर्तव्ये यदि शब्दस्य अमुख्यता (लक्ष्यार्थं स्वीकारपत्तिः) तदा तस्य (शब्दस्य) प्रयोगे दुष्टता एव स्यात्। न चैवम्। प्रयोजनविषये लक्षणाप्रसक्तिर्नास्ति इति भावः अतः भक्तिः ध्वनिलक्षणं न भवति। इत्थमतिव्याप्तिप्रकारं संसूच्य उपसंहरति ध्वनिकारः यथा--

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**

**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥ १८॥**

**अन्वयः** - वाचकत्वाश्रयणैव गुणवृत्तिः व्यवस्थिता व्यञ्जकत्वैकमूलस्य ध्वनेः लक्षणं कथं स्यात्।

वाचकत्वाश्रयणैव गुणवृत्तिः व्यवस्थिता

वाचकत्व + आश्रयेणैव = अभिधाव्यापारस्य आश्रयणेन (अनुसरणेन) एव ; व्यवस्थिता; गुणवृत्तिः = भक्तिः (लक्षणा); व्यञ्जकत्वैकमूलस्य = व्यञ्जकत्वमात्राश्रितस्य; ध्वनेः कथं लक्षणं स्यात्।

गुणवृत्तिः अथवा लक्षणा अथवा भक्तिः अभिधापुच्छभूता। सा अभिधामेव आश्रित्य तिष्ठति। यतः अभिधामाश्रित्य तस्य बाधे एव लक्षणायाः उत्थानम्। ध्वनिः पुनः व्यञ्जनाव्यापारात्मा। अतः भिन्नविषययोः भक्तिध्वन्योः लक्ष्यलक्षकभावः न सिद्ध्यति। अतः भक्तिः ध्वनेर्लक्षणं न भवति।

### 2.4.3.1. अव्याप्तिदोषनिरूपणम्

इत्थमतिव्याप्तिदोषकारणतः भक्तेः ध्वनिलक्षणत्वं निरस्य अव्याप्तिदोषमपि प्रदर्शयन् वदति ध्वनिकारः यथा-

"अव्याप्तिरप्यस्य लक्षणस्य"। न हि ध्वनिप्रभेदः विवक्षितान्यपरवाच्यलक्षणः अन्ये च बहवः तद्भेदप्रकाराः भक्त्या व्याप्यन्ते"।

"अव्याप्तिरप्यस्य लक्षणस्य"

**"भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।**

**अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया॥**

इति कारिकायां लक्षणत्वे दोषद्वयमतिव्याप्त्यव्याप्तिरूपं भवतीति प्रतिपादितवान्। अव्याप्तिदोषो यथा यदि भक्तिः ध्वनिलक्षणत्वेन स्वीक्रियते तर्हि अव्याप्तिदोषोऽपि भवति। तथाहि -

लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। भक्तेः ध्वनिलक्षणत्वे ध्वनिस्थलेषु सर्वत्रापि भक्तिः स्यात्। यत्र यत्र ध्वनिः तत्र तत्र भक्तिः इति वक्तव्यं भवति । अतः क्वचित् ध्वनिलक्ष्ये एव भक्तेः अदृश्यमानत्वे अव्याप्तिदोषः। ध्वनिभेदयोः अविवक्षितवाच्ये (लक्षणामूले) ध्वनौ भक्तिः अस्ति। "सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः" इति अविवक्षितवाच्यध्वनेः उदाहरणे लक्षणामूलध्वनित्वं प्रदर्शितपूर्वमेव।

द्वितीयभेदे विवक्षितान्यपरवाच्य-रूपे भक्तिः नास्ति

किन्तु द्वितीयभेदे विवक्षितान्यपरवाच्यरूपे भक्तिः नास्ति। बहुप्रकारेषु विवक्षितान्यपरवाच्यध्वनिभेदेष्वपि भक्तिः नास्ति। अतः अव्याप्तिदोषः। अत एव च भक्तिः ध्वनेः लक्षणं न भवति।

**कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्॥**

अयमर्थः - कस्यचित् ध्वनिभेदस्य सा = भक्तिः उपलक्षणं भवेत्।

ध्वनिप्रभेदाः बहवः अग्रे कथयिष्यन्ति। तेषु वक्ष्यमाणप्रभेदेषु अन्यतमस्य कस्यचित् भेदस्य भक्तिः उपलक्षणं भवेत् यत्र ध्वनिर्भवति तत्र भक्तिरप्यस्तीति वक्तव्यं भवति। तावता किं साध्यते? भक्तेः ध्वन्युपलक्षणत्वानङ्गीकारे च किं नश्यति ? अतः कस्यचित् ध्वनिभेदस्य भक्तिः उपलक्षणं भवति।

### 2.4.4. ध्वनिलक्षणस्य अयत्नसिद्धित्वम्

गुणवृत्त्या एव ध्वनिर्लक्ष्यते, गुणवृत्तिश्च पूर्वमेव प्राचीनैः लक्षिता इति वादमङ्गीकुर्वन्निव वदति ध्वनिकारः यथा -

**लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः ॥ १९ ॥**

अस्य = अस्य ध्वनेः, लक्षणे, अन्यैः = प्राचीनैः कृते सति, नः (ध्वनिवादिनाम्); पक्ष संसिद्धिः + एव = पक्षस्य (वादस्य) संसिद्धिरेव।

वदति च वृत्तिकारः अमुमेव विषयं यथा- कृतेऽपि वा पूर्वैः ध्वनिलक्षणे पक्षसंसिद्धिरेव नः। यस्मात् ध्वनिरस्तीति नः पक्षः। स च प्रागेव संसिद्ध इति अयत्नसम्पन्नसमीहितार्थाः स्मः।

### 2.4.5. ध्वनेः अलक्षणीयतावादस्य खण्डनम्

ध्वनिकारः अलक्षणीयतावादनिराकरणप्रस्तावमपि न करोति

ग्रन्थारम्भे ध्वनिकारः ध्वनिव्यतिरेकि वादत्रयं दर्शयामास। अभाववादः भाक्तवादः। अलक्षणीयतावादश्चेति। अभाववादं भाक्तवादञ्च एतावत्पर्यन्तं निराकृतवान्। अनेनैव अलक्षणीयतावादोऽपि निराकृतः। अत एव ध्वनिकारः अलक्षणीयतावादनिराकरण-प्रस्तावमपि न करोति।

वृत्तिकारः कण्ठतः तन्निराकरणं प्रदर्शयितुमाह यथा- "येऽपि सहृदयहृदयसंवेद्यम् अनाख्येयमेव ध्वनेरात्मानम् आम्नासिषुः, तेऽपि न परीक्ष्यवादिनः। यतः उक्तया रीत्या वक्ष्यमाणया च ध्वनेः सामान्यविशेषलक्षणे प्रतिपादिते कश्चनाख्येयत्वं तत्सर्वेषामपि वस्तूनां तत् प्रसक्तम्" इति।

अयं भावः ध्वनिलक्षणं सामान्यतः उक्तपूर्वम्। विशेषतश्च वक्ष्यमाणमस्ति। ध्वनिप्रभेदाश्च बहुप्रकारः लक्ष्यन्ते उदाह्रियन्ते च। ध्वनिलक्षणञ्च-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

**व्यक्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**

अनेन अनिर्वचनीयतावादोऽपि खण्डितः।

## Summarised Overview

ध्वनिः अविवक्षितवाच्यः(लक्षणामूलध्वनिः), विवक्षितान्यपरवाच्यश्च (अभिधामूलध्वनिः) इति द्विप्रकारः। ध्वनिकारस्तु ध्वनिर्भक्त्या भिन्न एव इति सप्रमाणं प्रकाशयति। केचन विद्वांस भाक्त एव ध्वनिरिति प्रतिपादयन्ति। तत्र त्रयः पक्षाः सम्भवन्ति । भक्तिरेव ध्वनिः इति प्रथमः पक्षः, ध्वनिः भक्तेरेव लक्षणम् इति द्वितीयः कल्पः, ध्वनिः भक्तेरुपलक्षणं सङ्केतकमिति तृतीयः पक्षः।

किं भक्तिः ध्वनेः पर्यायवाची यथा घटकलशौ यद्यपि पृथक् शब्दो तथापि समानार्थवाचिनो तथैव किं भक्तिः ध्वनिश्च किं समानार्थं वाचयतः। न इति तन्निराक्रियते, स्वरूपभेदात्। ध्वनिस्तु चमत्कार-रूपिणी तथा च शब्दार्थव्यापारः व्यङ्ग्यकाव्यभेदेन पञ्चधा, न च तथा भक्तिः। ध्वनिः भक्तिरेव ध्वनेर्लक्षणमिति द्वितीयः पक्षः- न इति वक्ष्यते। न हि भक्तिः ध्वनेर्लक्षणम्। लक्षणन्त्वसाधारणधर्म-कथनम्। नहि भक्तिः ध्वनेरसाधारणं धर्म। तथा च अतिव्याप्ति-अव्याप्तिवशान्नैतद् ध्वनेर्लक्षणमित्युच्यते-नैव भक्त्या ध्वनिर्लक्ष्यते। तेन क्वचिदतिव्याप्तिः, क्वचिच्चाव्याप्तिः। लक्ष्ये व्यापित्वे सत्यपि तदितरव्यापित्वमतिव्याप्तिः, लक्ष्यैकदेशव्यापित्वमव्याप्तिः इत्युभयोर्लक्षणम्। क्वचित् सत्यपि लक्षणायां न ध्वनिरिति अतिव्याप्तिः। क्वचिच्च सत्यपि ध्वनौ न लक्षणा इति अव्याप्तिः।

भाक्तार्थबोधिका भक्तिः ध्वनेः विषयः इत्येव प्रकारान्तरेणापि प्रकाशयति। लक्षणा तु द्विविधा - रूढा, प्रयोजनवती च। तथा च ध्वनिप्रकाशिका व्यञ्जना एव। रूढा लक्षणायान्तु ध्वनेर्नितरामभाव एव। व्यञ्जनायाऽसत्त्वात्। तथा च प्रयोजनवत्यां लक्षणायां यत्र कुत्रचित् ध्वनिरस्त्यपि तत्रापि तस्याः प्रतीतिः व्यञ्जनया एव भवति न तु लक्षणया। इति उभयोरेव भेदयोः ध्वनेरसद्भावः कथ्यते।

तेषु लावण्यादिषु शब्देषु उपचरिता गौणी शब्दवृत्तिस्त्वस्ति परन्तु न हि तत् ध्वनेर्विषयः। एवंविधेषु यत्र कुत्रचित् चारुत्वं सदपि न हि तच्छब्दद्वारा प्रकाशितो भवति प्रकारान्तरेणैव तस्य सत्ता सम्भवति इति स्पष्टमेव।

अलक्षणीयतावादिनः - ध्वनेर्लक्षणं न कर्तुं शक्यते इति तु निरस्तमेव। यतः ध्वनिकारेण तस्य लक्षणं दत्तम्। यथा -

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**

व्यङ्गः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥ इति ।

## Assignments

**I. उत्तरं लिखत ।**

1. कृशाङ्ग्य सन्तापं वदति बिसनीपत्रशयनम् अत्र कया वृत्या अर्थबोधः ज्ञायते ?
2. शब्दो नैव स्खलद्गतिः इत्यत्र अभिप्रायः कः ?
3. के त्रयः पुरुषाः सुवर्णपुष्पां पृथिवीं चिन्वन्ति ?
4. उद्योतशब्दस्य कोऽर्थः?

**II. टिप्पणिं लिखत ।**

1. ध्वनेः भक्त्यन्तर्भूतत्वं खण्डयता ।
2. अलक्षणीयतावादस्य खण्डनं कृत्वा, ध्वनिलक्षणं प्रतिपादयत ।
3. "भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः ।

   अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया ॥ व्याख्यानं कुरुत ।
4. उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन् ।

   शब्दो व्यञ्जकतां बिभ्रत् ध्वन्युक्तेर्विषयी भवेत् ॥ व्याख्यानं कुरुत ।
5. रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।

   लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः ॥ व्याख्यानं कुरुत ।

**III. निबन्धात्मकप्रश्नानाम् उत्तरं लिखत ।**

1. 'भाक्तमाहुस्तमन्ये' इति पक्षं निषिध्य ध्वनिलक्षणाया अविषयः इति सम्यक् प्रतिपादयत ।
2. नहि भक्तिः ध्वनेर्लक्षणमिति धन्यालोककारमतं पुरस्कृत्य स्पष्टीक्रियताम् ।

## Suggested Readings


1. Dhvanyaloka with Locana and Balapriya, Chaukhamba Sanskrit Samsthan, Varanasi, 2015

2. Dhvanyaloka with Alacanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
3. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and Patwardhan, Harvard University Press, Cambridge, London, 1990,
4. History of Sanskrit Poetics, P.V.Kane, Motilal Banarsidass, New Delhi, 1987
5. Dhvanyaloka, Ed.C.M.Neelakanthan, Cultural Heritage, Hill Palace, Thripunithura, 2011
6. Dhvanyaloka with Locana commentary (First Udyota by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018.
7. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968.

## References

1. आनन्दवर्धनः, ध्वन्यालोकः, व्याख्याता अभिनवगुप्तः लोचनम्, केंब्रिड्ज् हार्वाई सर्वकलाशालाप्रस्, १९९० ।
2. नीलकण्ठशास्त्री, ध्वन्यालोकोज्जीवनी, केरलविश्वविद्यालयः, तिरुवनन्तपुरम्, १९८१
3. ध्वन्यालोकः, प्रथमद्वितीयौ उद्योतौ
4. ध्वन्यालोकप्रकाशिका, श्राराजेन्द्रप्रसादः कोठ्यारी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२३
5. श्रीमदानन्दवर्धनाचार्यविरचितः, ध्वन्यालोकः, व्याख्याकारः शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन्, वाराणसी, २०२०

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# ध्वन्यालोकद्वितीयोद्योतः

## BLOCK - 3

SGOU

UNIT 1

# ध्वनिभेदाः - लक्षणामूलध्वनिः - अविवक्षितवाच्यध्वनिः - तस्य भेदद्वयम्, अभिधामूलध्वनेः विवक्षितान्यपरवाच्यध्वनेः भेदद्वयम्

## Learning Outcomes

- ध्वनिभेदान् जानाति।
- अविवक्षितवाच्यध्वनेः स्वरूपान् सोदाहरणं अवगच्छति।
- विवक्षितवाच्यध्वनेः स्वरूपान् सोदाहरणं अवगच्छति।

## Background

ध्वन्यालोकस्य रचयिता भवति आनन्दवर्धनाचार्यः। प्रकृते ध्वन्यालोकनामके ग्रन्थे एव सर्वप्रथममाचार्य आनन्दवर्धनः ध्वनितत्त्वस्य काव्यात्मत्वं प्रतिपादयामास। आचार्य आनन्दवर्धनः प्राह - प्राचीनाः ये कवयः सन्ति तेषां काव्येषु ध्वनेः सद्भावः समुपलभ्यते, विपुलतया, अथापि तस्य ध्वनेः विवेचनं काव्यात्मरूपेण नहि कृतं केनापि। ध्वनिस्तु व्यङ्ग्यार्थस्वरूपो भवति। विना व्यङ्ग्यमर्थं काव्ये चारुत्वं न ह्यायाति। ध्वनिना काव्येषु तथाविधश्चमत्कारः समुत्पद्यते येन सहृदयानां हृदयान्याप्यायितानि भवन्ति। अस्य ध्वनितत्त्वस्यैव काव्यात्मत्वप्रतिपादनाय आनन्दवर्धनाचार्यः चतुर्षुद्योतेषु ध्वन्यालोकनामकस्यास्य ग्रन्थस्य निबन्धनमकरोत्। तत्र ध्वन्यालोकस्य प्रथम उद्योते ध्वनिकारः प्रतिपादयामास यद् ध्वनिरेव काव्यस्यात्मा वर्तते। तत्र त्रिसंख्याकानां ध्वनिविरोधिनां मतान्यपि खण्डितवान् ध्वन्यालोककारः। तदनन्तरं स ध्वनेः स्वरूपं निरूपयित्वा तस्य वस्त्वलङ्काररसादिभेदेन त्रैविध्यं निरूपयामास। पुनः प्रतीयमानस्य रसस्यैव काव्यात्मत्वं प्रतिपादयामास। प्रथमे एवोद्योते अस्याप्यर्थस्य निरूपणमकार्षीद् यद् ध्वनेः कस्मिंश्चिदप्यलङ्कारेऽन्तर्भावो भवितुं नार्हति। तेन स्पष्टीकृतं यद् ध्वनिरेको महान् विषयो वर्तते। अत एव तस्य अवरकोटिकेषु अलङ्कारादिषु कुत्रापि नान्तर्भावो भवितुमर्हति। ध्वनेः मूलस्य निरूपणं

कुर्वता आनन्दवर्धनाचार्येण प्रतिपादितं यत् ध्वनेः सिद्धान्तस्य मूलं वैयाकरणानां स्फोटसिद्धान्त एव वर्तते। प्रथमोद्योतस्यान्ते ध्वनिकारः प्रतिपादयामास यत् ध्वनेः लक्षणायां वा गौण्यां वापि नान्तर्भावो भवितुमर्हति।

अत्र ध्वन्यालोकस्य द्वितीय उद्योते ध्वनेः विविधभेदानां सोदाहणं निरूपणं कृत्वा ध्वनिकारः तस्य व्यङ्ग्यमुखेन निरूपणं करोति। तस्मिन् उद्योते ध्वनेर्ये अष्टादशसंख्याकाः भेदाः प्रदर्शिता तेषां वर्ण-पद-पदांश-वाक्य-वाक्यांश-सङ्घटना-प्रबन्धानां चापि द्योतकता भवति। अनेन प्रकारेण तेषां समेषां भेदानां शुद्ध सङ्कीर्ण-सङ्करभेदैश्च ध्वनेः अनेके भेदाः भवन्ति। अस्मिन् एकके तदधिकृत्य विचारयामः।

## Keywords

अविवक्षितवाच्यध्वनिः, विवक्षितवाच्यध्वनिः, वाच्यार्थः, व्यङ्ग्यः, लक्षणामूलध्वनिः, अर्थान्तरसंक्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिः, संलक्ष्यक्रमध्वनिः, असंलक्ष्यक्रमध्वनिः

## Discussion

यत्र शब्दः अर्थो वा स्वार्थौ अप्रधानीकृत्य कञ्चिदन्यमेवार्थं विशेषचमत्कारकारकम् अभिव्यञ्जयति तत्रैव ध्वनेर्विषयः। तद् ध्वनितत्त्वम् अविवक्षितवाच्य-विवक्षितान्यपरवाच्यभेदेन द्विविधम्। तयोर्लक्षणे तु लक्ष्यस्थाभिधेयार्थेनैव स्पष्टे। यथा - यत्र वाच्यार्थः विवक्षितः न भवति तत्र अविवक्षितवाच्यः। यत्र च वाच्यार्थः विवक्षितः सन् अन्यमर्थं बोधयति अथवा यः वाच्यार्थद्वारा अन्यार्थस्य प्रतीतिः तत्र च विवक्षितान्यपरवाच्यध्वनिः। अविवक्षितवाच्यध्वनिरेव लक्षणामूल-ध्वनिः विवक्षितवाच्यध्वनिस्तु अभिधामूलध्वनिः।

अविवक्षितवाच्यस्य लक्षणामूलत्वात् प्रथमं लक्षणा एव प्रथमं ज्ञातव्यम्। तत्र लक्षणालक्षणम्।

**मुख्यार्थबाधे तद्योगे रूढ़ितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽरोपिता क्रिया॥**

लक्षणा

अस्यार्थः - १. मुख्यार्थबाधे २. तत्सम्बद्धे कस्मिश्चिदर्थे ३. रूढ़िवशाद् प्रयोजनवशाद्वा वाच्यार्थः पर्यवस्यति तत्र लक्षणा भवति। तत्र सादृश्यः सम्बन्धाद् यत्र लक्ष्यार्थबोधः तत्र गौणी लक्षणा तदितरसम्बन्धाच्च या लक्षणा सा शुद्धा। इतरसम्बन्धास्तु -

**अभिधेयेन संयोगात् सामीप्यात् समवायतः।**
**वैपरीत्यात् क्रियायोगाल्लक्षणा पञ्चधा मता॥**

शुद्धा लक्षणाया अपि द्वौ भेदौ -

**स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥**

तत्र च कुन्ताः प्रविशन्ति इत्यत्र उपादानलक्षणा, गङ्गायां घोषः इत्यत्र च लक्षणलक्षणा। एवंविधलक्षणाभेदेभ्यः कुत्रचित् व्यञ्जनया कश्चिच्चमत्कारकारी अर्थः प्रतीयते अविक्षितवाच्यध्वनिः।

## पाठभागः

**एवमविवक्षितवाच्यविवक्षितान्यपरवाच्यत्वेन ध्वनिर्द्विप्रकारः प्रकाशितः। तत्राविवक्षितवाच्यस्य प्रभेदप्रतिपादनायेदमुच्यते-**

ध्वनिं द्विधा विभजते

ध्वनौ वाच्यार्थस्य स्थितिमादाय अविवक्षितवाच्यध्वनिः विवक्षितान्यपरवाच्यध्वनिरिति द्विविधः सामान्येन विभजते।

**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।**
**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥ १॥**

**अन्वयः** - अर्थान्तरे सङ्क्रमितम् अत्यन्तं वा तिरस्कृतम् अविवक्षितवाच्यस्य ध्वनेः वाच्यं द्विधा मतम्।

अर्थान्तरसङ्क्रमितवाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिरिति अविवक्षितवाच्यध्वनेः द्वौ भेदौ भवतः।

**तथाविधाभ्यां च ताभ्यां व्यङ्ग्यस्यैव विशेषः। तत्रार्थान्तरसङ्क्रमितवाच्यो यथा-**

अयं ध्वनिः एतस्मिन् प्रयुक्तं वाच्यम् अनुसृत्य द्विविधो भवति। यत्र ध्वनौ प्रयुक्तः वाच्यार्थः अनुपपन्नत्वाद् अत्यन्तं तिरस्कृतः भवति स ध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः। यत्र च ध्वनौ वाच्यार्थः अनुपयुक्तत्वाद् अर्थान्तरे संक्रमितः भवति स ध्वनिः अर्थान्तरसंक्रमितवाच्यध्वनिः।

अविवक्षितवाच्यध्वनेः द्वौ भेदौ भवतः

अर्थस्तु स्पष्टमेव। अत्र सङ्क्रमिततिरस्कृत इत्युभावेव णिजन्तत्वात् कर्तृ सापेक्षौ प्रयोगौ दृश्येते। तत्र कर्ता सहकारी वा लक्ष्यार्थ एव अत एव प्रथममेव लक्षणाया स्वरूपं प्रतिपादितमस्माभिः।

वक्तुं योग्यं वाच्यमभिधया बोध्यमित्यर्थः। तद्वाच्यम् अर्थान्तरे संक्रमितं तथा अत्यन्तं तिरस्कृतं वेति द्विधा वर्तते। अर्थान्तरसंक्रमितमित्यत्र संक्रमितमिति पदेनेदमुच्यते वाच्यम् अर्थान्तरे संक्रान्तन्न भवति प्रत्युत संक्रमितं वर्तते। अत्र प्रयुक्तेन णिचा प्रयोजककर्ता अपेक्षते। प्रयोजककर्ता चात्र व्यञ्जनाव्यापारे यः सहकारिवर्गः अर्थात् वक्तृविवक्षादिः। विना तत्सहायेन वाच्यम् अर्थान्तरे न सङ्क्रामति। अत्यन्ततिरस्कृतपदेऽपि तिरस्कृतशब्देन तदेव गृह्यते। येन वाच्येन सता अविवक्षितवाच्यो ध्वनिः व्यपदिश्यते तद्वाच्यम् अर्थान्तरे सङ्क्रमितम् अत्यन्तं वा तिरस्कृतमिति द्विधा विभजते। व्यङ्ग्यात्मनो यदा ध्वनेर्भेदः निरूप्यते तदा वाच्यस्य द्विधा इति भेदकथनं न युज्यते इति आशङ्क्य तथाविधाभ्यां च ताभ्यां व्यङ्ग्यस्यैव प्राधान्यमित्युक्तम्। व्यञ्जकवैचित्र्याद्धि व्यङ्ग्यवैचित्र्यं युक्तम्। एवञ्च अर्थान्तरसङ्क्रमित-वाच्यध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिरिति अविवक्षितवाच्यध्वनेः द्वौ भेदौ भवतः इति कारिकार्थः।

## उदाहरणम्

**स्निग्धश्यामलकान्तालिप्तवियतो वेल्लद्बलाका घना**
**वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।**
**कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे**
**वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव॥**

**अन्वयः** - स्निग्धश्यामलकान्तालिप्तवियतः वेल्लद्बलाका घना, वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः, कामं सन्तु कठोरहृदयः रामः अस्मि, अहं दृढं सर्वं सहे वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव।

व्यङ्ग्तया प्रयोजनरूपं रामशब्दः परिणमति

अत्र वक्तरि रामे सत्यपि यत् रामोऽस्मि इत्युक्तम् तत्र -

अस्मि इत्यनेनैव प्रतीतिः अथवा अहमस्मि इत्यनेन भवितव्यम् तेन राम-शब्दस्यानुपपत्तिः ततश्च लक्षणा कठोरहृदयो इत्यस्यैव विशेषत्वं बोधयति। रामः पितृवियोग- राज्यच्युति- वनवास- जटाचीरधारणादि विविधदुःखसहनाद् अन्त्यन्तकठोरहृदयः इति एव अर्थ परिणमते। तेनात्र अविवक्षितवाच्यस्य अर्थान्तरसङ्क्रमितंवाच्यध्वनिः। तदेव बोधयति ध्वनिकारः पुनः स्वविषमबाणलीलाकाव्यस्य एकेनार्थेन दृढयति।

### द्वितीयमुदाहरणम् -

**तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।**
**रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि॥**

**अन्वयः** - ते गुणाः यदा सहृदयैः गृह्यन्ते तदा गुणाः जायन्ते। रविकिरणानुगृहीतानि कमलानि कमलानि भवन्ति।

द्वितीयः कमलशब्दः अर्थान्तरसंक्रमितवाच्यः

तदा गुणाः गुणाः जायन्ते यदा ते गुणाः सहृदयैः गृह्यन्ते। अर्थान्तरन्यासद्वारा एषः आशयः एवं समर्थ्यते - रविकिरणानुगृहीतानि रविकिरणैः सूर्यरश्मिभिः अनुगृहीतानि प्रसादितानि कमलानि पद्मानि कमलानि पद्मानि भवन्तीति सामान्योऽर्थः। अत्र प्रयुक्तस्य द्वितीयकमलशब्दस्यापि पद्मरूपे अर्थे स्वीकृते पुनरुक्तिशङ्का उदेति।


SGOU watermark

एकस्यैव शब्दस्य तस्मिन्नेवार्थे पुनः प्रयोगः पुनरुक्तिः। अयं दोषः अस्ति। अतः अत्यन्तशोभातिशयित्वाकर्षणीयत्वादिषु असंख्यवैचित्र्यापादकेषु धर्मान्तरेषु परिणतस्य कमलरूपस्यार्थस्य प्रकाशनं सञ्जायते। प्रथमार्धे प्रयुक्तः गुणशब्दः केवलं संज्ञिनं प्रत्याययति । पूर्वस्मिन् श्लोके (प्रथमोदाहरणे) शुद्धे मुख्ये अर्थे अर्थात् दाशरथिरूपे अर्थे धर्मिणि तेषाम् अर्थानां समवायसम्बन्धेन वर्तमानता। अतः रामशब्दः धर्मान्तरे परिणतमर्थं लक्षयति। असाधारणानि अशब्दवाच्यानि धर्मान्तराणि व्यङ्ग्यानि। एवमत्रापि द्वयोरुदाहरणयोः मुख्यार्थस्यानुपयोगात् बाधा। अत एव एतद्द्वयमपि अर्थान्तरसङ्क्रमितवाच्यस्योदाहरणम्।

### अत्यन्ततिरस्कृतवाच्यध्वनिः -

**अत्यन्ततिरस्कृतवाच्यो यथादिकवेर्वाल्मीकेः -**

यत्र शब्दः स्वार्थं सर्वथा परित्यज्य स्वभिन्नं कञ्चिदन्यमेवार्थं बोधयति तत्र अत्यन्ततिरस्कृतवाच्यध्वनिः।

अत्यन्तं तिरस्कृतं वाच्यं यत्र स ध्वनिः

अविवक्षितवाच्यध्वनेः द्वितीयः भेदः भवति अत्यन्तरतिरस्कृत वाच्यध्वनिः। अत्यन्तं तिरस्कृतं वाच्यं यत्र स ध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिः। तिरस्कृतत्वात् नाम वाच्यार्थस्य अत्यन्तमनुपपद्यमानत्वात् तत्रादराभावात् असत्कल्पत्वम्। वाच्यार्थस्य अनुपद्यमानता मुख्यार्थबाधायाः बीजम्। पूर्वस्मिन् भेदे वाच्यार्थस्यानुपयोगिता मुख्यार्थबाधायाः निमित्तम्। अमुमेव मम्मटभट्टादयः आचार्याः जहत्स्वार्थारूपलक्षणामूलः ध्वनिरिति सूचयन्ति। अजहत्स्वार्थालक्षणा जहत्स्वार्था लक्षणा च यथाक्रमम् उपादानलक्षणा लक्षणलक्षणेति नामान्तरेणापि व्यपदिश्येते । तत्र उपादानलक्षणायां धर्मी तिरस्क्रियते इति नास्ति। लक्ष्यार्थव्यङ्ग्यार्थयोः ज्ञाने धर्मिविषयमपि ज्ञानम् अनुप्रविष्टम्। अतः तिरस्कारः धर्मस्यैवाभीष्टः। न तु धर्मिणः। धर्मी तथैव स्थित्वा अनेकव्यङ्ग्यधर्मान्तरैः परिणतरूपेण प्रतीयते। अत्यन्ततिरस्कृतवाच्ये तु धर्मिणः

अन्वये तज्ज्ञाने वा प्रवेशो न भवति। धर्मी अर्थान्तरम् उपलक्ष्य पलायते। तदुक्तं लोचनाख्यव्याख्यायामभिनवगुप्तपादाचार्येण-

**यथा-**

"यस्तु अनुपपद्यमानम् उपायतामात्रेणार्थान्तरप्रतिपत्तिं कृत्वा पलायित इव स तिरस्कृत इति" इति। एवञ्च यत्र वाच्यार्थस्य अत्यन्तमनुपपद्यमानत्वात् अत्यन्तं तिरस्कारेणार्थान्तरं प्रतीयते प्रतीतस्य अर्थस्य प्रधानतायाञ्च ध्वनिः अत्यन्ततिरस्कृतवाच्यध्वनिरिति व्यपदिश्यते।

## उदाहरणम्

> **रविसङ्क्रान्तसौभाग्यस्तुषारावृतमण्डलः।**
> **निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते॥**

इइ हेमन्तवर्णने पञ्चवट्यां रामस्योक्तिरियम्। अन्ध इति चोपहतदृष्टिः। जात्यन्धस्यापि गर्भे दृष्ट्युपघातात्। अन्धोऽयं पुरोऽपि न पश्यतीत्यत्र तिरस्कारोऽन्धार्थस्य न त्वत्यन्तम्। इह त्वादर्शस्यान्धत्वमारोप्यमाणमपि न सह्यमिति। अन्धशब्देऽत्र पदार्थस्फुटीकरणाशक्तत्वं न दृष्टिगतं निमित्तीकृत्यादर्शं लक्षणया प्रतिपादयति। असाधारणविच्छायत्वानु-पयोगित्वादिधर्मजातमसंख्यं प्रयोजनं व्यनक्ति। आदर्शचन्द्रमसोर्हि सादृश्यमिवशब्दो द्योतयति। निःश्वासान्ध इति चादर्शविशेषणम्। इवशब्दस्यान्धार्थेन योजने आदर्शश्चन्द्रमा इत्युदाहरणं भवेत्। योजनं चैतदिवशब्दस्य क्लिष्टम्। न च निःश्वासेनान्ध इवादर्शः स इव चन्द्र इति कल्पना युक्ता। अत्र अन्धशब्दः स्वार्थं सर्वथा परित्यज्य अप्रकाशकरूपं विशिष्टमेवार्थं बोधयति । स्वार्थस्य सर्वथा त्यागादत्र अत्यन्ततिरस्कृत रूपमर्थं बोधयति। तथा च

अत्र अन्ध शब्दः स्वार्थं सर्वथा परित्यज्य अप्रकाशकरूपं विशिष्टमेवार्थं बोधयति

> **गगनं मत्तमेघं धारालुलितार्जुनानि च वनानि।**
> **निरहङ्कारमृगाङ्का हरन्ति नीला अपि निशा॥**

इति संस्कृतच्छाया। मेघसंश्लिष्टनभोऽपि, धारावृष्टिकम्पितार्जुनवनान्यपि चन्द्ररहिता रात्रयोऽपि मनांसि हरन्त्येव इत्यर्थः।

अत्र न केवलं नक्षत्रं चन्द्रमसा वा शोभितं नभः किन्तु मेघच्छन्नमपि न केवलं शीतलमन्दसुगन्धयुक्तं पुष्पैः शोभमानमुद्यानमपि तु कण्टकाकीर्णं वृक्षैरावृतं वनमपि, न केवलं पूर्णचन्द्रमसौ ज्योत्स्नया शोभिता निशा अपि तु अन्धकाराच्छन्ना अपि शोभत एव इत्यर्थः पर्यवस्यति।

निरहङ्कारशब्दःस्वार्थमत्यन्तं तिरस्कृत्य विच्छायत्वं द्योतयति

तथा हि मत्तः इत्यत्र मेघविशेषणतत्वे सति अत्यन्तं तिरस्कृतम्। तथा च गभीरत्वं दुर्निवारत्वं च प्रकाशयति तथा च निरहङ्कारशब्दः मृगाङ्केन समस्तः सत् बहुव्रीहिसमासद्वारा निशाया विशेषणं सत्। स्वार्थमत्यन्तं तिरस्कृत्य विच्छायत्वं द्योतयति।

अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतभेदेन ध्वनिर्द्विविधा। यत्र शब्दः स्वार्थं किञ्चिद्वैशिष्ट्येन द्योतयन् अर्थान्तरं प्रकाशयति तत्र अर्थान्तरसंक्रमितवाच्यध्वनिः। यत्र च शब्दः स्वार्थं सर्वथा परित्यज्य अर्थान्तरं प्रकाशयति तत्रात्यन्ततिरस्कृतवाच्यध्वनिः।

अत्यन्ततिरस्कृतवाच्यध्वनौ तु शब्दः स्वार्थं सर्वथा परित्यजति। स्वसम्बद्धमन्यमेवार्थं द्योतयति। अत्यन्ततिरस्कृतशब्देनैव तस्यार्थप्रकाशनत्वात् आचार्यो न तस्य पृथग्लक्षणमुक्तम्।

'गगनं च मत्तमेघं' इत्युदाहरणे मत्तनिरहङ्कारशब्दौ अत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणत्वं पोषयतः।

### विविक्षितान्यपरवाच्यध्वनेः भेदद्वयम्

विवक्षितान्यपरवाच्य ध्वनिः द्विधा भवति

विवक्षितान्यपरवाच्यध्वनिः अभिधामूलेति कथ्यते। तत्र अभिधेयार्थबोधानन्तरमेव व्यङ्ग्यार्थस्य प्रतीतिः सम्भाव्यते। अविवक्षितवाच्यध्वनिरिव विवक्षितान्यपरवाच्यध्वनिरपि द्विविधा भवति। तदेवोच्यते-

**असंलक्ष्यक्रमोद्यत क्रमेण द्योतितः परः।**

**विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः॥**

**मुख्यतया प्रकाशमानो व्यङ्ग्योऽर्थो ध्वनेरात्मा। स च वाच्यार्थापेक्षया कश्चिदलक्ष्यक्रमतया प्रकाशते, कश्चित्क्रमेणेति द्विधा मतः।**

विवक्षितान्यपरवाच्यध्वनिः द्विविधः असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्च। यत्र अभिधेयार्थस्य पश्चात् क्रमेण व्यङ्ग्यार्थस्य प्रतीतिः भवति तच्च क्रमः प्रत्यक्षतया लक्ष्यते तत्र संलक्ष्यक्रमव्यङ्ग्यः, तद्व्यतिरिक्तं असंलक्ष्यक्रमव्यङ्ग्यः।




## Summarised Overview

अस्मिन् एकके आनन्दवर्धनाचार्यस्य ध्वन्यालोकस्य द्वितीयोद्योते ध्वनेः प्रभेदान् विस्तरेण निरूपयति। तस्मिन्नेव क्रमे आद्यस्य अविवक्षितवाच्याख्यस्य ध्वनिप्रभेदस्य भेदान् अत्र सोदाहरणं निरूपयति। यस्मिन् ध्वनौ वाच्यम् अविवक्षितम् वर्तते स अविवक्षितवाच्यध्वनिरित्यर्थः। अविवक्षितत्वं च अनुपयोगित्वेन अनुपपन्नत्वेन वा सम्भवति। यत्र वाच्यम् अनुपयोगि तत्र अर्थान्तरसंक्रमितवाच्यध्वनिः सम्भवति। अन्यस्मिन् अर्थे संक्रमितं वाच्यं यत्र ध्वनौ स अर्थान्तरसंक्रमितवाच्यध्वनिर्भवति। 'स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलकाः घनाः' इत्यस्मिन् श्लोके रामशब्दः अर्थान्तरसंक्रमितः। अत्र रामशब्दस्य दशरथपुत्र इति वाच्यार्थः नोपयुज्यते। आत्मनो नाम केनापि नोच्यते अनुपयोगित्वात्। अतः रामशब्दः बाल्यात्प्रभृति अनेकदुःखसहनत्वादिरूपे अर्थान्तरे परिणतोऽस्ति। अतः अत्र अर्थान्तरसंक्रमितत्वम्। द्वितीयोदाहरणे - 'तदा जायन्ते गुणाः यदा ते सहृदयैर्गृह्यन्ते...' श्लोकेऽस्मिन् द्वितीयः कमलशब्दः अत्यन्तशोभातिशयत्वादिषु धर्मान्तरेषु परिणतः

भवति । प्रथमकमलशब्दस्य च वाच्यार्थे एव प्रयोगः। एवमयं श्लोकोऽपि अर्थान्तरसङ्क्रमितवाच्यस्य उदाहरणं भवति।

अविवक्षितवाच्यध्वनेः द्वितीयो भेदः अत्यन्ततिरस्कृतवाच्यध्वनिरिति । यत्र वाच्यम् अनुपपन्नत्वाद् अत्यन्तं तिरस्कृतं वर्तते सः अत्यन्ततिरस्कृतवाच्यध्वनिः। एतस्यापि उदाहरणं प्रदर्शितम् अस्ति।

'रविसंक्रान्तसौभाग्यस्तुषारावृतमण्डलः....' । अस्मिन् श्लोके अत्र अन्धशब्दस्य उपहतदृष्टित्वं वाच्यार्थः। स च आदर्शस्य विशेषेणरूपेण कल्पितः। आदर्शः जडं वस्तु। अन्धत्वं चेतनधर्मः अतः अत्रायमर्थः अत्यन्तमनुपपन्नः। अतः शब्दादस्माद् अत्यन्तविच्छायत्वाद्याः अर्थाः प्रतीयन्ते।

'गगनञ्च मत्तमेघं धारालुलितार्जनानि च वनानि ...........' इति द्वितीयमुदाहरणम्। अत्र मत्तनिरहङ्कारशब्दौ प्रकृते नितराम् अनुपपन्नौ। अत्र लक्षणया तत्सादृश्यरूपोऽर्थः प्रतीतो भवति।

विवक्षितान्यपरवाच्यध्वनिः अभिधामूलेति कथ्यते। विवक्षितान्यपरवाच्यध्वनिः द्विविधः असंलक्ष्यक्रमव्यङ्ग्यः, संलक्ष्यक्रमव्यङ्ग्यश्च । यत्र अभिधेयार्थस्य पश्चात् क्रमेण व्यङ्ग्यार्थस्य प्रतीतिः भवति तच्च क्रमः प्रत्यक्षतया लक्ष्यते तत्र संलक्ष्यक्रमव्यङ्ग्यः, तद्व्यतिरिक्तं असंलक्ष्यक्रमव्यङ्ग्यः।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तराणि लिखत।**

1. अविवक्षितवाच्यध्वनेः भेदद्वयं किम्?
2. अर्थान्तरसङ्क्रमितवाच्यध्वनिः कः?
3. अर्थान्तरसङ्क्रमितवाच्यध्वनेः द्वितीयमुदाहरणं किम्?
4. रामशब्दः कस्मिन्नर्थे परिणमति?
5. द्वितीयकमलशब्दः कुत्र परिणमति?
6. अत्यन्ततिरस्कृतवाच्यध्वनेः द्वितीयमुदाहरणं लिखत।
7. अत्यन्ततिरस्कृतवाच्यध्वनेः प्रथममुदाहरणं लिखत।
8. अन्धशब्दस्य वाच्यार्थः कः?
9. निरहङ्कारशब्दात् कोऽर्थः प्रतीयते?

**II. उत्तरयत**

1. अविवक्षितवाच्यध्वनेः भेदयोः लक्षणं लिखत।

2. ध्वन्यालोकानुसारं अर्थान्तरसंक्रमितवाच्यध्वनेः उदाहरणद्वयं निरूपयत।
3. ध्वन्यालोकानुसारं अत्यन्ततिरस्कृतवाच्यध्वनेः उदाहरणद्वयं निरूपयत।

## Suggested Readings


1. Dhvanyaloka with Alocanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
2. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and M V Patwardhan, Harvard University Press, Cambridge, London, 1990
3. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968.


## References


1. श्रीमदानन्दनर्धानाचार्यविरचितः ध्वनेयलोकः व्याख्या पण्डितः महादेवशास्त्री, चौखम्भा संस्कृत संस्थान् वारणसी, 2015
2. Dhvanyaloka with Locana commentary by Chattanath Achyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

UNIT 2

# रसध्वनेः अथवा असंलक्ष्यक्रमध्वनेः निरूपणम्, रसवदलङ्कारात् भेदः

## Learning Outcomes

- असंलक्ष्यक्रमध्वनिं सोदाहरणं अवगच्छति।
- असंलक्ष्यक्रमध्वनेः रसवदालङ्कारस्य च भेदं जानाति।
- रसवदालङ्कारविषये प्राचीनानां मतं पूर्वपक्षरूपेण अवगच्छति।

## Background

भवन्तः पूर्वस्मिन् एकके ध्वनेः अविवक्षितवाच्यरूपं प्रभेदम् अपठन्। एवञ्च ध्वनिः सामान्येन द्विविधः। अविवक्षितवाच्यः विवक्षितान्यपरवाच्यश्च। अविवक्षितः वाच्यः यस्मिन् स अविवक्षितवाच्यः। अविवक्षा चेयम् अनुपपन्नत्वेन अनुपयोगित्वेन वा भवति। एतदाधारेण चाविवक्षितवाच्यध्वनिः द्विविधः। यत्र वाच्यस्य अनुपपन्नत्वम् अस्ति तत्र अत्यन्ततिरस्कृतवाच्यो नाम प्रभेदः। यत्र च वाच्यस्य अनुपयोगित्वम् अस्ति तत्र अर्थान्तरसंक्रमितवाच्यो नाम प्रभेदः। 'रविसंक्रान्तसौभाग्य...' इत्यादिश्लोके प्रयुक्तस्य अन्धशब्दस्य वाच्यार्थः तत्र अत्यन्तम् अनुपपन्नः अस्ति इति अत्यन्ततिरस्कृतवाच्यस्य उदाहरणमपि भवान् अपठत्। एवमेव 'कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे' इत्यत्र प्रयुक्तस्य रामशब्दस्य वाच्यार्थः तत्र अनुपयोगि भवति इति अर्थान्तरसंक्रमितवाच्यस्य उदाहरणमपि भवान् अपठत्।

अविवक्षितवाच्यध्वनेः अन्यः विवक्षितान्यपरवाच्यध्वनिः अस्ति। अत्र ध्वनिभेदे वाच्यं वस्तु विवक्षितमपि व्यङ्ग्यनिष्ठं भवति। अन्यपरम् इत्यस्यं व्यङ्ग्यनिष्ठमित्येव अर्थः। यस्मिन् ध्वनिभेदे वाच्यं वस्तु प्रकृतोपयोगित्वेन विवक्षितमपि प्रतीयमानार्थपरं वर्तते स ध्वनिप्रकारः

विवक्षितान्यपरवाच्यध्वनिः उच्यते। भवन्तः असंलक्ष्यक्रमध्वनेः निरूपणं, रसवदद्यलङ्काराद् अस्य भेदः च सोदाहरणं च अस्मिन् एकके पठिष्यन्ति।

## Keywords

व्यङ्ग्यार्थः, वाक्यार्थः, शुद्धं, सङ्कीर्णं, अङ्गीभावः, वाच्यवाचकचारुत्वहेतवः, अंगं, त्रिपुरप्रभावातिशयः, चेतनानाम्, अचेतनानाम्, रसध्वनिः, रसवदलङ्कारः।

## Discussion

### रसध्वनिः अथवा असंलक्ष्यध्वनिः

असंलक्ष्यक्रमव्यङ्ग्यः - यत्र सत्यपि व्यङ्ग्यार्थप्रतीतौ न हि क्रमः प्रत्यक्षतया प्रतीयते तत्र असंलक्ष्यक्रमव्यङ्ग्यो नाम ध्वनिः। तत्तु रसादि-ध्वनिरिति कथ्यते। रसादिध्वनावेव असंलक्ष्यक्रमव्यङ्ग्यः ध्वनिरिति कथ्यते।

तदुच्यते-

**रसभावतदाभासतत्प्रशान्त्यादिरक्रमः**
**ध्वनेरात्मङ्गीभावेन भासमानो व्यवस्थितः॥ ३ ॥**

**अन्वयः** - अङ्गीभावेन भासमानो अक्रमः रसभावतदाभासतत्प्रशा-न्त्यादिः ध्वनेरात्मा व्यवस्थितः।

**असंलक्ष्यक्रमध्वनिः**

अङ्गीभावेन भासमानः रसादिः ध्वनेरात्मा अक्रमः इति व्यवस्थितः। रसादिः विभावादिभ्यः असंलक्ष्यक्रमेण प्रकाशते। यदा अयं रसादिः काव्ये प्रधानभूतः प्रकाशते तदानीमेवासौ ध्वनेः विषयः। न सर्वदा। यदा असौ काव्ये प्रधानतया (अङ्गीरूपेण) न प्रकाशते तदा नासौ ध्वनेः विषयः। तदानीं रसवदलङ्कारस्य असौ विषयः। अङ्गित्वेनावभासमानः

रसादिः ध्वनेरात्मा इत्यत्र आत्मशब्दः प्रकारवाची भवति। कीदृशः रसादिः ध्वनेः प्रकारः भवतीत्युच्यते "अङ्गित्वेनावभासमानः" इति। अङ्गित्वेन इत्यस्य प्रधानत्वेनेत्यर्थः। प्रधानत्वेन प्रकाशमानः एव रसादिः ध्वनेः प्रकारः भवतीति।

**रसादिरर्थो हि सहेव वाच्येनावभासते । स चाङ्गित्वेनात्रभासमानो ध्वनेरात्मा।**

**इदानीं रसवदलङ्कारलक्ष्यक्रमद्योतनात्मनो ध्वनेर्विभक्तो विषय इति प्रदर्श्यते।**

अङ्गीत्वेनावभासमानः रसादिः ध्वनेरात्मा

रसादीनां प्रतीतिस्तु वाच्यार्थेन सहैव भवति नहि तत् अक्रमव्यङ्ग्यः। क्रमस्तु अस्त्येव परन्तु उत्पलपत्रशतव्यतिभेदवत् लाघवात् नहि तत् प्रतीयते। रसादयस्तु - रसाः, भावाः, रसाभासाः, भावाभासाः, भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलता च। तथा च तेषां रसादीनामानन्त्याद् रसादिध्वनेरेक एव भेदः परिपोष्यते। अङ्गीत्वेन अवभासमानः एव रसादिः ध्वनेः विषयः नान्यः इति।

**वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।**
**रसादिपरता यत्र स ध्वनेर्विषयो मतः॥४॥**

**अन्वयः** - विविधात्मनां वाच्यवाचकचारुत्वहेतूनां यत्र रसादिपरता स ध्वनेर्विषयो मतः।

रसध्वनिः

काव्ये विविधाः चारुत्वहेतवः सन्ति। ते सर्वेऽपि रसादिपराः यत्र स्युः तत्रैव ध्वनिः। अनेन च रसादिः यत्र काव्ये अङ्गीभूतः भवति तत् काव्यं ध्वनेः प्रकारः भवति।

**रसभावतदाभासतत्प्रशमलक्षणं मुख्यमर्थमनुवर्तमाना यत्र शब्दार्थालङ्कारा गुणाश्च परस्परं ध्वन्यपेक्षया विभिन्नरूपा व्यवस्थितास्तत्र काव्ये ध्वनिरिति व्यपदेशः।**

विविधाः वाच्यवाचकचारुत्वहेतवः काव्ये सन्ति। ते शब्दालङ्कारः अर्थालङ्कारः गुणाश्च भवन्ति। एते वाच्यवाचकचारुत्वहेतवः यस्मिन्

काव्ये रसादिं पोषयन्तः सन्ति तत् काव्यं रसादिध्वनिकाव्ये रसादिः प्रधानभूतः भवति। अन्यानि सर्वाण्यपि काव्यङ्गानि रसादेरङ्गभूतानि भवन्ति।

**प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।**
**काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः॥ ५॥**

**अन्वयः** - अन्यत्र वाक्यार्थे प्रधाने यत्र रसादयः तु अङ्गं भवति तस्मिन् काव्ये रसादिः अलङ्कारः इति मे मतिः।

रसाद्यलङ्कारः

**यद्यपि रसवदलङ्कारस्यान्यैर्दर्शितो विषयस्तथापि यस्मिन् काव्ये प्रधानतयाऽन्योऽर्थो वाक्यार्थीभूतस्य चाङ्गभूता ये रसादयस्ते रसादेरलङ्कारस्य विषया इति मामकीनः पक्षः । तद्यथा चाटुषु प्रेयोऽलङ्कारस्य वाक्यार्थत्वेऽपि रसादयोऽङ्गभूता दृश्यन्ते।**

यत्र रसादयः कस्याप्यन्यस्य अङ्गभूताः सन्तः काव्यमलङ्कुर्वन्ति तत्र ते रसवदाद्यलङ्काराः कथ्यन्ते। ते च रसवत्-प्रेयस्- ऊर्जस्वि-समाहिता इत्यभिधीयन्ते। तत्र रसा यत्र अङ्गभूता भवन्ति तत्र रसवदलङ्कारः, भावा यत्र अङ्गभूताः तत्र प्रेयोऽलङ्कारः, रसाभासभावाभासो यत्र अङ्गा तत्र ऊर्जस्वि तथा च यत्र भावशान्त्यादयः तत्र समाहितालङ्कारः इति क्रमशो तेषां व्यापारेण परिचयः। तदेवोच्यते - यत्र रसादिभ्यो भिन्नः कश्चित् प्रधानो वाक्यार्थः तथा च रसादयः अङ्गभूता भवन्ति तत्र काव्ये रसादयोऽलङ्कारः भवन्ति इति मम ध्वनिकारस्य मतिः सिद्धान्तः इति।

**स च रसादिरलङ्कारः शुद्धः सङ्कीर्णो वा।**

रसादिरलङ्कारः द्विविधा

ते च रसवदाद्यलङ्काराः शुद्धसंकीर्णभेदेन द्विविधाः । यत्र अङ्गभूताः रसादयः काव्ये अङ्गिनां मिश्रिता न स्युः तत्र शुद्धाः, यत्र च रसवदाद्यलङ्काराः अङ्गिनां मिश्रिताः सन्तः काव्यमलङ्कुर्वन्ति तत्र सङ्कीर्णाः रसवदाद्यलङ्काराः।

**तत्राद्यो यथा-**

**किं हास्येन न मे प्रयास्यसि पुनः प्राप्तश्चिराद्दर्शनं**

**केयं निष्करुण प्रवासरुचिता केनासि दूरीकृतः।**
**स्वप्रान्तेष्विति ते वदन् प्रियतमव्यासक्तकण्ठग्रहो**
**बुद्धा रोदिति रिक्तबाहुवलयस्तारं रिपुस्त्रीजनः॥**

**अन्वयः** - हास्येन किं चिरात् मे दर्शनं प्राप्तः पुनः प्रयास्यसि निष्करुण इयं प्रवासरुचिता का केन दूरीकृतः असि इति स्वप्रान्तेषु वदन् प्रियतमव्यासक्तकण्ठग्रहः बुद्धा रिक्तबाहुवलयः ते रिपुस्त्रीजनः तारं रोदिति।

शुद्धा रसाद्यलङ्कारस्य उदाहरणम्

अस्मिन् श्लोके तव रिपुस्त्रीजनः स्वप्ने दृष्टं कान्तं सम्बोध्य प्रलपति। प्रलापस्वरूपन्तु किं हास्येनेत्यादिना वर्ण्यते। तथाहि अलं परिहासेन। बहोः कालानन्तरं, मम दृष्टिगोचरताम्, उपगतः अस। त्वं पुनरपि न गमिष्यस। चिरात् प्राप्तं त्वां नाहं मोक्ष्यामीत्यर्थः। हे दयारहित ! यतः त्वं न तु स्वयमागतः। अतः निर्दयोऽसि। इयं प्रवासे रुचिर्यस्य तस्य भावः, दूरदेशवासे अभिरुचिः का? अनुचितेत्यर्थः। केन अपराधेन त्वं मत्तः दूरीकृतः असीत्यर्थः। स्वप्नावसानेषु, प्रियतमे स्वप्ने दृष्टे सति, प्रियतमे स्वप्ने दृष्टे तस्मिन् विशेषेण आसक्तः, कण्ठस्य ग्रहणं, यस्य तादृशः, इति पूर्वोक्तप्रकारेण कथयन्, प्रलपन् वा, प्रबोधं प्राप्य जागरित्वा रिक्तं शून्यं बाह्वोः वलयं यस्य तथाविधो भूत्वा, उच्चैः, रोदिति। अत्र राज्ञः प्रतापातिशयरूपः प्रधानवाक्यार्थः, राजगता कविरतिः अत्र भावः। अस्य च कविरतिभावस्य शुद्धः करुणरसः अङ्गम्। अतः अत्र रसवदलङ्कारः।

**इत्यत्र करुणरसस्य शुद्धस्याङ्गभावात्स्पष्टमेव रसवदलङ्कारत्वम्। एवमेवंविधे विषये रसान्तराणां स्पष्ट एवाङ्गभावः।**

अत्र करुणरसः राजविषयकरतिभावस्याङ्गः स च शुद्धा एव अङ्गिना अभिमिश्रित्वात्।

**सङ्कीर्णो रसादिरङ्गभूतो यथा-**

**क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं**

**गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण।**

**आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः**

**कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः॥**

**अन्वयः -** हस्तावलग्नः क्षिप्तः अंशुकान्तं आददानः अपि प्रसभमभिहतः केशेषु गृह्णन् अपास्तः चरणनिपतितः सम्भ्रमेण न ईक्षितः साश्रुनेत्रोत्पलाभिः त्रिपुरयुवतिभिः आलिङ्गन् यः अवधूतः आर्द्रापराधः कामी इव शाम्भवः शराग्निः वः दुरितं दहतु।

ईर्ष्याविप्रलम्भेण मिश्रितः अस्ति इति सङ्कीर्णस्य रसवदलङ्कारः

सः शाम्भवः शराग्निः वः दुरितं हरतु इति प्रधानं वाक्यम्। सः एवं पूर्वमुपवर्णितः, शाम्भवः शम्भुना प्रेरितः, शररूप अग्निः, युष्माकं, पापम्, हरतु अपनयतु इति प्रार्थ्यते। अयं शराग्निः आर्द्रापराधेन कामिनोपमीयते। सरसापराधः। प्रियविषयकः आर्द्रापराधः। कामुकः इव। यथा कोऽपि कामुकः प्रियां प्रति नायिकान्तरगमनादिरूपम् अपराधं करोति सः आर्द्रापराधः उच्यते। तस्य कामिनः अग्नेश्च व्यापाराः समानाः। तथा हि- हस्तावलग्नः क्षिप्तः हस्तयोः स्पर्शं कुर्वन् तिरस्कृतः। शराग्निः त्रिपुरस्त्रीणां हस्तयोः स्पृशति। तदा च ताभिः अयं तिरस्कृतः। यथा आर्द्रापराधः कामुकः प्रियां अनुनेतुं तस्या हस्तौ स्पृशति तदा सा तं तिरस्करोति तथेत्यर्थः। बलात्, चेलाञ्चलं, गृह्णन् अपि, ताडितः। सर्वत्र त्रिपुरयुवतिभिरिति संयोज्यः। केशेषु, स्पृशन्, अनादृतः, चरणयोः प्रणतः। आवेगेन, नावलोकितः, साश्रूष्यन्, निराकृतश्च यथा भवति तथा, साश्रुणी अश्रुसहिते, नेत्रोत्पले नयनकमले, यासां ताभिः, त्रिपुरासुराणां योषिद्भिः एवम्भूतः सः शाम्भवः शराग्निः बाणरूपो वह्निः युष्माकं दुरितं दहतु इति वाक्यार्थः।

**इत्यत्र त्रिपुररिपुप्रभावातिशयस्य वाक्यार्थत्वे ईर्ष्याविप्रलम्भस्य श्लेषसहितस्याङ्गभाव इति, एवंविध एव रसवदाद्यलङ्कारस्य न्याय्यो विषयः। अत एव चेर्ष्याविप्रलम्भकरुणयोरङ्गत्वेन व्यवस्थानात्समावेशो न दोषः।**

अस्मिन् श्लोके शम्भोः शराग्नौ दुरितहरणप्रार्थनाद्वारा शम्भुं प्रति कवेः भक्तिः प्राधान्येन अभिव्यज्यते। अस्य च ईर्ष्याविप्रलम्भसहितस्य करुणस्य अङ्गत्वम्। अत्र अङ्गभूतः करुणरसः कामीव इति कथनेन ईर्ष्याविप्रलम्भेण मिश्रितः अस्ति इति सङ्कीर्णस्य रसवदलङ्कारस्य विषयः।

**यत्र हि रसस्य वाक्यार्थीभावस्तत्र कथमलङ्कारत्वम् ? अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः; न त्वसावात्मैवात्मनश्चारुत्वहेतुः। तथा चायमत्र संक्षेपः -**

**रसभावादितात्पर्यमाश्रित्य विनिवेशनम्।**
**अलङ्कृतीनां सर्वासामलङ्कारत्वसाधनम्॥**

**अन्वयः** - रसभावादितात्पर्यमाश्रित्य विनिवेशनं सर्वासाम् अलङ्कृतीनां अलङ्कारत्वसाधनम्।

**अलङ्कारस्य प्रयोजनम्**

रसभावादीनां प्रधानवाक्यर्थत्वम्, अवलम्ब्य, समावेशः, सर्वासामलङ्कृतीनां अलङ्काराणां सर्वेषामपि, अलङ्कारस्य अलङ्कारपदव्यपदेशविषयतायाः कारणम्। अलङ्क्रियते अनेन इति करणव्युत्पत्या अलङ्कारशब्दः यं कमप्यर्थमलङ्कुर्वाणो अलङ्कारत्वं न प्राप्नोति।

**तस्माद्यत्र रसादयो वाक्यार्थीभूताः स सर्वो न रसादेरलङ्कारस्य विषयः; स ध्वनेः प्रभेदः, तस्योपमादयोऽलङ्काराः। यत्र तु प्राधान्येनार्थान्तरस्य वाक्यार्थीभावे रसादिभिश्चारुत्वनिष्पत्तिः क्रियते, स रसादेरलङ्कारताया विषयः। एवं ध्वनेरुपमादीनां रसवदलङ्कारस्य च विभक्तविषयता भवति।**

**ध्वनेः आलङ्काराणां रसादेरलङ्कारस्य च विभक्तः विषयः**

किन्तु यत्र रसादिः प्रधानवाक्यार्थीभूतः तस्य अलङ्करणेनैव उपमादीनाम् अलङ्कारत्वं जायते इत्यर्थः। यत्र तु उपमादयः वाच्यमेव प्रधानमुपस्कुर्वन्ति तत्रापि तस्य वाच्यस्य विभावत्वेन रसोपकारकत्वमस्त्येव। एवमेव यथा रसादिः ततोऽन्यं कञ्चन वाक्यार्थमलङ्करोति तदा तस्य अलङ्कारता। यतो हि असौ रसादिः अन्यं

कमपि अलङ्कार्यम् अलङ्करोत्येव। अतः रसादेः अलङ्कारता यदा वर्तते तदा तस्य अलङ्कार्यता नास्ति। अन्यथा तस्य अलङ्कार्यतैवोच्यते। एवं ध्वनेः अलङ्काराणां रसादेरलङ्कारस्य च विभक्तः विषयः।

**यदि तु चेतनानां वाक्यार्थीभावो रसाद्यलङ्कारस्य विषय इत्युच्यते तर्ह्युपमादीनां प्रविरलविषयता निर्विषयता वाभिहिता स्यात्। यस्मादचेतनावस्तुवृत्ते वाक्यार्थीभूते पुनश्चेतनावस्तुवृत्तान्तयोजनया यथाकथञ्चिद्भवितव्यम्। अथ सत्यामपि तस्यां यत्राचेतनानां वाक्यर्थीभावो नासौ रसवदलङ्कारस्य विषय इत्युच्यते। तत् महतः काव्यप्रबन्धस्य रसनिधानभूतस्य नीरसत्वमभिहितं स्यात्।**

चेतनानां वाक्यार्थीभावः रसाद्यलङ्कारस्य विषय इत्युच्यते चेत् उपमादयोऽलङ्काराः निर्विषयाः स्युः

प्राचीनमतानुसारेण चेतनानां वाक्यार्थीभावः रसाद्यलङ्कारस्य विषय इत्युच्यते चेत् उपमादयोऽलङ्काराः निर्विषयाः प्रविरलविषयाः वा स्युः इति दोषः। यतो हि काव्ये महाकविना वर्णितानि जडवस्तूनि अपि अन्ततो गत्वा चैतन्यवन्ति जायन्ते। एतानि वस्तूनि विभावत्वेनापि चैतन्यवतो रसादेः विषया भवन्ति। तथा च जडवस्तूनां वर्णनेऽपि चेतनावृत्तान्तयोजना काव्ये संभवत्येव। चेतनवस्तुवृत्तान्तयोजनया च रसवदलङ्कार इति चेत् उपमादीनाम् अलङ्काराणां विषय एव काव्ये न संभवति।

अथवा चेतनावस्तुवृत्तान्तयोजनायां सत्यामपि यत्र अचेतनानां वाक्यार्थीभावः नासौ रसवदलङ्कारस्य विषय इति स्वीक्रियते चेत् यद्यपि उपमाद्यलङ्काराणां निर्विषयता परिहृता भविष्यति तथापि रसनिधानभूतस्य महतो काव्यविभागस्य नीरसत्वं स्याद् इति दोषः। महाकाव्येषु बहुत्र अत्यन्तं सरसतया अचेतनानां वस्तूनां वर्णनमुपलभ्यते। यदि चेतनानां वस्तूनां वर्णनमेव रसवदलङ्कारस्य विषय इत्युच्यते तर्हि एतत् समस्तमपि काव्यजातं नीरसं स्यात्। एष महान् दोषः। चेतनानां वाक्यार्थीभावे रसवदलङ्कारः स्वीक्रियते चेत् उपमादीनाम् अर्थालङ्काराणां निर्विषयत्वम् इति एको दोषः। अचेतनानां सरसानामपि महाकविप्रबन्धानां नीरसत्वं स्यादिति द्वितीयो दोषः।

**यथा -**

> **तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना**
> **विकर्षन्ती फेनं वसनमिव संरम्भशिथिलम्।**
> **यथाविद्धं याति स्खलितमभिसन्धाय बहुशो**
> **नदीरूपेणेयं ध्रुवमसहना सा परिणता।**

**अन्वयः** - तरङ्गभ्रूभङ्गा संरम्भशिथिलम् वसनमिव फेनं विकर्षन्ती क्षुभितविहगश्रेणिरशना बहुशः स्खलितं अभिसन्धाय ध्रुवं असहना सा इयं नदीरूपेण यथाविद्धं याति।

**अचेतनायां नद्यां चेतनायाः कामिन्याः वृत्तान्तः समारोपितः**

तरङ्गभ्रूभङ्गा तरङ्गाः वीचयः एव भ्रूभङ्गाः भ्रूक्षेपाः यस्याः तादृशी, क्षुभिता विहगानां श्रेणी पङ्क्तिरेव रशना काञ्ची यस्यास्तादृशी, कोपेन श्लथबन्धम्, अंशुकम् इव फेनं आकर्षन्ती, नानाप्रकारेण, मम अपराधं, पुनः पुनः विचिन्त्य, न सहमाना, मम प्रिया, नदीत्वं प्राप्ता सति, कुटिलताम् अनतिक्रम्य, कुटिलगतिः, गच्छति।

अत्र अचेतनायाः नद्याः वर्णनं कविना कृतमस्ति। तथापि नद्यां चेतनायाः कामिन्याः वृत्तान्तः समारोपितः। पाठकानां मनसि अत्र नद्याः स्थाने काचन कामिनी नायिकैव प्रतीतिपथमागच्छति इति चमत्कारः। अमुम् अचेतनवर्णनमिति कारणेन कोऽपि न तिरस्करोति। परम् उत्तमकाव्यमिति स्वीकरोति। एतादृशानि काव्यानि भूयसा दृश्यन्ते। अत एव उदाहरणान्यपि बहूनि प्रदर्शितानि सन्ति।

**यथा वा**

> **तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः**
> **शून्येवाभरणैः स्वकालविरहाद्विश्रान्तपुष्पोद्गमा।**
> **चिन्ता मौनमिवाश्रिता मधुकृतां शब्दैर्विना लक्ष्यते**
> **चण्डी मामवधूय पादपतितं जातानुतापेव सा।।**

**अन्वयः** - चण्डी सा तन्वी पादपतितं मां अवधूय जातानुताप इव मेघजलार्द्रपल्लवतया अश्रुभिः धौताधरा इव स्वकालविरहात्

विश्रान्तपुष्पोद्गमा आभरणैः शून्या इव मधुकृतां शब्दैः विना नितान्तमौनं आश्रिता इव लक्ष्यते।

अत्र उर्वशी लतारूपेण अत्र वर्णिता अस्ति। तन्वी वियोगेन कार्श्यमुपगता, वर्षोदकैः आर्द्राणि पल्लवानि यस्याः तादृश्या भावः तया, नेत्रजलैः, क्षालितः अधरो यस्यास्तादृशीव, यः कालस्तस्य विरहादभावात्, विश्रान्ताः पुष्पाणाम् उद्गमाः यस्यास्तादृशी सती, आभरणैः रहितेव, मधुकृतां शब्दैः विना, तूष्णींभावम्, प्राप्ता इव, सा कोपनशीला उर्वशी, पादपतितं माम् तिरस्कृत्य, पश्चात्तापः यस्यास्तादृशीव मम पुरस्तात् दृश्यते। अत्र लतावृत्तान्तः प्रतिपादितः इति अचेतनस्य वस्तुनः वर्णनम् अत्र कृतम्। तथापि असौ लतावृत्तान्तः नायिकावृत्तान्तसमारोपणेन सचेतनो जायते इति चारुतातिशयः। कवेः वर्णनेन अचेतनमपि वस्तु चेतनावत्प्रशोभते।

**अचेतनायां लतायां चेतनायाः नायिकायाः वृत्तान्तः समारोपितः**

**यथा वा-**

**तेषां गोपवधूविलाससुहृदां राधारहःसाक्षिणां**
**क्षेमं भद्र कलिन्दशैलतनयातीरे लतावेश्मनाम्।**
**विच्छिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना**
**ते जाने जरठी भवन्ति विगलन्नीलत्विषः पल्लवाः॥**

**अन्वयः** - हे भद्र गोपवधूविलाससुहृदां राधारहःसाक्षिणां कलिन्दशैलतनयातीरे तेषां लतावेश्मनां क्षेमम् किम् अधुना स्मरतल्पकल्पनमृदुच्छेदोपयोगे विच्छिन्ने विगलन्नीलत्विषः ते पल्लवाः जरठी भवन्ति इति जाने।

गोपिकाङ्गनानां ये विलाससुहृदः नर्मसचिवास्तेषाम्, राधाया संभोगमस्य साक्षिभूतानां तेषां पूर्वानुभूतत्वात् चिरपरिचितानां तेषां, कालिन्दीनदीतीरे, लतागृहाणां कुशलं किमु? अधुना इदानीं श्रीकृष्णस्य वृन्दावनपरित्यागानन्तरमित्यर्थः, मदनशयनीयस्य निर्माणाय मृदु यथा भवति तथा, यः छेदनं तस्योपयोगे, विरते सति, श्रीकृष्णस्याभावेन

इदानीं लतागृहेषु मदनशय्या न निर्मीयते, अत एव लतानां मृदुलपल्लवच्छेदनं नास्ति, ततश्च ते पल्लवाः इदानीम् अनुपयोगित्वात् जीर्णतां यान्तीति अहम् उद्भावयामि इति।

अत्र अचेतनः लतागृहवृत्तान्तः परामृष्टः तथापि तस्य लतागृहस्य कविप्रतिभया चैतन्यमागच्छति इति चारुता।

आनन्दवर्धनात् प्राचीनाः आचार्याः अलङ्काराणामेव काव्ये महत्त्वं स्वीकुर्वन्ति स्म। अलङ्कारात् अन्यः कश्चन अलङ्कार्यः अस्तीति तैः नोच्यते। यत्र काव्ये रसः अस्ति स रसवदलङ्कारः इति तेषां मतम् आसीत्। परम् आनन्दवर्धनेन रसादेः अलङ्काराणां गुणानां सोपपत्तिकः कश्चन विषयविभागः कृतः। अयं विषयविभागप्रकार एवात्र काव्यशास्त्रे सूचितं वर्तते।

काव्यस्य कश्चन आत्मा अस्ति। स च रसादिध्वनिः भवति । यदा रसादिः काव्ये प्राधान्येन प्रकाश्यते तदा असौ रसादिः अलङ्कार्यः कथ्यते। कदाचिच्च असौ रसादिः अन्यं कमपि वाक्यार्थम् अलङ्करोति। तदा असौ रसादिः अलङ्कारस्य विषयः। यत्र च अङ्गिभूतम् रसम् उपमादयः अलङ्कुर्वन्ति तत्रोपमादिः अलङ्कारः। अनेन प्रकारेण ध्वनेः, रसवदलङ्कारस्य उपमादीनाञ्च विषयविभागः ध्वन्यालोके स्पष्टतया कृतः।

## Summarised Overview

विवक्षितान्यपरवाच्यध्वनेः अभिधामूलध्वनिरुच्यते। पुनरपि द्वेधा वर्तते। असंलक्ष्यक्रमध्वनिः संलक्ष्यक्रमध्वनिश्चेति। यत्र ध्वनौ वाच्यव्यङ्ग्ययोरर्थयोः बोधे पौर्वापर्यक्रमः सत्यपि अत्यन्तं सूक्ष्मतया न संलक्ष्यते, स ध्वनिप्रकारः असंलक्ष्यक्रमध्वनिरुच्यते। असंलक्ष्यक्रमध्वनेः स्वरूपं, रसवदलङ्कारादस्य भेदं च अधीतम्। रसभावतदाभासभावशान्त्यादिः असंलक्ष्यक्रमध्वनेः विषयः अस्ति। अयमेव रसादिः इति कथ्यते। रसादिरर्थौ हि सहेव वाच्येनावभासते। स चाङ्गित्वेनावभासमानो ध्वनेरात्मा। यत्र शब्दालङ्कारः अर्थालङ्कारश्च रसादिपरः स ध्वनेः विषयः अस्ति।

यस्मिन् काव्ये अलङ्कारादिः अपेक्षया रसादिः अङ्गी भवति तद् ध्वनिकाव्यमुच्यते। प्रतीयमानोऽर्थः यत्र प्रधानभूतः तत्रैव ध्वनिरिति। प्रधानभूतोऽर्थ एव वाक्यार्थ उच्यते। रसादिः यत्र वाक्यार्थौ भवति तत्र रसादिध्वनिः। अयञ्च रसादिध्वनिः रसादेरलङ्काराद् भिन्नः अस्ति। येन अलङ्क्रियते स अलङ्कार्यः। रसादिः यत्र अलङ्कार्यः स ध्वनेः विषयः। तेनैव रसादिना यदा अन्यः कश्चन वाक्यार्थः अलङ्क्रियते तदा स रसादि अलङ्कारः इति ध्वनेः रसादेरलङ्कारस्य च विषयविभागोऽपि अत्र विशदयति।

रसादेरन्यत्र वाक्यार्थे प्रधाने सति रसादिः यत्र अङ्गं भवति तस्मिन् काव्ये रसादिः अलङ्कारो भवति। एष च रसादिरलङ्कारः कुत्रचित् शुद्धः भवति, कुत्रचिच्च रसान्तरेण मिश्रितत्वात् सङ्कीर्णश्च भवति । 'किं हास्येन न मे प्रयास्यसि ...' इत्यादिश्लोके शुद्धः रसादिरलङ्कारः। अत्र वस्त्वन्तरेणानुपस्कृतः स्वप्रदर्शनोद्दीपितः शोकस्थायिभावकः करुणरसः प्रकृतस्य राजप्रभावातिशयस्य वस्तुनः अङ्गमिति शुद्धो रसवदलङ्कारः।

'क्षिप्तो हस्तावलग्नः ...' इत्यादिश्लोकः सङ्कीर्णस्य रसादेरलङ्कारस्य उदाहरणम्। श्लोकेऽस्मिन् त्रिपुररिपुप्रभावातिशयः वाक्यार्थः। ईर्ष्याविप्रलम्भस्य श्लेषसहितस्य च अङ्गभावः। अतः अत्र सङ्कीर्णः रसवदलङ्कारः। उभयत्रापि उदाहरणे रसादिः अन्यस्य भावस्य अङ्गभूतः वर्तते। अत एव अस्यालङ्कारत्वम्। रसभावादितात्पर्यमाश्रित्य विनिवेशनमेव सर्वासामलङ्कृतीनाम् अलङ्कारत्वसाधनं भवति इति नियमः। तस्माद् यत्र रसादयो वाक्यार्थीभूताः स रसादिध्वनेः विषयः। तस्य च उपमादयोऽलङ्काराः। यत्र तु प्राधान्येनार्थान्तरस्य वाक्यार्थीभावे रसादिभिः चारुत्वनिष्पत्तिः क्रियते स रसादेरलङ्कारतायाः विषयः।

रसवदलङ्कारविषये प्राचीनाचार्याणां विचारः अन्यः आसीत्। चेतनानां वस्तूनां वाक्यार्थीभावे रसवदलङ्कार इति ते वदन्ति स्म। ध्वनिकारस्तु सिद्धान्तमेनं न स्वीकरोति। एतन्मते यदि चेतनानां वाक्यार्थीभावे रसवदलङ्कारः भवति चेद् उपमादयः अलङ्काराः प्रविरलविषयाः निर्विषयाः वा स्युः। यतो हि काव्ये प्रयुक्तानां सर्वेषामपि अचेतनानाम् अर्थानां चेतनावस्तुवृत्तान्तयोजना भवेदेव। तथा च कोऽपि अचेतनवस्तुवृत्तान्तः काव्ये न भविष्यति। एवं सति सर्वोऽप्यर्थः रसवदलङ्कारस्य विषयः स्यात्। अनेन च उपमादीनाम् अर्थालङ्काराणां विषय एव न भविष्यति। चेतनानामेष वस्तूनां वाक्यार्थीभावे रसवदलङ्कारश्चेत् अयमेव प्रथमो दोषः स्यात्।

यदि सत्यामपि चेतनावृत्तान्तयोजनायां यत्र अचेतनानां वाक्यार्थीभावो नासौ सर्वः रसवदलङ्कारस्य विषयः तदा एवं स्वीकारे रसनिधानभूतस्य महतः काव्यप्रबन्धस्य नीरसत्वम् अभिहितं स्यादिति द्वितीयो दोषः। काव्येषु भूयसा अचेतनवस्तुवृत्तान्तवर्णनं वर्तते। एतत्सर्वमपि अतीव चमत्कारकारि

अनुभूयते । उत्तमकाव्यत्वमपि एतेषाम् वक्तुं शक्यते । तस्माद् यत्र अचेतनवस्तुवृत्तान्तवर्णनमस्ति तत्सर्वम् अन्ततो गत्वा चेतनवस्तुवृत्तान्तयोजनया रसवदलङ्कारस्य विषयो भवति इति नियमः न उपपन्नः। एतादृशानि बहूनि उदाहरणानि उत्तमकाव्यत्वेन स्वीकृतानि सन्ति । यथा 'तरङ्गभ्रूभङ्गा ...' इत्यादिश्लोकः। इह अचेतनायाः सरितः चरिते मानवतीचरितारोपात् सरसता सहृदयानाम् अनुभूयते। रसवदलङ्कारविषये पूर्वोक्तनियमानुसारेण अत्र रसध्वनित्वं नैव भविष्यति इति दोषः। वस्तुतः अस्य रसध्वनित्वे इत्यादि पूर्वप्रतिपादिते उदाहरणेऽपि लताचरिते कलहान्तरितायाः नायिकायाः वृत्तान्तारोपात् रसवत्ता न तिरोहिता। एवमत्रापि रसध्वनिरेव न तु रसादिरलङ्कारः। 'तेषां गोपवधूविलाससुहृदाम् ...' इत्यादिश्लोकेऽपि जडलतावेश्मवृत्तौ चेतननर्मसचिववृत्तान्तारोपाद् रसवत्ता अस्त्येव। अनेन च चेतनानां वाक्यार्थीभावे रसवदलङ्कार इति प्राचां सिद्धान्तः चिन्त्यः।

यत्र रसादिः अन्येषां काव्याङ्गानामपेक्षया प्रधानभूतः दृश्यते तत्र रसादिध्वनिः। रसादिध्वनौ रसादेरन्यस्य सर्वस्याप्यङ्गस्य रसादिपरता सुस्पष्टा वर्तते। अस्मिन् काव्यप्रकारे रसादिः अलङ्कार्यः। उपमादयस्तु तमलङ्कुर्वन्ति। यत्र च काव्ये रसादेरन्यस्मिन् वाक्यार्थे प्रधाने रसादिः अङ्गत्वेन तिष्ठति तस्मिन् काव्ये रसादिः अलङ्कारः भवति। यतो हि तत्र रसादिः अन्यं कञ्चन अलङ्कार्यम् अलङ्करोति। रसादेलङ्कारस्य उपमादयः अलङ्काराः इति ध्वनेः रसवदलङ्कारस्य उपमादीनाञ्च विषयविभागः।

## Assignments

**I. एकेन वाक्येन वाक्यद्वयेन वा उत्तरयत -**

1. रसादिः ध्वनेरात्मा भवति - कीदृशः?
2. रसादिध्वनेः रसवदलङ्कारस्य च को भेदः?
3. रसादिः अलङ्कारः इति कुत्र उच्यते?
4. रसवदलङ्कारस्य भेदद्वयं लिखत।
5. सर्वासाम् अलङ्कृतीनां अलङ्कारत्वे किं साधनम्?
6. रसवदलङ्कारात् ध्वनेः उपमादीनां च को भेदः?

**II. उत्तरयत**

1. अचेतनानां वाक्यार्थीभावं सोदाहरणं व्याख्यात।
2. उपमादीनामलङ्काराणां निर्विषयता कथं भवति? विशदयत।

3. असंलक्ष्यक्रमध्वनेः स्वरूपं प्रकाशयत।
4. के नाम रसवदलङ्कारः इति सोदाहरणं प्रतिपादयत।
5. रसवदादीनां अलङ्कारत्वं वा नवेति समर्थयत।
6. असंलक्ष्यध्वनेः स्वरूपं भेदञ्च विशदयत।
7. रसवदलङ्कारात् असंलक्ष्यध्वनेः भेदं निरूपयत।
8. चेतनानां वाक्यार्थीभावो रसादेरलङ्कारस्य विषय इति प्राचीनानां मतं निरस्य ध्वन्यालोकानुसारं रसवदलङ्कारस्वरूपं विचारयत।
9. चेतनानां वाक्यार्थीभावः रसादेरलङ्कारस्य विषय उच्यते चेत् रसनिधानभूतस्य महतः काव्यप्रबन्धस्य नीरसत्वं कथं स्यादिति सोदाहरणं निरूपयत।

## Suggested Readings


1. Dhvanyaloka with Alocanam, E.V.Damodaran, National Book Stall, Kottayam, 1973
2. The Dhvanyaloka of Anandavardhana with Locana of Abhinavagupta, English Translation by Daniel. H. H. Ingalls, Jeffrey Moussaieff, Masson and M V Patwardhan, Harvard University Press, Cambridge, London, 1990,
3. The Dhvanyaloka and Its Critics, Dr. K Krishnamoorti, Kavyalaya Publishers, Mysore, 1968.


## References


1. श्रीमदानन्दनर्धानाचार्यविरचितः ध्वन्यालोकः व्याख्या पण्डितः महादेवशास्त्री, चौखम्भा संस्कृत संस्थान् वारणसी, 2015
2. Dhvanyaloka with Locana commentary by Chattanath Acyutanunni, Vallathol Vidyapeethom Sukapuram Edappal 2018

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# वक्रोक्तिजीविते प्रथमोन्मेषः

## BLOCK - 4

SGOU

UNIT 1

# वक्रतानिरूपणम्

## Learning Outcomes

- साहित्यशास्त्रस्य अवबोधनाय प्रभवति।
- कुन्तकमतानुसारं काव्यप्रयोजनं प्रतिपादयितुं शक्नोति।
- वक्रोक्तेः लक्षणं जानाति।
- वक्रतां निरूपयति।

## Background

अलङ्कारशास्त्रप्रवीणाः सहृदयाः विद्वांसो जानन्ति यत् अलङ्कारशास्त्रेतिहासे कुन्तकः कुन्तालो वा वक्रोक्तिजीवितकार इति संज्ञायैव सुप्रसिद्धतया सुपरिचिताः सन्ति। एतेषां विशिष्टः सिद्धान्तोऽयमेवासीद्यत्- वक्रोक्तिरेव काव्यस्य जीवनाधायकं तत्त्वमस्ति। अत एव एतेषां ग्रन्थः वक्रोक्तिजीवितम् इति नाम्ना विख्यातोऽस्ति। ग्रन्थोऽयं महनीयं एवोपलभ्यते, परञ्च एतस्य उपलब्धैरंशैरेवाचार्यस्य कुन्तकस्य मैलिकातायाः सूक्ष्मविवेचनसमीक्षणशैल्याश्च पर्याप्तः परिचयः प्राप्यते। अस्मिन् ग्रन्थे चत्वारोऽध्यायाः उन्मेषाः वा सन्ति, येषु वक्रोक्तेः विविधभेदानां महत्वपूर्णं साङ्गोपाङ्गं विवेचनमस्ति। वक्रोक्तेः अर्थोऽस्ति वैदग्ध्यभङ्गीभणितिः अर्थात् सर्वासाधारणैः प्रयुक्तेभ्यः वाक्येभ्यः कथनस्य विलक्षणा रीतिः। वक्रोक्तेः मूलभूता कल्पना आचार्यस्य भामहस्यास्ति। परञ्च तदुक्तिं व्यापके साहित्यिके तत्त्वे विकासस्य श्रेयस्त्वं कुन्तकमेवास्ति। वक्रोक्तेराभ्यन्तरे एव समस्तानां साहित्यिकानां तत्त्वानामन्तर्विधानं कृत्वा श्रीमद्राजानककुन्तकेन महत्याः विदग्धतायाः परिचयः प्रदत्तः। तेषामुपरि साहित्यिकाः सदा आकृष्टाः स्थास्यन्ति। कुन्तकस्य कालः दशमशतकस्यान्ते एकादशशतकस्य प्रारम्भे वा स्वीकरणं समुचितमिति प्रतिभाति। अस्मिन् ग्रन्थे प्राथमिकोन्मेषद्वयं तु

समुपलब्धं परञ्चान्तिममुन्मेषद्वयमपूर्णमेव प्राप्तम्। ग्रन्थे त्रयो भागाः सन्ति - कारिका, वृत्तिः, उदाहरणञ्चेति, कारिका वृत्तिश्चेति कुन्तकस्य स्वीया रचना अस्ति। उदाहरणानि संस्कृतसाहित्यस्य प्रसिद्धग्रन्थेभ्यः गृहीतानि सन्ति। अस्मिन् एकके प्रथमोन्मेषे - काव्यस्य प्रयोजनम्, साहित्यस्य कल्पना, वक्रोक्तेः निरुपणं च सुचारुरूपतया वर्णितमस्ति। तत् पश्यामः।

## Keywords

अद्भुतामोदचमत्कारं, काव्यस्यायमलङ्कारः, धर्मादिसाधनोपायः, सुकुमारक्रमोदितः, व्यवहार-परिस्पन्दसौन्दर्यं, चमत्कारो वितन्यते, अलङ्कृतिरलङ्कार्यमपोद्धृत्य, वाच्यं, वाचकं, सहितौ, साहित्यम्, शब्दं, अर्थं, वक्रता, पदम्।

## Discussion

***अथ ग्रन्थादावाचार्यकुन्तकः शक्ति-परिस्पन्दमात्रोपकरणं शिवं वृत्या निर्विघ्न-ग्रन्थ-परिसमाप्त्यर्थं स्तौति-***

**जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्।**
**शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः॥ १॥**

**अन्वयः** - जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनं, शक्तिपरिस्पन्दमात्रोपकरणं शिवं नुमः।

परमशिवतत्त्वं स्तौति

**व्याख्या** - जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम् - त्रयाणां जगतां समाहार इति जगत्त्रितयम्, विचित्रतायाः भावो वैचित्र्यम्, जगत्त्रितयमेव यद् वैचित्र्यं तदेव चित्रं कर्म यो विदधातीति तथाविधम् = त्रिभुवनाद्भुतरचनाचित्रकृत्यकर्माणम्। शक्तिपरिस्पन्दमात्रोपकरणम् शक्तीनां चिदानन्देच्छाज्ञानक्रियाणां परिस्पन्दमात्रं = परिस्फुरण-मात्रम् उपकरणं = साधनरूपम्। शिवम् = परमशिवतत्त्वम्। नुमः = स्तुमः।

**सारः** - त्रिभुवनस्य अद्भुतरचनाचित्रकृत्यकर्माणं शक्तीनां परिस्फुरणसाधनरूपं परमशिवतत्त्वं स्तुमः।

**यथातत्त्वं विवेच्यन्ते भावास्त्रैलोक्यवर्तिनः।**

**यदि तन्माद्भुतं नाम दैवरक्ता हि किंशुकाः॥ २॥**

**अन्वयः -** यदि त्रैलोकवर्त्तिनः भावाः यथातत्त्वं विवेच्यन्ते तद् अद्भुत नाम न हि किंशुकाः दैवरक्ताः।

वक्रोक्तिरचनायाः प्रयोजनम्

**व्याख्या** - यदि = चेत्। त्रैलोकवर्त्तिनः = त्रिभुवनवर्तिनः। भावाः = पदार्थाः। यथातत्त्वम् = तत्त्वानुरूपम्। विवेच्यन्ते = वर्ण्यन्ते। तत् = तत्र। अद्भुतं नाम न = नैव किमप्याश्चर्यम्। हि = यतः। किंशुकाः = पलाशपुष्पाणि। दैवरक्ताः = प्रकृत्या रक्तवर्णानि भवन्ति।

**सारः** - त्रिभुवनवर्तिनः पदार्थाः तत्त्वानुरूपम् वर्ण्यन्ते तत्र नैव किमप्याश्चर्यम् यतः पलाशपुष्पाणि प्रकृत्या रक्तवर्णानि भवन्ति।

**स्वमनीषिकयैवाथ तत्त्व तेषां यथारुचि।**

**स्थाप्यते प्रौढिमात्रं तत्परमार्थो न तादृशः॥ ३॥**

**अन्वयः -** अथ यथारुचिः तेषां तत्त्वं स्वमनीषिकया एव स्थाप्यते, तत्प्रौढिमात्रम्। तादृशः परमार्थः न।

केवलं प्रौढिवादः भवति

**व्याख्या** - अथ = चेत्। यथारुचि = स्वेच्छया। तेषाम् = त्रिलोकस्थितपदार्थानाम्। तत्त्वम् = यथातथ्यरूपम्। स्वमनीषिकया = स्वबुद्ध्या। एव। स्थाप्यते = स्थापना क्रियते। तत् = तर्हि। प्रौढिमात्रम् = केवलं प्रौढिर्भवति। तादृशः = तथाविधः। परमार्थः = तत्त्वार्थः। न = नैव भवतीति।

**सारः** - किन्तु स्वेच्छया त्रिलोकस्थितपदार्थानां यथातथ्यरूपं स्वबुद्ध्या एव स्थापना क्रियते तर्हि केवलं प्रौढिर्भवति तथाविधः तत्त्वार्थः नैव भवतीति।

**इत्यसत्तर्कसन्दर्भे स्वतन्त्रेऽप्यकृतादरः।**

**साहित्यार्थसुधासिन्धोः सारमुन्मीलयाम्यहम्॥ ४॥**

साहित्यार्थामृतसागरस्य तत्त्वम् उन्मीलयति

**अन्वयः** - इति असत्तर्कसन्दर्भे स्वतन्त्रे अपि अकृतादरः अहं साहित्यसुधासिन्धोः सारम् उन्मीलयामि।

**व्याख्या** - इति = इत्थम्। असत्तर्कसन्दर्भे = मिथ्यावादप्रसङ्गे। स्वतन्त्रे = स्वच्छन्दे। अपि अकृतादरः - न कृतः = अकृतः आदरो येन सः = अविहितसत्कारः अहम् = राजानककुन्तकः। साहित्यार्थसुधासिन्धोः - साहित्यार्थ एव सुधायाः सिन्धुस्तस्य = साहित्यार्थामृतसागरस्य। सारम् = तत्त्वम्। उन्मीलयामि = उद्घाटयामि।

**सारः** - इत्थं मिथ्यावादप्रसङ्गे स्वच्छन्दे अविहितसत्कारः अहम् (राजानककुन्तकः) साहित्यार्थामृतसागरस्य तत्त्वम् उद्घाटयामि।

**येन द्वितयमप्येतत्तत्त्वनिर्मितिलक्षणम्।**
**तद्विदामद्भुतामोदचमत्कारं विधास्यति॥ ५॥**

तत्त्वार्थज्ञानिनां हृदये विचित्रप्रसन्नताचमत्कृतिं करिष्यति

**अन्वयः** - येन एतत् तत्त्वनिर्मितिलक्षणं द्वितयम् अपि तद्विदाम् अद्भुतामोदचमत्कारं विधास्यति।

**व्याख्या** - येन = यदुन्मीलनेन। एतत् = इदम्। तत्त्वनिर्मितिलक्षणम् = तत्त्वनिष्पन्नरूपम्। द्वितयम् = उभयम् अपि। तद्विदाम् = तत्त्वार्थज्ञानिनाम्। अद्भुतामोदचमत्कारम् = विचित्र - प्रसन्नता - चमत्कृतिम्। विधास्यति = करिष्यति।

**सारः** - यदुन्मीलनेन इदं तत्त्वनिष्पन्नरूपं उभयम् अपि तत्त्वार्थज्ञानिनां विचित्रप्रसन्नताचमत्कृतिम् करिष्यति।

***ग्रन्थारम्भे अभीष्टदेवतानमस्कारकरणं समीचीनः आचारः। तस्मात् मङ्गलाचरणमेव ग्रन्थादौ विधीयते।***

**वन्दे कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्तकीम्।**
**देवीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्॥ १॥**

**अन्वयः** - कवीन्द्रवक्त्रेन्दुलास्यमन्दिरनर्त्तकीं सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलां देवीं वन्दे।

**व्याख्या** - कवीन्द्रवक्रेन्दुलास्यमन्दिरनर्त्तकीम् - कवीन्द्रस्य वक्रम् एव इन्दुरिति, स एव मन्दिरं तत्र नर्तकी, ताम् - कविकरमुखचन्द्रमन्दिरलासिकाम्। सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्व-लां - सूक्तिपरिस्पन्दाः - सुभाषितविलासितानि, तान्येव सुन्दराभिनयाः - सुकुमाराः सात्त्विकादयः, तै उज्ज्वलाम् - भ्राजमानाम्, या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्त्तकी सविलासाऽभिनयविशिष्टा नृत्यन्ती विराजते ताम्। देवीम्। वन्दे = नौमीति वाक्यार्थः।

वाग्रूपतां सरस्वतीं सतौति

**वृत्तिः** - देवीं वन्दे, देवतां स्तौमि। कामित्याह - कवीन्द्रवक्रेन्दुलास्यमन्दिरनर्तकीम्। कवीन्द्राः कविप्रवरास्तेषां वक्रेन्दुर्मुखचन्द्रः स एव लास्यमन्दिरं नाट्यवेश्म, तत्र नर्तकीं लासिकाम्। किंविशिष्टाम्; सूक्तिपरिस्पन्दसुन्दराभिनयोज्ज्वलाम्। सूक्तिपरिस्पन्दाः सुभाषित - विलसितानि तान्येव सुन्दराः अभिनयाः सुकुमाराः सात्त्विकादयस्तैरुज्ज्वलां भ्राजमानाम्। या किल सत्कविवक्त्रे लास्यवेश्मनीव नर्तकी सविलासाभिनयविशिष्टा नृत्यन्ती विराजते तां वन्दे नौमीति वाक्यार्थः । यत्किल प्रस्तुतं वस्तु किमपि काव्यालङ्कारकरणं तदधिदैवतभूतामेवं विधरामणीयकहृदयहारिणीं वाग्रूपां सरस्वतीं स्तौमीति।

**सारः** - सत्कविवक्त्रे लास्यवेश्मनीव नर्तकी सविलासाभिनयविशिष्टा नृत्यन्ती विराजते तां सरस्वतीं वन्दे।

***एवं नमस्कृत्येदानीं वक्तव्यवस्तुविषयभूतान्यभिधानाभिधेयप्रयोजना-न्यासूत्रयति -***

**वाचो विषयनैयत्यमुत्पादयितुमुच्यते।**
**आदिवाक्येऽभिधानादिनिर्मितेर्मानसूत्रवत्॥ ६॥**

इत्यन्तरश्लोकः।

**अन्वयः** - वाचः विषयनैयत्यम् उत्पादयितुम् आदिवाक्ये मानसूत्रवत् अभिधानादिनिर्मितेः उच्यते।

**व्याख्या** - वाचः = वाणेः । विषयनैयत्यम् = वस्तुनियन्त्रणम् । उत्पादयितुम् = जनयितुम् । आदिवाक्ये = प्रारम्भिकवाक्य एव । अभिधानादिनिर्मितेः = अनुबन्धचतुष्टयनिर्माणस्य । मानसूत्रवत् = भवननिर्माणादौ मापसूत्रवत् । उच्यते = कथ्यते ।

**सारः** - वाणेः वर्ण्यविषयस्य सीमायां वस्तुनियन्त्रणं कर्त्तुं प्रारम्भिकवाक्ये एव अनुबन्धचतुष्टयनिर्माणस्य भवननिर्माणादौ मापसूत्रवत् कथ्यते ।

**लोकोत्तरचमत्कारकारिवैचित्र्य सिद्धये**
**काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते ॥ २ ॥**

**अन्वयः** - लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये कोऽपि अयं काव्यस्य अलङ्कारः विधीयते ।

वक्रोक्तेः वैशिष्ट्यम्

**व्याख्या** - लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये = अलौकिकचमत्कार-जनकवैचित्र्यसिद्धिकरणाय । कः अपि - कश्चिदपि । अयम् - एषः । काव्यस्य, अलङ्कारः = अलङ्कृतिः । विधीयते = क्रियते ।

**वृत्तिः** - अलङ्कारो विधीयते अलङ्करणं क्रियते । कस्य - काव्यस्य । कवेः कर्म काव्यं तस्य । ननु च सन्ति चिरन्तनास्तदलङ्कारास्तत्किमर्थमित्याह - अपूर्वः, तद्व्यतिरिक्तार्थाभिधायी । तदपूर्वत्वं तदुत्कृष्टस्य तन्निकृष्टस्य च द्वयोरपि सम्भवतीत्याह - कोऽपि, अलौकिकः सातिशयः। सोऽपि किमर्थमित्याह-लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये असामान्याह्लाद-विधायिविचित्रभावसम्पत्तये । यद्यपि सन्ति शतशः काव्यालङ्कारा-स्तथापि न कुतश्चिदप्येवंविधवैचित्र्यसिद्धिः ।

**वृत्तिः** - अलङ्कारशब्दः शरीरस्य शोभातिशयकारित्वान्मुख्यतया कटकादिषु वर्तते, तत्कारित्वसामान्यादुपचारादुपमादिषु, तद्वदेव च तत्सदृशेषु गुणादिषु, तथैव च तदभिधायिनि ग्रन्थे शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहारः, यथा गौरिति शब्दः

गौरित्यर्थ इति। तदयमर्थः ग्रन्थस्यास्यालङ्कार इत्यभिधानम्, उपमादि-प्रमेयजातमभिधेयम्, उक्तरूपवैचित्र्यसिद्धिः प्रयोजनमिति।

**व्याख्या** - अलङ्कारशब्दः शरीरस्य = देहस्य शोभातिशयकारित्वात् = अतिशयेन शोभा यत्र स शोभातिशायी, तस्य भावस्तस्मात् अत्यन्तशोभाकारकत्वात् । मुख्यतया = प्रधानतया । कटकादिषु = कटकाद्याभूषणेषु। वर्तते = अस्ति। तत्कारित्वसामान्यात् = शोभातिशयत्वसाधारण्यात्। उपमादिषु = उपमारूपकादिषु। उपचारात् = साधर्म्यात्। तद्वदेव = उपमादिवदेव। च। तत्सदृशेषु = तत्समेषु गुणादिषु । तथैव च। तदभिधायिनि ग्रन्थे = अलङ्कारनाम्नि ग्रन्थे। शब्दार्थयोः = वाचकवाच्ययोः। एकयोगक्षेमत्वात् = समानयोगक्षेमकारणात् । ऐक्येन = समानतया । व्यवहारः = प्रयोगः । यथा = येन प्रकारेण । गौः इति शब्दः । गौरेव । अर्थः - तात्पर्यं भवतीति। तत् = तथा। अयम् = एषः अर्थः। ग्रन्थस्यास्य अलङ्कार इति = एवम्। अभिधानम् नाम। उपमादि-प्रमेयजातमभिधेयम् = प्रतिपाद्यम्। उक्तरूपवैचित्र्यसिद्धिः = लोकोत्तरचमत्कारकारि - वैचित्र्यसिद्धिः प्रयोजनमस्तीति।

विषयः - उपमादि अनेकविषयाः, प्रयोजनं - उक्तरूपवैचित्र्यसिद्धिः

***एवमलङ्कारस्यास्य प्रयोजनमस्तीति स्थापितेऽपि तदलङ्कारस्य काव्यस्य प्रयोजनं विना यदपि सदपार्थकमित्याह -***

**धर्मादिसाधनोपायः सुकुमारक्रमोदितः।**
**काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ॥ ३ ॥**

**अन्वयः** - सुकुमारक्रमोदितः काव्यबन्धः, धर्मादिसाधनोपायः अभिजातानां हृदयाह्लादकारकः।

काव्यबन्धः धर्मादिसाधनोपायः भवति

**व्याख्या** - सुकुमारक्रमोदितः = सुकुमारपरिपाट्या कथितः। काव्यबन्धः = सर्गबन्धादिः । धर्मादिसाधनोपायः = धर्मार्थकाममोक्षसाधनोपायः। अभिजातानाम् = राजपुत्रादीनाम्। हृदयाह्लादकारकः = चित्तानन्द-कारकः भवतीति।

**वृत्तिः** - हृदयाह्लादकारकश्चित्तानन्दजनकः काव्यबन्धः सर्गबन्धादिः भवतीति सम्बन्धः। कस्येत्याकाङ्क्षायामाह - अभिजातानाम्। अभिजाताः खलु राजपुत्रादयो धर्माद्युपेयार्थिनो विजिगीषवः क्लेशभीरवश्च, सुकुमाराशयत्वात्तेषाम् तथा सत्यपि तदाह्लादकत्वे काव्यबन्धस्य क्रीडनकादिप्रख्यता प्राप्नोतीत्याह - धर्मादिसाधनोपायः। धर्मादिरुपेयभूतस्य चतुर्वर्गस्य साधने सम्पादने तदुपदेशरूपत्वादुपाय-स्तत्प्राप्तिनिमित्तम्।

*तथापि तथाविधपुरुषार्थोपदेशपरैरपरैरपि शास्त्रैः किमपराद्धमित्यभिधीयते -*

**सुकुमारक्रमोदितः। सुकुमारः सुन्दरः सहृदयहृदयहारी क्रमः परिपाटीविन्यासस्तेनोदितः कथितः सन्। अभिजातानामाह्लादकत्वे सति प्रवर्तकत्वात्काव्यबन्धो धर्मादिप्राप्त्युपायतां प्रतिपद्यते। शास्त्रेषु पुनः कठोरक्रमाभिहितत्वाद् धर्माद्युपदेशो दुरवगाहः। तथाविधे विषये विद्यमानोऽप्यकिञ्चित्कर एव।**

काव्यं आनन्देन सहैव धर्मादिः बोधयितुं शक्नोति

**व्याख्या** - सुकुमारक्रमोदितः = सरलपरिपाट्या वर्णितः। सुकुमारः शब्दः सहृदयहृदयहारी - सहृदयानाम् = सरसाम्, हृदयान् = चेतांसि हरतीति तथाविधः। क्रमः = परिपाटी। विन्यासः, परिपाट्या = क्रमानुसारेण विन्यासः = रचनाशैली। तेन = तथाविधविन्यासेन उदितः = कथितः सन्। अभिजातानाम् = राजपुत्राणाम् आह्लादकत्वे = मनोरञ्जकत्वे सति। प्रवर्तकत्वात् = प्रवर्तकत्वहेतोः। काव्यबन्धः = काव्यरचना। धर्मादिप्राप्त्युपायत्वात् = धर्मार्थकाममोक्षपुरुषार्थानाम् प्राप्तिरुपलब्धिः, तस्यभावस्ताम्, प्रतिपद्यते = सम्पद्यते। पुनः = भूयः। शास्त्रेषु = ग्रन्थेषु। कठोरक्रमाभिहितत्वात् = क्लिष्टारम्भत्वात्। धर्माद्युपदेशः = धर्मादिशिक्षा। दुरवगाहः = क्लिष्टः। तथाविधे विषये = तत्प्रकारके विषये। विद्यमानः = स्थितः अपि। अकिञ्चित्कर एव = व्यर्थम् एवास्ति।

**राजपुत्राः खलु समासादितविभवाः समस्तजगतीव्यवस्थाकारितां प्रतिपद्यमानाः श्लाघ्योपायोपदेशशून्यतया स्वतन्त्राः सन्तः समुचितसकलव्यवहारोच्छेदं प्रवर्तयितुं प्रभवन्तीत्येतदर्थमेतद्व्युत्पत्तये व्यतीतसच्चरितराजचरितं तन्निदर्शनाय निबध्नन्ति कवयः। तदेवं शास्त्रातिरिक्तं प्रगुणमस्त्येव प्रयोजनं काव्यबन्धस्य।**

**व्याख्या** - राजपुत्राः = राजकुमाराः। खलु = किल । समासादित-विभवाः - समासादितः = समधिगतः विभवः = ऐश्वर्यम् यैस्ते। समस्तजगतीव्यवस्थाकारिताम् = सकलभूमिप्रबन्धकारिताम्। प्रतिपद्यमानाः = क्रियमाणाः। श्लाघ्योपायोपदेशशून्यतया श्लाघ्यः = प्रशंसनीयैः, उपायोपदेशैः - उपायशिक्षाभिः, शून्यतया = रिक्ततया। स्वतन्त्राः = स्वच्छन्दाः सन्तः। समुचितसकलव्यवहारोच्छेदम् = उपयुक्तनिखिलव्यवहारविनाशम्। प्रवर्तयितुम् = चालयितुम्। प्रभवन्ति, इति = एवम् । एतदर्थम् - एतन्निमित्तम् । एतद्व्युत्तये = व्याख्यायै । कवयः = सूरयः । व्यतीतसच्चरितराजचरितम् = अतीतोत्तमाचरणनृपचरित्रम् । तन्निदर्शनाय = तेषामुपदेशाय । निबघ्नन्ति = काव्यबन्धरूपेण वर्जयन्ति। तत् = तस्मात् । एवम् = इत्थम्। शास्त्रातिरिक्तम् = शास्त्रभिन्नम्। प्रगुणम् = प्रकृष्टगुणयुक्तम्। काव्यबन्धस्य = प्रबन्धस्य। प्रयोजनम् = कारणम्। अस्त्येव = नूनमेवास्ति।

**शास्त्रात् काव्यस्य श्रेष्ठं प्रयोजनं अस्त्येव**

***मुख्यं पुरुषार्थसिद्धिलक्षणं प्रयोजनमास्तां तावत्, अन्यदपि लोकयात्राप्रवर्तननिमित्तं भृत्यसुहृत्स्वाम्यादिसमावर्जनमनेन विना सम्यङ् न सम्भवतीत्याह-***

**व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।**
**सत्काव्याधिगमादेव नूतनौचित्यमाप्यते॥४॥**

**अन्वयः** - व्यवहारपरिस्पन्दसौन्दर्यं, नूतनौचित्यं व्यवहारिभिः सत्काव्याधिगमात् एव आप्यते।

**व्याख्या** - व्यवहारपरिस्पन्दसौन्दर्यम्-व्यवहारः = लोकवृत्तम्, तस्य परिस्पन्दः = व्यापारः, तस्य यत् सौन्दर्यम् = रामणीयकम्, तत् नूतनौचित्यम् = अभिनवौचित्यम्। व्यवहारिभिः = व्यवहर्तृभिः। सत्काव्याधिगमात् = कमनीयकाव्यपरिज्ञानात् एव। नान्यस्मात् । आप्यते = प्राप्यते।

**काव्येभ्यः लोके व्यवहारज्ञानं लभ्यते**

**वृत्तिः** - व्यवहारो लोकवृत्तं तस्य परिस्पन्दो व्यापारः क्रियाक्रम-लक्षणस्तस्य सौन्दर्यं रामणीयकं तद्व्यवहारिभिर्व्यवहर्तृभिः सत्काव्या-धिगमादेव कमनीयकाव्यपरिज्ञानादेव नान्यस्माद् आप्यते लभ्यते इत्यर्थः। कीदृशं तत्सौन्दर्यम् - नूतनौचित्यम्। नूतनमभिनवमलौकिक-मौचित्यमुचितभावो यस्य । तदिदमुक्तं भवति- महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूता सर्वे मुख्यामात्यप्रभृतयः समुचित-प्रातिस्विककर्तव्यव्यवहारनिपुणतया निबध्यमानाः सकलव्यवहारि वृत्तोपदेशतामापद्यन्ते। ततः सर्वः क्वचित्कमनीयकाव्ये कृतश्रमः समासादितव्यवहारपरिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवति इति।

***योऽसौ चतुर्वर्गलक्षणः पुरुषार्थस्तदुपाजनविषयव्युत्पत्तिकारणतया काव्यस्य पारम्पर्येण प्रयोजनमित्याम्नातः, सोऽपि समयान्तरभावितया तदुपभोगस्य तत्फलभूताह्लादकारित्वेन तत्कालमेव पर्यवस्यति। अतस्तदतिरिक्तं किमपि सहृदयहृदयसम्वादसुभगं तदात्वरमणीयं प्रयोजनान्तरमभिधातुमाह -***

**चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।**
**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥ ५॥**

**अन्वयः** -चतुर्वर्गफलास्वादम् अतिक्रम्य काव्यामृतरसेन तद्विदाम् अन्तः चमत्कारः वितन्यते।

**व्याख्या** - चतुर्वर्गफलास्वादम् - धर्मार्थकाममोक्षफलास्वादम् । अतिक्रम्य = उल्लंघ्य। काव्यामृतरसेन = काव्यरूपसुधारसेन। तद्विदाम्

= काव्यतत्त्वज्ञानाम् । अन्तः = हृदयम् । चमत्कारः = चमत्कृतिः । वितन्यते = विस्तार्यते ।

**वृत्तिः** - चमत्कारो वितन्यते चमत्कृतिर्विस्तार्यते, ह्लादः पुनः पुनः क्रियत इत्यर्थः। केन - काव्यामृतरसेन। काव्यमेवामृतं तस्य रसस्तदास्वाद-स्तदनुभवस्तेन। क्वेत्यभिदधाति अन्तश्चेतसि । कस्य - तद्विदाम्। तं विदन्ति जानन्तीति तद्विदस्तज्ज्ञास्तेषाम्। कथम् - चतुर्वर्गफलास्वादमप्यतिक्रम्य। चतुर्वर्गस्य धर्मादेः फलं तदुपभोगस्तस्यास्वादस्तदनुभवस्तमपि प्रसिद्धातिशयमतिक्रम्य विजित्य पस्पशप्रायं सम्पाद्य।

काव्ये चमत्कारो वितन्यते

**तदयमभिप्रायः - योऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषार्थतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्धः सोऽप्यस्य काव्यामृतचर्वण-चमत्कारकलामात्रस्य न कामपि साम्यकलनां कर्तुमर्हतीति। दुःश्रव-दुर्भण-दुरधिगमत्वादिदोषदुष्टोऽध्ययनावसर एव दुःसह-दुःखदायी शास्त्रसन्दर्भस्तत्कालकल्पितकमनीयचमत्कृतेः काव्यस्य न कथञ्चिदपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं भवति।**

**व्याख्या** - तत् = तस्य। अयम् = एषः। अभिप्रायः = आशयः। यः असौ = सः। चतुर्वर्गफलास्वादः = धर्मादिपुरुषार्थफलानुभवः। प्रकृष्टपुरुषा-र्थतया सर्वशास्त्रप्रयोजनत्वेन = समस्तशास्त्रकारणत्वेन प्रसिद्धः सः अपि अस्य काव्यामृतचर्वणचमत्कारकलामात्रस्य न कामपि साम्यकलनां = समताम्। कर्त्तुं = विधातुमर्हति। दुःश्रव - दुर्भण - दुरधिगमत्वादि-दोष-दुष्टोऽध्यायनावसर एव दुःसह दुःखदायी शास्त्र-सन्दर्भस्तत्कालकल्पितकमनीयचमत्कृतेः काव्यस्य न कथञ्चिद् अपि स्पर्धामधिरोहतीत्येतदप्यर्थतोऽभिहितं = कथितम् भवति।

निष्कर्षोऽयं यत् शास्त्राणामनुशीलनं कष्टदायकं भवति, तस्माद्भिन्नं काव्यमस्ति रसात्मकत्वात्। अतः काव्येन सह शास्त्र-प्रतियोगिता कथमपि न सम्भवति।

**कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम्।**
**आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ॥७॥**

**अन्वयः** - शास्त्रं कटुकौषधवत् अविद्याव्याधिनाशनं (भवति )। काव्यम् आह्लाद्यमृतवत् अविवेकगदापहम् ( भवतीति )।

**व्याख्या** - शास्त्रम् = शास्त्रज्ञानम्। कटुकौषधवत् = कटुरसभेषजवत्। अविद्याव्याधिनाशनम् = अज्ञानरोगविनाशकरं भवति। काव्यम् = कविकृतिः। आह्लाद्यमृतवत्-आह्लादिः = मनोरञ्जकत्वरूपं यदमृतं तद्वत्। अज्ञानरूपरोगापहरणम् भवति। अविवेकगदापहम् = अज्ञानरूपरोगापहरणं भवति। एवं यद्यपि शास्त्रमपि अविद्यारूपं व्याधिं विनाशयति, तथापि शास्त्रं कटुकौषधवत् पूर्वं कष्टं प्रयच्छति। काव्यं तु अध्ययनकाले एव अमृतवत् आह्लादकं भवति अज्ञानरूपं रोगं विनाशयति च।

**काव्यञ्च परमाह्लादामृतरसस्येवाविवेकरूपिणो रोगस्य विनाशको भवति**

वेदादिशास्त्रं (सत्काव्यञ्च) तिक्त-कटुयुक्त-औषधिवत् अविद्यात्मिकायाः व्याधेः नाशयिता भवति। काव्यञ्च परमाह्लादामृतरसस्येवाविवेकरूपिणो रोगस्य विनाशको भवति। अतः काव्यप्रयोजनं सुतरां सिद्धम्।

**आयात्यां च तदात्वे च रसनिस्यन्दसुन्दरम्।**
**येन सम्पद्यते काव्यं तदिदानीं विचार्यते॥ ८॥**

इत्यन्तरश्लोकौ॥ ५।

**अन्वयः** - काव्यम् आयात्यां च तदात्वे च रसनिस्यन्दसुन्दरं येन सम्पद्यते, इदानीं तत् विचार्यते।

**व्याख्या** - काव्यम् = कविकर्म। आयात्याम् = अध्ययनावसरे च। तदात्वे च = तत्प्राप्त्यनन्तरं च। रस-निस्यन्द-सुन्दरम् - रस-निस्यन्देन = आनन्दप्रवाहेण सुन्दरम् = मनोहरम्। येन = यत्तत्त्वेन। सम्पद्यते = भवति। इदानीम् = साम्प्रतम्। तद्विचार्यते = वर्ण्यते।

**अलङ्कृतिरलङ्कार्यमपोद्धृत्य विवेच्यते।**

**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥ ६॥**

**अन्वयः** - अलङ्कृतिः अलङ्कार्यम् उपोद्धृत्य विवेच्यते। तदुपायतया सा अलंकारस्य काव्यता।

**व्याख्या** - अलङ्कृतिः = अलङ्कारः। अलङ्कार्यम् = वाच्यवाचकम्। उपोद्धृत्य = पृथक् पृथक् कृत्वा। विवेच्यते = वर्ण्यते। तत् उपायतया = उपायत्वेन। सा = असौ अलङ्कारस्य काव्यता भवति।

अलङ्कृतस्य काव्यत्वम्

**वृत्तिः** - अलङ्कृतिरलङ्करणम् अलङ्क्रियते ययेति विगृह्य। सा विवेच्यते विचार्यते। यच्चालङ्कार्यमलङ्करणीयं वाचकरूपं वाच्यरूपं च तदपि विवेच्यते। तयोः सामान्यविशेषलक्षणद्वारेण स्वरूपनिरूपणं क्रियते। कथम् - अपोद्धृत्य। निष्कृष्य पृथक् पृथगवस्थाप्य, यत्र समुदायरूपे तयोरन्तर्भावस्तस्माद्विभज्य। केन हेतुना-तदुपायतया। तदिति काव्यं परामृश्यते। तस्योपायस्तदुपायस्तस्य भावस्तदुपायता तया हेतुभूतया। तस्मादेवंविधो विवेकः काव्यव्युत्पत्त्युपायतां प्रतिपद्यते। दृश्यते च समुदायान्तःपातिनामसत्यभूतानामपि व्युत्पत्तिनिमित्तमपोद्धृत्य विवेचनम्। यथा - पदान्तर्भूतयोः प्रकृतिप्रत्यययोर्वाक्यान्तर्भूतानां पदानां चेति। यद्येवमसत्यभूतोऽप्यपोद्धारस्तदुपायतया क्रियते तत् किं पुनः सत्यमित्याह - तत्त्वं सालङ्कारस्य काव्यता। अयमत्र परमार्थः- सालङ्कारस्यालङ्करणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालङ्कृतस्य काव्यत्वमिति स्थितिः, न पुनः काव्यस्यालङ्कारयोग इति।

शब्दार्थसहितौ काव्यम्

***सालङ्कारस्य काव्यतेति सम्मुग्धतया किञ्चित् काव्यस्वरूपमासूत्रितम्, निपुणं पुनर्न निश्चितम्। किंलक्षणं वस्तु काव्यव्यपदेशभाग् भवतीत्याह-***

**शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**

**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥ ७॥**

**अन्वयः** - वक्रकविव्यापारक्षालिनि तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ सहितौ शब्दार्थौ काव्यम्।

**व्याख्या** - वक्रकविव्यापारशालिनि = वक्रशास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धनेन भिन्नम्, कविव्यापारशालिनि = कविव्यापारशोभिते। तद्विदाह्लादकारिणि = काव्यतत्त्वज्ञानानन्दकारिणि। बन्धे = काव्ये। व्यवस्थितौ - विशिष्टरूपेणावस्थितौ। सहितौ = सहभावेन युक्तौ शब्दार्थौ - शब्दश्च, अर्थश्च उभौ। काव्यं भवति।

वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्

**वृत्तिः - शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषांचिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारि काव्यमिति, पक्षद्वयमपि निरस्तं भवति। तस्माद् द्वयोरपि प्रतितिलमिव तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्।**

**यथा -**

**भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि।**
**यदि सल्लीलोल्लापिनि गच्छसि तत् किं त्वदीयं मे॥ ९॥**
**अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम्।**
**परिसरणमरुणचरणे रणरणकमकारणं कुरुते॥ १०॥**

**अन्वयः** - हे आनन्दस्यन्दिसुन्दरेन्दुमुखि ! सल्लीलोल्लापिनि ! अरुणचरणे। भण, यदि रमणमन्दिरं गच्छसि तत् त्वदीयम् अनणुरणन्मणिमेखलम् अविरतशिञ्जानमञ्जुमञ्जीरं परिसरणम् अकारणं मे रणरणकं किं कुरुते।

**व्याख्या** - हे आनन्दस्यन्दिसुरेन्दुमुखि आनन्दं स्यन्दते यस्मात् तद् आनन्दस्यन्दि, सुन्दरम् = रामणीकम्, इन्दुः चन्द्र इव मुखम् = आननम् यस्यास्तत्सम्बुद्धौ = आह्लादस्यन्दिरमणीयचन्द्रानने ! सल्लोलोल्लापिनि - सल्लीलाभिः = उत्तमक्रीडाभिः उत् उच्चैः आलपते = भाषते या सा,

तत्सम्बुद्धौ। अरुणचरणे- अरुणौ चरणौ यस्यातत्सम्बोधने = रक्तचरणे। तरुणि = युवति। भण = कथय। यदि = चेत्। रमणमन्दिरम् = केलिगृहम्। गच्छसि = यासि। तत् = तर्हि। त्वदीयम् = तव। अनुरणन्मणिमेखलम् = अनुरणन्ती मणिमेखला यस्मिन् तत् क्वणन्मेखलम्। अविरतशिञ्जानमञ्जुमञ्जरीम् - अविरतम् = निरन्तरम् शिञ्जानमञ्जुमञ्जरीम् = मधुरनूपुररणनम्। अकारणम् = निष्प्रयोजनम्। परिसरणम् = इतस्ततः परिभ्रमणम्। मे = मम। रणरणकम् = आकुलताम्। किं कुरुते = विदधातीति।

कश्चिद् रसपेशलो नायकः आनन्दस्यन्दनीं चन्द्रमुखीं नायिकां प्रत्याह - हे आनन्दवर्षिणि नायिके शरदिन्दुमुखि! स्वोत्तमक्रीडाविलासनिपुणे! दीर्घस्वरालापिनि! अरुणाब्जपादयुक्ते! यौवनशीले तरुणि! तदा त्वं स्वप्रियतमस्य रमणमन्दिरं यासि, तदा तव झणझणायानमान-मणिमेखलायुत - अनवरतध्वनियुक्ताया अकारणपरिभ्रमणं दुनोति मे चेतः इति अत्रायमाशयः।

अक्षरसमाम्नाया मात्रायाः रमणीयतायाः केवलं वर्णनं कृतं न चात्रोक्तिवैचित्र्यस्यात्र कथनम्

**प्रतिभादारिद्र्यदैन्यादतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यता-मात्रमत्रोदितम्, न पुनर्वाच्यवैचित्र्यकणिका काचिदस्तीति।**

**व्याख्या** - प्रतिभादारिद्र्यदैन्यात् = प्रतिभायाः दारिद्र्यम् = प्रज्ञादरिद्रता, तस्य यद् दैन्यम् = दीनता, तस्मात्। अतिस्वल्पसुभाषितेन = अतिन्यूनसूक्तिवचनेन कविना = सूरिणा। वर्णसावर्ण्यरम्यतामात्रम् = अक्षरसाम्यरमणीयतामात्रम्। उदितम् = कथितम्। पुनः = भूयः। काचित् - कापि। वाच्यवैचित्र्यकणिका = वर्ण्यवैचित्र्यलेशम् अपि नोदितम्।

अयमत्रभावः - उपर्युक्ते श्लोकद्वये प्रतिभाविहीनेनात्यल्पसुभाषिणा कविना अक्षरसमाम्नाया मात्रायाः रमणीयतायाः केवलं वर्णनं कृतं न चात्रोक्तिवैचित्र्यस्यात्र कथनमिति। तस्माद् तद् व्यर्थमेवेति।

**यत्किल नूतनतारुण्यरङ्गितलावण्यपटहकान्तेः कान्तायाः कामयमानेन केनचिदेतदुच्यते- यदि त्वं तरुणि रमणमन्दिरं व्रजसि तत्किं त्वदीयं परिसरणं रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः। किं च न अकारणम्, यतस्तस्यास्तदनादरेण गमनेन तदनुरक्तान्तःकरणस्य विरहविधुरताशङ्काकातरता कारणं रणरणकस्य। यदि वा परिसरणस्य मया किमपराद्धमित्यकारणतासमर्पकम्, एतदप्यतिग्राम्यतरम्। सम्बोधनानि च बहूनि मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि न काञ्चिदपि तद्विदामाह्लादकारितां पुष्णन्तीति यत्किञ्चिदेतत्।**

**व्याख्या** - किल = खलु। यत् नूतनतारुण्यरङ्गितलावण्यपटहकान्तेः - नूतनेन = अभिनवेन तारुण्येन = यौवनेन रङ्गिता लावण्यपटहकान्तिः = मनोरमपटहशोभा यस्यास्तस्याः कान्तायाः = मनोरमायाः। कामयमानेन = इच्छुकेन। केनचित् प्रियतमेन। एतत् = इदम्। उच्यते = कथ्यते। यदि चेत्। त्वम्, तरुणिरमणमन्दिरम् = युवतिकेलिसदनम्। व्रजसि = गच्छसि। तत् = तर्हि किं त्वदीयम् = तावकीनम्। परिसरणम् = गमनम् रणरणकम्, अकारणम् = व्यर्थम्, मम = मे। करोति। इति इयम् = एषा ग्राम्या = ग्रामीणा। उक्तिः = कथनम्। किञ्च = किन्तु। न अकारणम् = अनायासम् यतः = हि । तस्याः । तद् अनादरेण = आदरहितेन। गमनेन = प्रयाणेन। तदनु रक्तान्तःकरणस्य = तदासक्तचेतसः। विरहविधुरताशङ्काकातरता - विरहस्य = वियोगस्य विधुरतायाः = व्याकुलतायाः या शङ्का = सन्देहः, तस्याः कातरता। रणरणकस्य = आकुलतायाः कारणम् = हेतुः । वा = अथवा। यदि। परिसरणस्य = गमनस्य। मया किमपि अपराद्धम् = अपराधं कृतम्। इति अकारणतासमर्पकम् = अकारणतासिद्धिकारम्। एतत् = इदम् अपि। अतिग्राम्यतरम् = अत्यन्तग्रामीणम्। सम्बोधनानि सम्बोधनशब्दाः। च बहूनि। मुनिप्रणीतस्तोत्रामन्त्रणकल्पानि - ऋषिरचितस्तोत्रामन्त्रणकल्पानि। न काञ्चिदपि = न कामपि। तद्विदाम् = तदभिज्ञानाम्। आह्लादकारिताम् = आनन्दकरत्वम्। पुष्णन्ति = पोषणं कुर्वन्ति। इति यत् किञ्चित् एतत् = इदम्।

शब्दवैचित्र्यसनाथे काव्यत्वं न सम्भवति

उपर्युक्ते एवं वर्णसावर्ण्यमात्रमेव विद्यते। तत्र वाच्यवैचित्र्यस्य काणिका अपि नास्ति। प्रतीयते यत् श्लोकस्य कविः प्रतिभाया अतिरिक्तेन स्वल्पसुभाषितो वर्तते। स्वल्पानामेव काव्यसूक्तीनां निर्माणं कविना कृतम्। अत एव अनभ्यासात् अथवैचित्र्यरहिताः तादृशाः श्लोकोक्तरचिता एतादृशे केवले शब्दवैचित्र्यसनाथे काव्यत्वं न सम्भवति।

**वस्तुमात्रं च शोभातिशयशून्यं न काव्यव्यपदेशमर्हति। यथा-**

**व्याख्या -** शोभातिशयशून्यम् = अत्यन्तशोभाहीनम्। वस्तुमात्रम् = केवलं वस्तु। काव्यव्यपदेशम् = काव्यसंज्ञाम्। न अर्हति योग्य न भवति। यथा -

> **प्रकाशस्वाभाव्यं विदधति न भावास्तमसि यत्**
> **तथा नैते ते स्युर्यदि किल तथा तत्र न कथम्।**
> **गुणाध्यासाभ्यासव्यसनदृढदीक्षागुरुगुणो**
> **रविव्यापारोऽयं किमथ सदृशं तस्य महसः॥ ११॥**

**अन्वयः** - तमसि यत् प्रकाशस्वाभाव्यं भावाः न विदधति एते तेन स्युः यदि किल तत्र तथा कथं न। अथ अयम् गुणाध्यासाभ्यासव्यसन-दृढ़दीक्षागुरुगुणः। रविव्यापारः तस्य महसः सदृशम् किम्।

**व्याख्या** - तमसि = अन्धकारे। यत् प्रकाशस्वाभाव्यम् = प्रकृतिप्रकाशत्वम्। भावाः न विदधति = नैव कुर्वति। तथा एते = इमे। ते न स्युः = न भूयुः। यदि किल = खलु। तत्र = तस्मिन् तथाकथं न = केनापि प्रकारेण न भवतु। अयम् = एषः। गुणाध्यासाभ्यासव्यसन-दृढदीक्षागुरुगुणः - गुणानामध्यासस्तस्य योऽभ्यासस्तस्य व्यसनस्य = विनाशस्य दृढा दीक्षा, तस्यां गुरुः गुणः यस्य सः। रविव्यापारः - रवेः = सूर्यस्य व्यापारः = क्रियाकलापः। तस्य = उक्तस्य। महसः = ज्योतेः सदृशम् = समं किं भवितुमर्हति।

**अत्र हि शुष्कतर्कवाक्यवासनाधिवासितचेतसा प्रतिभाप्रतिभातमात्रमेव वस्तु व्यसनितया कविना केवलमुपनिबद्धम्। न पुनर्वाचकवक्रताविच्छित्तिलवोऽपि लक्ष्यते। यस्मात्तर्कवाक्यशय्यैव शरीरमस्य श्लोकस्य। तथा च -तमोव्यतिरिक्ताः पदार्था धर्मिणः, प्रकाशस्वभावा न भवन्तीति साध्यं तमस्य तथाभूतत्वादिति हेतुः। दृष्टान्ततर्हि कथं न दर्शितः, तर्कन्यायस्यैव चेतसि प्रतिभासमानत्वात्। तथोच्यते-**

अत्यन्तशोभाहीनं केवलं वस्तु न काव्यम्

**व्याख्या** - हि = अतः। अत्र अस्मिन् श्लोके । शुष्कतर्कवाक्यवासनाधिवासितचेतसा - शुष्कस्य तर्कवाक्यस्य या वासना तया अधिवासितं चेतो यस्य सः, तेन = नीरसतर्कवाक्यवासनापूरितमनसा। कविना = सूरिणा। प्रतिभाप्रतिभातमात्रमेव - प्रतिभया= बुद्धया प्रतिभातमात्रम् = प्रतीतिमात्रम् । एव । वस्तुव्यसनितया कविताव्यसनहेतुना। केवलम् = मात्रम्। उपनिबद्धम् = वर्णितम्। पुनः भूयः। वाचकवक्रताविच्छित्तिलवः = शब्दवक्रताशोभालेशः अपि। न लक्ष्यते नैव दृश्यते। यस्मात् = यतः। तर्कवाक्य-शय्या एव = तर्कवाक्याधिवास एव। अस्य एतस्य श्लोकस्य। शरीरम् = कलेवरम्। तथा च-तमोव्यतिरिक्ताः = अन्धकाररहिताः। पदार्थाः = वस्तूनि । धर्मिणः प्रकाश-स्वभावाः = प्रकृत्या प्रकाशकराः, न भवन्ति। इति साध्यम् = प्रतिज्ञावाक्यम्। तमसि = अन्धकारे। अतथाभूतत्वात् = अप्रकाशस्वभावत्वात्। इति हेतुः = कारणम्। तर्हि= ततः। दृष्टान्तः = उदाहरणम्। कथं न दर्शितः = प्रदर्शितः। तर्कन्यासस्य = तर्कः न्यासो यस्य सः तस्य एव । चेतसि मनसि । प्रतिभासमानत्वात् = प्रतिभासत्वहेतोः। तथा उच्यते = कथ्यते।

प्रस्तुतेऽस्मिन् श्लोके नीरसतर्ककर्कशवाक्यवासनाधिवासितेन कविना - स्वप्रतिभाप्रतीतमात्रवस्तुव्यसनमात्रमेव केवलमुपनिबद्धं न चात्र शब्दवक्रतायाः शोभायाः लेशमात्रमपि दिग्दर्शनं, यतो हि तर्काश्रिता शय्या एवास्य शरीरमपरञ्च तमोऽतिरिक्तपदार्थधर्मिणः प्रकाशप्रकृतिकाः न भवन्ति, अयमत्र साध्यः। तमसि

प्रकाशाभावाद्हेतुः, तदा कथमत्र न प्रदर्शितो दृष्टान्तः - चेतसि तर्कन्यासप्रतिष्ठापनात्।

**तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः।**

**स्थाप्येते विदुषां वाच्यो हेतुरेव हि केवलः॥ १२॥**

**अन्वयः** - हि दृष्टान्तेतद्भावहेतुभावौ तद् अवेदिनः स्थाप्येते। हि विदुषां वाच्यः केवलः हेतुः एव।

**व्याख्या** - हि = यतः। दृष्टान्ते तद्भावहेतुभावौ - तत् = तस्य भावः हेतोः भावश्च, तौ तदवेदिनः = तदपरिचितजनस्य। स्थाप्येते = क्रियेते। हि = यतः। विदुषाम् = तत्परिचितानाम् सुविज्ञानाम्। केवलः = मात्रम्। वाच्यः = शब्दः। हेतुः एव कथ्यते।

विदुषां वाच्यः केवलः हेतुः एव कथ्यते

**वृत्तिः - विदधतीति विपूर्वो दधातिः करोत्यर्थे वर्तते। स च करोत्यर्थोऽत्र न सुस्पष्ट-समन्वयः, प्रकाशस्वाभाव्यं न कुर्वन्तीति। प्रकाशस्वाभाव्यशब्दोऽपि चिन्त्य एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भाव भावप्रत्यये विहिते पूर्वपदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वभाव्यमित्यत्रापि भावप्रत्ययान्ताद्भावप्रत्ययो न प्रचुरप्रयोगार्हः। तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासोऽपि न समीचीनः।**

**व्याख्या** - विदधति = विपूर्वो दधाति करोति इत्यर्थे वर्तते। स च करोति अर्थः अत्र न सुस्पष्टसमन्वयः = स्पष्टतया नैव समन्वितो भवति, प्रकायस्वाभाव्यं न कुर्वन्तीति। प्रकाशस्वाभाव्यशब्दः अपि चिन्त्यः= विचारणीय एव। प्रकाशः स्वभावो यस्यासौ प्रकाशस्वभावः, तस्य भावः इति भावप्रत्यये विहिते = कृते पूर्वपदस्य वृद्धिः प्राप्नोति। अथ स्वभावस्य भावः स्वाभाव्यम् इति अत्रापि भाव प्रत्ययान्तात् भावप्रत्ययो न प्रचुरप्रयोगार्हः = बहुप्रयोगयोग्यः। तथा च प्रकाशश्चासौ स्वाभाव्यं चेति विशेषणसमासः। अपि न समीचीनः = शोभनः।

**एवमुक्तपद्यस्य - तृतीये, च पादेऽत्यन्तासमर्पकसमासभूयस्त्ववैशसं न तद्विदाह्लादकारितामावहति। रविव्यापार इति रविशब्दस्य**

**प्राधान्येनाभिमतस्य समासे गुणीभावो न विकल्पितः, पाठान्तरस्य 'रवेः' इति संभवात्।**

**व्याख्या** - तृतीये पादे = चरणे। अत्यन्तासमर्पकसमासभूयस्त्ववैशसम् - अत्यन्तम् असमर्पकम् = अर्थबोधबाधकम्, समासभूयस्त्वम् = समासबहुलत्वम्, तेन यत् वैशसं - कष्टं तत्। तद्विदाह्लादकारिताम् - तद्विदाम् = काव्यतत्त्वज्ञानाम् आह्लादकारिताम् -आनन्दकरत्वम्। न आवहति। समासभूयस्त्वं काव्यानन्दे बाधकमित्यर्थः। रविव्यापार इति शब्दः, चतुर्थचरणे प्रयुक्तः। तत्रापि 'रवि' शब्दस्य, प्राधान्येन = प्रधानतायाः। अभिमतस्य = सम्मतस्य। समासे गौणभावेन प्रयुक्ते सति कविना न प्राधान्यरक्षायां प्रयत्नः कृतः। यतः पाठान्तरस्य पाठभेदे कृते सति 'रवेः' इति प्रथक्पदस्य सम्भवात्। न तत्रापि छन्दोभङ्गः स्यादित्यर्थः।

**ननु वस्तुमात्रस्याप्यलङ्कारशून्यतया कथं तद्विदाह्लादकारित्वमिति चेत्तन्न; यस्मादलङ्कारेणाप्रस्तुतप्रशंसालक्षणेनान्यापदेशतया स्फुरितमेव कविचेतसि। प्रथमं च प्रतिभाप्रतिभासमानमघटितपाषाण-शकलकल्पमणिप्रख्यमेव वस्तु विदग्धकवि-विरचितवक्रवाक्योपारूढं शाणोल्लीढमणिमनोहरतया तद्विवाह्लादकारिकाव्यत्वमधिरोहति। तथा चैकस्मिन्नेव वस्तुन्यवहितानवहितकत्रिद्वितयविरचितं वाक्यद्वयमिदं महदन्तरमावेदयति।**

अप्रस्तुतप्रशंसाद्यलङ्कारेण अन्यापदेशतया कविमनसि स्फुरितम् एव

**व्याख्या** - ननु = खलु। वस्तुमात्रस्य केवलं वस्तुनः अपि। अलङ्कारशून्यतया = अलङ्काराणां रिक्ततया। तद्विदाह्लादकारित्वम् - तद्विदाम् काव्यमर्मज्ञानाम् आह्लादकारित्वम् आनन्ददायित्वम्। कथम् = केन प्रकारेण भवतीति। चेत्। तन्न। यस्मात् = यतः। अलङ्कारेण अप्रस्तुतप्रशंसालक्षणेन = अप्रस्तुतप्रशंसाद्यलङ्कारेण। अन्यापदेशतया = शून्यतया। कविचेतसि = कविमनसि। स्फुरितम् एव। प्रथमं च = पूर्वं च। प्रतिभाप्रतिभासमानम् - प्रतिभायां = बुद्धौ प्रतिभासमानम् = प्रतीतम्। अघटितपाषाणशकलकल्पमणिप्रख्यम्- अघटितम् =

अघर्षितम्, पाषाणशकलकल्पम् = प्रस्तरखण्डसदृशम् मणिप्रख्यम् = मणिवत् एव। वस्तु = वर्ण्यविषयम्। विदग्धकविरचितवक्रवाक्यो-पारूढम् - विदग्धैः चतुरैः, कविभिः = सूरिभिः, विरचितम् = निर्मितम् यद् वक्रम् = चमत्कारि, वाक्यम् = श्लोकम्, तस्मिन् उपारूढम् उपनिबद्धम् तत्। शाणोल्लीडमणिमनोहरतया - शाणे घर्षणप्रस्तरे उल्लीढस्य = घर्षितस्य मणेः = रत्नस्य मनोहरतया = मनोरमतया। तद्विदाह्लादकारिकाव्यत्वम् - काव्यमर्मज्ञानामानन्दकारिकविताम्। अधिरोहति = प्राप्नोति। तथा च एकस्मिन् एव वस्तुनि = एक एव वर्ण्यविषये। अवहितानवहितकत्रिद्वितयविरचितम् - अवहितेन = सावधानमनसा अनवहितेन = असावधानतया वा त्रिद्वितयम् = द्वित्रिप्रकारकम्। विरचितम् = रचितम्। वाक्यद्वयम् = श्लोकद्वयम्। इदम् = एतत्। महदन्तरम् = अत्यन्तभिन्नताम्। आवेदयति = प्रकटति।

**मानिनीजनविलोचनपातानुष्णबाष्पकलुषानभिगृह्णन्।**
**मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः॥ १३॥**

**अन्वयः** - शीतमयूखः मानिनीजनविलोचनपातानुष्णबाष्पकलुषान् अभिगृह्णन् मन्द-मन्दम् उदितः भीतः इव खं प्रययौ।

रमणीयताविशिष्टे शब्दे एव काव्यत्वं

**व्याख्या** - मानिनीजनविलोचनपातान् मानिनीजनानाम् = विणीस्त्रीणाम् विलोचनाभ्यां नयना-सुधा - मानिनीति। शीतमयूखः शीताः मयूखाः यस्येति शीतलकिरणचन्द्रः। पतन्तीतिपातास्तान् निपतितान्। उष्णबाष्पकलुषान् = तप्ताश्रुकलुषान्। अभिगृह्णन = अङ्गीकुवन्। मन्दमन्दम् शनैः शनैः। उदितः पूर्वदिशायामुदयं गतः। भीतः = त्रस्तः। इव = यथा। खम् = आकाशम्। प्रययौ = अगात्।

**क्रमावेकद्वित्रि-प्रगतिपरिपाटीः प्रकटयन्**
**कलाः स्वैरं स्वैरं नवकमलकन्दाङ्कुररुचः।**
**पुरन्ध्रीणां प्रेयोविरहदहनोद्दीपितदृशां**
**कटाक्षेभ्यो बिभ्यन्निभृत इव चन्द्रोऽभ्युदयते॥ १४॥**

**अन्वयः** - नवकमलकन्दाङ्कुररुचः कलाः स्वैरं स्वैरं क्रमो एकद्वित्रि-प्रगतिपरिपाटीः प्रकटयन् प्रेयोविरहदहनोद्दीपितदृशां कटाक्षेभ्यः बिभ्यन् निभृत इव चन्द्रः अभ्युदयते।

**व्याख्या** - नवकमलकन्दाङ्कुररुचः नवस्य = नूतनस्य, कमलकन्दस्य = कमलमूलस्य अङ्कुरस्य, रुचिः = कान्तिरिव रुचियस्य तस्य। कलाः = कान्त्यः । स्वैरं स्वैरम् = स्वच्छन्दम् । क्रमौ क्रमगत्या । एकद्वित्रिप्रगतिपरिपाटीः = एकद्वित्रिप्रगतिविधीन् । प्रकटयन् = प्रकाशयन्। प्रेयोविरहदहनोद्दोपितदृशाम् - प्रेयसाम् = प्रियतमानाम्, विरहदहनेन = वियोगाग्नि, उद्दोपिताः = आकुलिताः, दृशाः = चक्षूंषि यासां तास्तासाम्। पुरन्ध्रीणाम् = नगरसुन्दरीणां कटाक्षेभ्यः, बिभ्यन् = भयं कुर्वन्। निभृत इव = प्रच्छन्न इव। चन्द्रः = इन्दुः। अभ्युदयते = उदयाचलं याति।

***उभयमत्र चन्द्रोदयस्य स्फीतं वर्णनं विद्यते। कथनस्य प्रकारभेदेऽपि स्वरूपसाम्यं तु विद्यत एव। अतः कविराह -***

**एतयोरन्तरं सहृदयसंवेद्यमिति तैरेव विचारणीयम्। तस्मात् स्थितमेतत् न शब्दस्यैव रमणीयताविशिष्टस्य केवलस्य काव्यत्वम्, नाप्यर्थस्येति। तदिदमुक्तम्-**

काव्यत्वं तु उभयत्र प्रसरति

**व्याख्या** - एतयोः = उभयोः श्लोकयोः। अन्तरम् = मध्यम्। सहृदयसंवेद्यम् = रसिकसंवेद्यम्। इति। तैः = सहृदयैः एव। विचारणीयम् = चिन्तनीयम्। तस्मात् = तर्हि। एतत् = इयम्। स्थितम् = अवस्थितम्। न शब्दस्यैव = नैव वाच्यस्यैव। रमणीयताविशिष्टस्य = रम्यताविशेषस्य। केवलस्य = मात्रस्य। काव्यत्वम् = काव्यता। नापि अर्थस्य = वाचकस्यापि नैव काव्यत्वम्। तत् = तस्मात्। इदम् = एतत्। उक्तम् = कथितम्।

अत्रायं भावः स्फुटीभवति यत् - रमणीयताविशिष्टस्य शब्दस्यैव न केवलं काव्यत्वं न चाप्यर्थस्यैव केवलं, काव्यत्वन्तूभयत्र प्रसरति।

**रूपकादिरलंकारस्तथान्यैर्बहुधोदितः**

**न कान्तमपि निर्भूषं विभाति वनितानननम्॥ १५॥**

**अन्वयः** - तथा रूपकादिः अलङ्कारः अन्यैः बहुधा उदितः। कान्तम् अपि निर्भूष वनिताननं न विभाति।

**व्याख्या** - तथा = च। रूपकादिः = रूपकप्रभृतिः अलङ्कारः। अन्यैः = अपरैरालङ्कारिकैः। बहुधा = बहुप्रकारम्। उदितः = कथितः। कान्तम् = कान्तियुक्तम् अपि। निर्भूषम् = भूषणरहितम्। वनितानननम् = रमणीमुखम्। न विभाति = नैव शोभते।

***रूपकाद्यलङ्कारान्यैरलङ्कारिकैरनेकविधैः उक्तः परञ्च रमणीयं सौन्दर्ययुक्तमपि भूषणरहितं वनिताऽननं न शोभते। तथा चाह-***

**रूपकादिमलङ्कारं बाह्यमाचक्षते परे।**

**सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥ १६॥**

काव्यस्यालङ्कारिता तु सुबन्ते तिङ्न्ते व्युत्पत्तिं स्वीकुर्वन्ति

**अन्वयः** - यो रूपकादिम् अलङ्कारं बाह्यम् आचक्षते। वाचाम् अनलङ्कृतिं सुपां तिङां च व्युत्पत्तिं वाञ्छन्ति।

**व्याख्या** - परे = अन्ये। रूपकादिम् = रूपकप्रभृतिम्। अलङ्कारम्। बाह्यम् = गौणम्। आचक्षते = कथयन्ति। वाचाम् = काव्यानाम्। अनलङ्कृतिम् = अलङ्कारशून्यताम्। सुपाम् = सुबन्तानाम्। तिङाम् = तिङन्तानाञ्च। व्युत्पत्तिम् = व्याख्याम्। वाञ्छन्ति = अभिलषन्ति।

अत्रायमाशयः भामहादयः पूर्ववर्त्तिनः आलङ्कारिकाः विद्वांसः रूपकाद्यलङ्कारं गौणरूपेणामनन्ति, काव्यस्यालङ्कारिता तु सुबन्ते तिङ्न्ते (संज्ञापदानां क्रियापदानाञ्च) व्युत्पत्तिं स्वीकुर्वन्ति। तस्मात्-

**तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।**

**शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः॥ १७॥**

**अन्वयः** - तत् एतत् सौशब्द्यम् आहुः ईदृशी अर्थव्युत्पत्तिः न। नः तु शब्दाभिधेयालङ्कारभेदात् द्वयम् इष्टम्।

**व्याख्या** - तत् = तर्हि । एतत् = इदम् । सौशब्द्यम् = शब्दचमत्कारिताम्। आहुः = प्रोक्तवन्तः। ईदृशी = एतादृशी। अर्थव्युत्पत्तिः = आर्थीव्याख्या नैव भवतीति। नः = अस्माकं तु शब्दाभिधेयालङ्कारभेदात्- शब्दालङ्कारभेदात् अर्थालङ्कारभेदाच्च। द्वयम् = उभयम्। दृष्टम् = अभीष्टम्।

अत्रायमाशयो यत् - कारणमिदमभिलक्ष्यैव प्रस्तुतं सौशब्दं (चमत्कारं शब्दालङ्कारं) आलङ्कारिकाचार्यचरणैः - अर्थस्य व्युत्पत्तिरेतादृशी न भवति।

**तेन शब्दार्थौ द्वौ सम्मिलितौ काव्यमिति स्थितम् एवमवस्थापिते द्वयोः काव्यत्वे काचिदेकस्य मनाङ्मात्रन्यूनतायां सत्यां काव्यव्यवहारः प्रवर्ततेत्याह - सहिताविति। सहितौ सहितभावेन साहित्येनावस्थितौ।**

शब्दार्थौ सम्मिलितौ काव्यमिति

**व्याख्या** - तेन = तर्हि। शब्दार्थौ = शब्दश्च, अर्थश्च तौ। द्वौ = उभौ। सम्मिलितौ = संयुक्तौ। काव्यं स्थितम् = काव्यरूपं नियतम् इति। एवम् = इत्थम्। द्वयोः = उभयोः। काव्यत्वे = काव्यहेतौ। अवस्थिते = निर्धारिते सति। काचित् = कापि। एकस्य शब्दस्य अर्थस्य वा केवलमेकस्य। मनाङ्मात्रन्यूनतायाम् सत्याम् = स्तोकमात्रमभावे सति काव्यव्यवहारः। प्रवर्त्तते = प्रवर्त्तितो भवति । इति आह = अत एवोक्तम्। सहितौ = शब्दार्थसहितौ । सहितभावेन = संयुक्तभावेन । साहित्येन = साहित्यरूपेण। अवस्थितौ = संस्थितौ।

**ननु च वाच्यवाचकसम्बन्धस्य विद्यमानत्वादेतयोर्न कथंचिदपि साहित्यविरहः, सत्यमेतत् । किन्तु विशिष्टमेवेह साहित्यमभिप्रेतम् । कीदृशम् ? - वक्रताविचित्र-गुणालङ्कारसम्पदां परस्परस्पर्धाधिरोहः । तेन-**

**व्याख्या** - ननु = यदि च। वाच्यवाचकसम्बन्धस्य = शब्दार्थसम्बन्धस्य। विद्यमानत्वात् = स्थितित्वात् । एतयोः = अनयोः । कथञ्चिदपि = केनापि प्रकारेण । साहित्यविरहः = साहित्याविद्यमानता । न = नैव भवति। एतत् = इदम्। सत्यम् = तथ्यम्। किन्तु इह - अत्र। विशिष्टम्

= विशेषप्रकारकम् । एव साहित्यम् = काव्यम् । अभिप्रेतम् = अभीष्टम्। कीदृशम् कीदृग्विधम् ? वक्रताविचित्रगुणालङ्कारसम्पदाम् - वक्रताभिः विचित्रगुणानाम् अलङ्काराणाञ्च याः सम्पदस्वासाम्। परस्परं स्पर्धाधिरोहः = अन्योन्यं स्पर्धायाः पराकाष्ठा भवतीति।

**समसर्वगुणौ सन्तौ सुहृदाविव सङ्गतौ।**
**परस्परस्य शोभायै शब्दार्थौ भवतो यथा॥ १८॥**

**अन्वयः** - समसर्वगुणौ सन्तौ सुहृदौ इव सङ्गतौ शब्दार्थौ परस्परस्य शोभायै यथा भवतः।

समस्तैः सर्वगुणयुक्तयोः मित्रयोरिव शब्दार्थौ परस्परं शुशुभाते

**व्याख्या** - समसर्वगुणौ - समाः = समानाः, अन्यूनाः सर्वगुणाः यत्र तथाविधौ सन्तो। सुहृदौ = मित्रे। इव = यथा। सङ्गतौ = सम्मिलितौ। शब्दार्थौ = वाच्यवाचकौ । परस्परस्य = अन्योन्यस्य । शोभायै = शोभानिमित्तम्। यथा = येन प्रकारेण। भवतः = स्तः।

**ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।**
**दधे कामपरिक्षामकामिनीगण्डपाण्डुताम्॥ १९॥**

**अन्वयः** - ततः अरुणपरिस्पन्दमन्दीकृतवपुः शशी कामपरिक्षामकामिनीगण्डपाण्डुतां दधे।

**व्याख्या** - उदाहृतः श्लोकोऽयमादिकविना वाल्मीकिना प्रणीतः ततः = तदन्तरम्। अरुणपरिस्पन्दमन्दीकृतवपुः - सूर्योदयात्, सूर्यस्य अरुणिम्ना, परिस्पन्देन = सञ्चारणेन। मन्दीकृतम् = शिथिलितम्। वपुः = शरीरम् यस्य सः । वा क्षीणशरीरः, शशी = चन्द्रमा । कामपरिक्षामकामिनीगण्डपाण्डुताम् - कामेन = कन्दर्पेण परिक्षामा = क्षीणा, कामिनी = तस्याः, गण्डयोः = कपोलस्थलयोः या पाण्डुता = पाण्डुरता, ताम्। दधे = धृतवान्।

**वृत्ति - अत्रारुणपरिस्पन्दनमन्दीकृतवपुषः शशिनः कामपरिक्षामवृत्तेः कामिनीकपोलफलकस्य च पाण्डुत्वसाम्यसमर्थनादर्थालङ्कारपरिपोषः शोभातिशयमावहति। वक्ष्यमाणवर्णविन्यासवक्रतालक्षणः शब्दाल-**

**ङ्कारोऽप्यतितरां रमणीयः। वर्णविन्यासविच्छित्तिविहिता लावण्यगुण-संपदस्त्येव।**

**व्याख्या** - अत्र अस्मिन् श्लोके। अरुणपरिस्पन्दीकृतवपुषः- अरुणसञ्चरणमन्दकान्तशरीरस्य । शशिनः = चन्द्रस्य । कामपरिक्षा-मवृत्तेः = मदनक्षणिव्यापारस्य। कामिनीकपोलफलकस्य = रमणीगण्डस्थलस्य । च पाण्डुत्वसाम्यसमर्थनात् = पाण्डुरतासमान-समर्थनहेतोः। अर्थालङ्कारपरिपोषः = अर्थालङ्कारपरिपुष्टिः । शोभातिशयम् = अत्यधिकशोभाम् । आवहति = धारयति । वक्ष्यमाणवर्णविन्यास - वक्रतालक्षणः वर्णितवर्णविन्यासस्य = अक्षरविन्यासस्य, वक्रता = शोभा लक्षणं यस्य तथाविधः शब्दालङ्कारः अपि। अतितराम् = अत्यन्तम्। रमणीयः = मनोरमः। वर्णविन्यासविच्छित्तिविहिता - अक्षरन्यासशोभासम्पन्नः। लावण्यगुण-सम्पदः = सौन्दर्यगुणसम्पत्तिः अस्त्येव।

अर्थालङ्कारपरिपुष्टिः अत्यधिकशोभाम् धारयति

**यथा च-**

**लीलाइ कुवलअं कुवलअं व सीसे समुव्वहंतेण।**
**सेसेण सेसपुरिसाणं पुरिसआरो समुप्पसिओ॥ २०॥**

**संस्कृतच्छाया -**

**लीलया कुवलयं कुवलयमिव शीर्षे समुद्वहता।**
**शेषेण शेषपुरुषाणां पुरुषकारः समुपहसितः॥**

**अन्वयः** - कुवलयम् इव कुवलयं लीलया शीर्षे ससुद्वहता शेषेण शेषपुरुषाणां पुरुषकारः समुत्पन्नः।

कुवलयम् इव = कमलसदृशम्। कुवलयम् - कोः पृथिव्याः वलयम् - मण्डलम्। लीलया = क्रीडया। शीर्षे = शिरसि। समुद्वहता = धारयता। शेषपुरुशाणाम् = अन्यसमस्तजनानाम्, नागानाञ्च। पुरुषकारः = शेषेण = शेषनागेन। शेषपुरुषाणाम् पौरुषम्। समुपहसितः = उपहासतां नीतः।

**वृत्ति - अत्राप्रस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहितामाह्लादयति। हेलामात्रविरचितयमकानुप्रासहारिणी समर्पकत्वसुभगा कापि काव्यच्छाया सहृदयहृदयमाह्लादयति।**

**व्याख्या -** अत्र = अस्मिन् पद्ये। अप्रस्तुतप्रशंसोपमालक्षणवाच्यालङ्कारवैचित्र्यविहिता- अप्रस्तुतप्रशंसायाः उपमारूपार्थालङ्काराणां च वैचित्र्येण विचित्रतया विहिता = कृता समुत्पन्ना वा। हेलामात्रविरचितयमकानुप्रासहारिणीहेलामात्रेण = लीलयैव, विरचिता = रचिता, यमकानुप्रासमनोरमा। सम्पर्कत्वसुभगा अर्थसरला। कापि = काचित् अनिर्वचनीया। काव्यच्छाया = काव्यशोभा । सहृदयहृदयम् = सरसचित्तम्। आह्लादयति = आनन्दयति।

अर्थालङ्कारशब्दालङ्काद्वारा सहृदयमाह्लादयति

**वृत्ति - द्विवचनेनात्र वाच्यवाचकजातिद्वित्वमभिधीयते। व्यक्तिद्वित्वाभिधाने पुनरेकपदव्यवस्थितयोरपि काव्यत्वं स्यादित्याह बन्धे व्यवस्थितौ । बन्धो वाक्यविन्यासः तत्र व्यवस्थितो विशेषेण लावण्यादिगुणालङ्कारशोभिना संनिवेशेत कृतावस्थानौ । सहितावित्यत्रापि यथायुक्ति स्वजातीयापेक्षया शब्दस्य शब्दान्तरेण वाच्यस्य वाच्यान्तरेण च साहित्यं परस्परस्पर्धित्वलक्षणमेव विवक्षितम्। अन्यथा तद्विदाह्लादकारित्वहानि प्रसज्येत।**

**व्याख्या** - अत्र = अस्मिन् स्थले। द्विवचनेन 'शब्दार्थौ इत्यत्रद्विवचनप्रयोगेण। वाच्यवाचकजातिद्वित्वम् शब्दार्थजातिद्वित्वम्। अभिधीयते = कथ्यते। व्यक्तिद्वित्वाभिधाने = व्यक्तिगतद्वित्वकथने पुनः एकपदव्यवस्थितयोः = एकपदस्थितयोः अपि। काव्यत्वम् = साहित्यम्, स्यात्। इत्याह = इति कथितम् । बन्धे = रचनायाम्। व्यवस्थितौ = वैशिष्ट्येन स्थितौ शब्दार्थौ। बन्धः = रचना वाक्यविन्यासः । तत्र = वाक्यविन्यासे व्यवस्थितः। विशेषेण = विशिष्टतया। लावण्यादिगुणालङ्कारशोभिना = लावण्यादिगुणधर्मिणा। सन्निवेशेत। कृतावस्थानौ = विहितावस्थायाम्। 'सहितौ' इत्यत्रापि = अस्मिन् शब्देऽपि । यथायुक्ति युक्त्यनुसारम् । स्वजातीयापेक्षया = शब्दापेक्षया । शब्दस्य = वाच्यस्य । शब्दान्तरेण = अन्यशब्देन ।

वाच्यस्य = शब्दस्य । वाच्यान्तरेण = अन्यवाच्येन च। साहित्यम् = काव्यम् । परस्परस्पर्धित्वलक्षणम् एव = अन्योन्यस्पर्धितारूपमेव । विवक्षितम् = कथितम्। अन्यथा = तद्विदाह्लादकारित्वहानिः। तद्विदाम् काव्यमर्मज्ञानाम् आह्लादकारित्वहानिः आनन्ददायित्वहानिः। प्रसज्येत भवेत्।

**यथा-**

अर्थसाहित्यस्य विरहः जातः

**असारं संसारं परिमुषितरत्नं त्रिभुवनं**
**निरालोकं लोकं मरणशरणं बान्धवजनम्।**
**अदर्पं कन्दर्पं जननयननिर्माणमफलं**
**जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः॥ २१॥**

**अन्वयः** - संसारम् असारं, त्रिभुवनं परिमुषितरत्नं, लोकं निरालोकं, बान्धवजनं मरणशरणं, कन्दर्प अदर्पम्, जननयननिर्माणम् अफलं, जगत् जीर्णारण्यं विधातुं कथं व्यवसितः असि।

**व्याख्या** - संसारम् = विश्वम्। असारम् = सारहीनम्। त्रिभुवनम् = त्रिलोकम्। परिमुषितरत्नम् - परिमुषितानि = अपहृतानि रत्नानि यस्य तत्। लोकम् = संसारम्। निरालोकम् = प्रकाशरहितम्। बान्धवजनम् बन्धुजनम्। मरणशरणम् = मृत्युशीलम्। कन्दर्पम् = मदनम्। अदर्पम् निरभिमानम्। जननयननिर्माणम् = लोकनेत्रोत्पादनम्। अफलम् = निष्फलम्। जगत् = लोकम्। जीर्णारण्यम् = शीर्णवनम्। विधातुम् = कर्तुम्। कथम् = केन प्रकारेण। व्यवसितः = कृतोद्यमः असि।

**वृत्ति - अत्र किल कुत्रचित्प्रबन्धे कश्चित्कापालिकः कामपि कान्तां व्यापादयितुमध्यवसितो भवन्नेवमभिधीयते - यदपगतसारः संसारः, हृतरत्नसर्वस्वं त्रैलोक्यम्, आलोककमनीयवस्तुवर्जितो जीवलोकः, सकललोकलोचननिर्माणं निष्फलप्रायम्, त्रिभुवनविजयित्वदर्पहीनः कन्दर्पः, जगज्जीर्णारण्यकल्पमनया विना भवतीति किं त्वमेवंविधमकरणीयं कर्तुं व्यवसित इति।**

**व्याख्या** - अत्र = अस्मिन् श्लोके । किल = खलु । कुत्रचित् = क्वापि । प्रबन्धे = महाकाव्ये। कापालिकः = भिक्षुः। कामपि कान्ताम् = रमणीम्। व्यापादयितुम् = हन्तुम्। अध्यवसितः उद्यतः भवन्। एवम् = इत्थम्। अभिधीयते = कथ्यते। यत् अपगतसारः = निःसारः। संसारः = लोकः । हृतरत्नसर्वस्वं = अपहृतरत्नाखिलम्। त्रैलोक्यम् = त्रिभुवनम्। आलोककमनीयवस्तुवर्जितः = प्रकाशमनोरमवस्तुरहितः । जीवलोकः = संसारः। सकललोकलोचननिर्माणम् = समस्तजननयननिर्माणम् । निष्फलप्रायम् = व्यर्थप्रायम्। त्रिभुवनविजयित्वदर्पहीनः = त्रिलोकजयशीलताभिमानशून्यः। कन्दर्पः = मदनः । जगत् = विश्वम्। जीर्णारण्यकल्पम् = शीर्णकाननसदृशम्। भवतीति किं त्वं कापालिकः एवं विधम् = इत्थम् । अकरणीयम् = अकृत्यम् । कर्त्तुम् = विधातुम् व्यवसितः = कृतोद्यमः असि इति।

प्रस्तुतवस्तुनः सब्रह्मचारिवस्तुभिन्न अपि सरलतया प्रापयत्यमेव

**वृत्ति - एतस्मिन् श्लोके महावाक्यकल्पे वाक्यान्तराण्यवान्तर-वाक्यसदृशानि सकललोकलोभनीयलावण्यसम्पत्प्रतिपादनपराणि परस्परस्पर्धीन्यतिरमणीयान्यूपनिबद्धानि कमपि काव्यच्छायातिशयं पुष्णन्ति । मरणशरणं बान्धवजनमिति पुनरेतेषां न कलामात्रमपि स्पधितुमर्हतीति न तद्विदाह्लादकारि। बहुषु च रमणीयेष्वेक-वाक्योपयोगिषु युगपत् प्रतिभासपदवीमवतरत्सु वाक्यार्थपरिपूरणार्थं तत्प्रतिमं प्राप्तुमपरं प्रयत्नेन प्रतिभा प्रसाद्यते। तथा चास्मिन्नेव प्रस्तुतवस्तु सब्रह्मचारिवस्त्वन्तरमपि सुप्रापमेव -**

**"विधिमपि विपन्नाद्भुतविधिम्" इति।**

**व्याख्या**- एतस्मिन् श्लोके = अस्मिन् पद्ये। महावाक्यकल्पे = महा-वाक्यसदृशे। वाक्यान्तराणि = अन्यवाक्यानि। अन्तरवाक्यसदृशानि = अपरवाक्यतुल्यानि। तस्याः = मालत्याः। सकललोकलोभनीय-लावण्यसम्पत्प्रतिपादनपराणि- सकललोकैः = समस्तजनैः लोभनीयस्य लावण्यस्य = सौन्दर्यस्य, सम्पदः = सम्पत्तयः प्रतिपादने = समर्थने, पराणि = संलग्नानि । परस्परस्पर्द्धानि = अन्योन्यस्पर्धीनि

अतिरमणीयानि = अतिमनोरमाणि। उपनिबद्धानि = रचितानि। कमपि काव्यच्छायातिशयम् = काव्यशोभातिशयम्। पुष्णन्ति = पोषणं कुर्वन्ति। मरणशरणम्-मरणमेव शरणं यस्य सः, तम् = मृत्युशीलम्। बान्धवजनम् = बान्धवम्। इति पुनः = भूयः। एतेषाम् = अमीषाम्। कलामात्रम् = अंशमात्रम् अपि। स्पर्धितुम् = स्पर्धां कर्त्तुम्। नार्हति = योग्यं नास्ति। अतः तद्विदाह्लादकारि न = काव्यमर्मज्ञानामानन्दकारि नास्ति। बहुषु = बहुलेषु। रमणीयेषु = मनोरमेषु च। एकवाक्योपयोगिषु = एकवाक्याय उपयोगिषु। युगपत् = सहैव। प्रतिभासपदवीम् = आभासत्वम्। अवतरत्सु = प्रकटत्सु। वाक्यार्थपरिपूरणार्थम् = वाक्यार्थपूर्त्यर्थम्। तत्प्रतिमम् = तद्वाक्यसदृशम्। 'प्राप्तुम् = लब्धुम्। अपरम् = अन्यम्। प्रयत्नेन आयासेन। प्रतिभा = भा। प्रसाद्यते = प्रसन्नीक्रियते। तथा च अस्मिन् एव प्रस्तुतवस्तु सब्रह्मचारिवस्त्वन्तरमपि = प्रस्तुतवस्तुनः सब्रह्मचारिवस्तुभिन्न अपि। सुप्रापमेव = सरलतया प्रापयत्यमेव।

विधिम् = ब्रह्माणम् अपि। विपन्नाद्भुतविधिम् = विनाशाद्भुतविधिम्।

**प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरासम्भवे सुकुमारतरापूर्वसमर्पणेन कामपि काव्यच्छायामुन्मीलयन्ति कवयः।**

**व्याख्या** - कवयः = कविजनाः। प्रथमप्रतिभातपदार्थप्रतिनिधिपदार्थान्तरापदार्थान्तरासम्भवे = प्रथमम् = सर्वप्रथमं प्रतिभातपदार्थस्य = प्रतीतपदार्थस्य = प्रतिनिधिस्वरूपे पदार्थान्तरासम्भवे = अन्यपदार्थासम्भवे। सुकुमारतरापूर्वसमर्पणेन सुकुमारतरस्य = अत्यन्तसुकु- मारस्य। पदार्थस्यापूर्वसमर्पणेन विचित्रप्रकारेण समर्पणेन। कामपि = विचित्राम्। काव्यच्छायाम् = काव्यशोभाम्। उन्मीलयन्ति = प्रकटयन्ति।

**यथा-**

> **रुद्राद्रेस्तुलनं स्वकण्ठविपिनोच्छेदो हरेर्वासनं।**
> **कारावेश्मनि पुष्पकापहरणम्॥ २२॥**

**अन्वयः**- रुद्राद्रेः तुलनं स्वकण्ठविपिनोच्छेदः हरेः कारावेश्मनि वासनं पुष्पकापहरणम्।

**व्याख्या** - रुद्राद्रेः = कैलासपर्वतस्य। तुलनम् = उत्तोलनम्। स्वकण्ठविपिनोच्छेदः - स्वकण्ठरूपं यद् विपिनम्, तस्योच्छेदः = विनाशः। हरेः = इन्द्रस्य। कारावेश्मनि = वन्दीगृहे। वासनम् = निवासनम्। पुष्पकापहरणम् = पुष्पकविमानस्यापहरणम्।

यस्येदृशाः केलय इत्यापूर्वार्थस्य समर्पणेन पूर्वोक्ताः सर्वेऽप्य- र्थाः रमणीयाः कृतः

**इत्युपनिबद्ध्य पूर्वोपनिबद्धपदार्थानुरूपवस्त्वन्तरासम्भवादपूर्वमेव "यस्येदृशाः केलयः" इति न्यस्तम्, येनान्येऽपि कामपि कमनीयतामनीयन्त। यथा च--**

**व्याख्या** - इति = एवम्। उपनिबद्ध्य = निर्मीय। पूर्वोपनिबद्धपदार्था-नुरूपवस्त्वन्तरासम्भवात्-पूर्वनिबद्धस्य पदार्थस्य = प्राग्रचितस्य पदार्थस्याननुरूपवस्तुनः = अनुकूलान्यवस्तुनः अन्तरासम्भवात्। अपूर्वमेव = अद्भुतमेव। 'यस्येदृशाः केलयः' इति न्यस्तम् = उपनिबद्धम्। येन यस्य प्रयोगेण। अन्येऽपि = अपरेऽपि। कामपि कमनीयताम् = अपूर्वां शोभाम्। अनीयन्त = प्रापयन्।

**यथा च –**

**तद्वक्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा**
**तद्गोष्ठ्यैव निशापि मन्मन्थकृतोत्साहैस्तदङ्गार्पणैः।**
**तां सम्प्रत्यपि मार्गदत्तनयनां द्रष्टुं प्रवृत्तस्य मे**
**बद्धोत्कण्ठमिदं मनः किम्॥ २३॥**

**अन्वयः** - तथा प्रदोषः तद्गोष्ठ्या एव, निशा अपि मन्मथकृतोत्साहैः तदङ्गार्पणैः तद्वक्रेन्दुविलोकनेन दिवसः नीतः। सम्प्रति अपि मार्गदत्तनयनां तां दृष्टुं प्रवृत्तस्य मे इदं मनः बद्धोत्कण्ठं किम्।

**व्याख्या** - तथा प्रदोषः = प्रदोषकालः। तद्गोष्ठ्या = तया सह मिलनेनैव निशा = रात्रिः अपि। मन्मथकृतोत्साहैः- मन्मथेन = कन्दर्पेण कृतैः = विहितैः उत्साहैः = उत्कण्ठाभिः। तदङ्गार्पणैः = प्रेयस्यङ्गसमर्पणेन।

तद्वक्त्रेन्दुविलोकनेन तस्याः मुखचन्द्रावलोकनेन । दिवसः = दिवसकालः। नीतः = यापितः। सम्प्रति अपि = इनानीमपि । मार्गदत्तनयनाम् - मार्गे = पथि दत्ते नयने नेत्रे यया ताम् । ताम् = प्रेयसीम् । द्रष्टुम् = अवलोकयितुम् । प्रवृत्तस्य = संलग्नस्य । इदम् = एतत् । मम = मे । मनः = चित्तम् । बद्धोत्कण्ठम् = उत्कण्ठितं किं भवतीति।

**इति सम्प्रत्यपि तामेवंविधां वीक्षितुं प्रवृत्तस्य मम मनः किमिति बद्धोत्कण्ठमिति परिसमाप्तेऽपि तथाविधवस्तुविन्यासो विहितः- "अथवा प्रेमासमाप्तोत्सवम्" इति, येन पूर्वेषां जीवितमिवार्पितम्।**

**व्याख्या** - इति = एवम् । सम्प्रत्यपि = इदानीमपि । ताम् = प्रेयसीम् । एवंविधाम् = ईदृशीम् । वीक्षितुम् = दृष्टुम् । प्रवृत्तस्य = संलग्नस्य । मम = मे । मनः = चेतः । किमितिबद्धोत्कण्ठम् = किमर्थमुत्कण्ठितम् । इति परिसमाप्ते = शान्तिं गते अपि। तथाविधवस्तुविन्यासः = तादृशपदार्थन्यासः। विहितः = कृतः। अथवा प्रेमासमाप्तोत्सवम् - प्रेम्णः = प्रीतेः असमाप्तः = अपूर्णः उत्सवः यत्र तत् । इति येन = येन कारणेन पूर्वेषाम् = पूर्वनिबद्धवाक्यानाम्। जीवितम् = जीवनम् । अर्पितम् = दत्तम् । इव = यथा स्यात्।

कविप्रतिभाप्रौढिः एव प्रधानरूपेण वर्तते

**वृत्ति - यद्यपि द्वयोरप्येतयोस्तत्प्राधान्येनैव वाक्योपनिबन्धः, तथापि कविप्रतिभाप्रौढिरेव प्राधान्येनावतिष्ठते ।**

**व्याख्या** - यद्यपि एतयोः - अनयोः । द्वयोः - उभयोः अपि । तत्प्राधान्येन = साहित्यप्रधानतया एव । वाक्योपनिबन्धः = वाक्यरचना । तथापि कविप्रतिभाप्रौढिः- कवेः = सूरेः प्रतिभायाः = बुद्धेः प्रौढिः = प्रौढतैव । प्राधान्येन-प्रमुखतया । अवतिष्ठते = वर्तते । शब्दस्यापि वाच्यस्यापि । शब्दान्तरेण = अन्यशब्देन साहित्यविरहोदाहरणम् - साहित्यवियोगस्योदाहरणमस्ति।

*शब्दस्यापि शब्दान्तरेण साहित्यविरहोदाहरणम्।*

**यथा -**

**चारुता वपुरभूषयदासां तामनूननवयौवनयोगः।**

**तं पुनर्मकरकेतनलक्ष्मीस्तां मदो दयितसङ्गमभूषः॥ २४॥**

**अन्वयः** - आसां वपुः चारुता ताम् अनूननवयौवनयोगः तं पुनः मकरकेतनलक्ष्मीः तां दयितसङ्गमभूषः मदः अभूषयत्।

**व्याख्या** - आसाम् = एतासां कामिनीनाम्। वपुः = शरीरम्। चारुता = सुन्दरता ताम् = सुन्दरताम्। अनूननवयौवनयोगः- अनूनः सम्पूर्णः, नवयौवनयोगः = नूतनतारुण्ययोगः। तम् = नवयौवनयोगम्। पुनः। मकरकेतनलक्ष्मीः मकरकेतनस्य -मदनस्य लक्ष्मीः = श्रीः। ताम् = मदनश्रियम्। दयितसंगमभूषः- दयितस्य = प्रियतमस्य संगमभूषः = समागमरूपभूषणम्। मदः, अभूषयत् = अलङ्करोत्।

**वृत्ति - दयितसङ्गमस्तामभूषयदिति वक्तव्ये कीदृशो मदः, दयितसङ्गमो भूषा यस्येति। दयितसङ्गमशब्दस्य प्राधान्येनाभिमतस्य समासवृत्तावन्तर्भूतत्वाद् गुणीभावो न तद्विदाह्लादकारी। दीपकालङ्कारस्य च काव्यशोभाकारित्वेनोपनिबद्धस्य निर्वहणावसरे त्रुटितप्रायत्वात् प्रक्रमभङ्गःविहितं सरसहृदयवैरस्यमनिवार्यम्। 'दयितसङ्गतिरेनम्' इति पाठान्तरं सुलभमेव।**

**दयितसंगमशब्दस्य प्रमुखतया वांछितस्य समासवृत्तौ अदृष्टत्वात् गुणत्वम्**

**व्याख्या** - दयितसंगमः = प्रियतमसम्मिलनम्। ताम् = मदनश्रियम्। अभूषयत् = अलङ्कृतवान्। इति वक्तव्ये = कथने। कीदृशो मदः कीदृग्विधः क्षीबः। संगमः = प्रियमिलनम्। भूषा = अलङ्करणं यस्येति। दयितसंगमशब्दस्य = प्रियतममिलनशब्दस्य। प्राधान्येन = प्रमुखतया। अभिमतस्य = वांछितस्य। समासवृत्तौ अन्तर्भूतत्वात् = अदृष्टत्वात्। गुणीभावः = गुणत्वम्। तद्विदाह्लादकारी- तद्विदाम् = काव्यतत्त्व-ज्ञानाम्। आह्लादकारी = आनन्ददायी। न नास्ति। दीपकालङ्कारस्य च = काव्यशोभाकारित्वेन = वाच्यच्छायाकारितया। उपनिबद्धस्य रचितस्य। निर्वहणावसरे = निर्वाहकाले। त्रुटितप्रायत्वात् = प्रायः

भङ्गत्वेन। प्रक्रमभङ्गविहितम् = प्रक्रमभङ्गदोषजनितम्। सरसहृदय-वैरस्यम् = रसिकहृदयनीरसता। आवश्यकम् = अनिवार्यम्। 'दयित-संगतिरेनम्' इति एवम्। पाठान्तरम् पाठभेदः। सुलभमेव सरलमेव।

**वृत्ति - द्वयोरप्येतयोरुदाहरणयोः प्राधान्येन प्रत्येकमेकतरस्य साहित्यविरहो व्याख्यातः। परमार्थतः पुनरुभयोरप्येकतरस्य साहित्यविरहोऽन्यतरस्यापि पर्यवस्यति। तथा चार्थः समर्थवाचका-सद्भावे स्वात्मना स्फुरन्नपि मृतकल्प एवावतिष्ठते। शब्दोऽपि वाक्योपयोगिवाच्यासम्भवे वाच्यान्तरवाचकः सन् वाक्यस्य व्याधिभूतः प्रतिभातीत्यलमतिप्रसङ्गेन।**

**व्याख्या** - द्वयोः = उभयोः, अपि। एतयोः = अनयोः उदाहरणयोः। प्राधान्येन = प्रधानतया। प्रत्येकम् = एकतरस्य साहित्यविरहः = साहित्याभावः। व्याख्यातः = वर्णितः। परमार्थतः = यथार्थतः। पुनः उभयोः द्वयोः अपि एकतरस्य। साहित्यविरहः-साहित्याभावः। अन्यतरस्यापि एकस्यापि। पर्यवस्यति = समाप्तिमेष्यति। तथा च अर्थः, समर्थवाचकासद्भावे = समर्थशब्दस्यभावे। स्वात्मना = स्वतः। स्फुरन् अपि = स्फुरितो भवन्नपि। मृतकल्पः मृतप्रायः एव। अवतिष्ठते वर्तते। शब्दः अपि वाक्योपयोगिवाच्यासम्भवे = वाक्याय उपयोग्यथाभावे। वाच्यान्तरवाचकः सन् = चमत्कारवाचकः, सन् = चमत्कारहीनीर्थः सन्। वाक्यस्य व्याधिभूतः = व्याधिस्वरूपः। प्रतिभाति = प्रतीयते। इति। अलमतिप्रसगेन अतिप्रसंगस्यावश्यकतैव नास्ति।

वक्रः तु शास्त्रादिप्रसिद्धशब्दा-र्थौपनिबन्धव्यतिरेकि

**वृत्ति - प्रकृतं तु। कीदृशे बन्धे-वक्रकविव्यापारशालिनि। वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेको षट्प्रकारवक्रताविशिष्टः कविव्यापारस्तत्क्रियाक्रमस्तेन शालते श्लाघते यस्तस्मिन् एवमपि कष्टकल्पनोपहतेऽपि प्रसिद्धव्यतिरेकित्वमस्तीत्याहतद्विदाह्लादकारिणि। तदिति काव्यपरामर्शः तद्विदन्तीति तद्विदस्तज्ज्ञास्तेषामाह्लादमानन्दं करोति यस्तस्मिन् तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रतां वक्रताप्रकारांस्तद्विदाह्लादकारित्वं च प्रत्येकं यथावसरमेवोदाहरिष्यन्ते।**

**व्याख्या** - प्रकृतं तु = वास्तविकं तु। कीदृशे बन्धे = कीदृशे प्रबन्धे ? वक्रकविव्यापारशालिनि-प्रसिद्धकविव्यापारविषयके । वक्रः- प्रसिद्धः यः असौ शास्त्रादि प्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी = शास्त्रादौ विख्यातशब्दार्थयोः उपनिबन्धेन व्यतिरेकी।षड्प्रकारवक्रताविशिष्टः षड्विधप्रसिद्धतयाविशिष्टः। कविव्यापारः = कविकर्म। तत्क्रियाक्रमः तस्य काव्यस्य क्रियायाः रचनायाः क्रमः । तेन शालते = श्लाघ्यते यस्तस्मिन्। एवमपि = इत्थमपि। कष्टकल्पनोपहते = कठिनकल्पनोपनिबद्धे अपि। प्रसिद्धव्यतिरेकित्वम् शास्त्रादौ प्रसिद्धव्यतिरिक्तता अस्तीत्याह - तद्विदाह्लादकारिणि बन्धे व्यवस्थितौ। वक्रतां वक्रताप्रकारः, तद्विदाह्लादकारित्वम् च प्रत्येकं यथावसरमेव = उचितावसरमेव। उदाहरिष्यन्ते।

***एवं काव्यस्य सामान्यलक्षणे विहिते विशेषलक्षणमुपक्रमते । तत्र शब्दार्थयोस्तावत्स्वरूपं निरूपयति -***

**वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि।**
**तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः॥ ८॥**

**अन्वयः** - यद्यपि वाच्यः अर्थः वाचकः शब्द इति प्रसिद्धम्। तथापि अस्मिन् काव्यमार्गे अयम् एतयोः परमार्थः।

शब्दार्थस्य स्वरूपं

**व्याख्या** - यद्यपि वाच्यः शब्दः अर्थवाचकः, तथा वाचकः शब्दस्य इति प्रसिद्धम् = प्रख्यातम् तथापि। अस्मिन् = एतस्मिन् काव्यमार्गे = कवितावर्त्मनि। अयम् = एषः। एतयोः = शब्दार्थयोः । परमार्थः = अपूर्वार्थः अस्तीति।

ननु च द्योतकव्यञ्जकावपि शब्दौ भवतः

**इति एवंविधं वस्तुं प्रसिद्धं प्रतीतम् - यो वाचकः स शब्दः, यो वाच्यश्चाभिधेयः सोऽर्थ इति। ननु च द्योतकव्यञ्जकावपि शब्दौ सम्भवतः, तदसंग्रहान्नाव्याप्तिः, यस्मादर्थप्रतीतिकारित्वसामान्यादुपचारात्तावपि वाचकावेव। एवं द्योत्यव्यङ्ग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचाराद्वाच्यत्वमेव। तस्माद् वाचकत्वं वाच्यत्वं च शब्दार्थयोर्लोके सुप्रसिद्धं यद्यपि लक्षणम्, तथाप्यस्मिन् अलौकिके काव्यमार्गे**

**कविकर्मवर्त्मनि अयमेतयोर्वक्ष्यमाणलक्षणः परमार्थः किमप्यपूर्वतत्त्वमित्यर्थः।**

**व्याख्या** - एवं विधम् = एतत्प्रकारम्। वस्तु। प्रसिद्धम् = विख्यातम्। प्रतीतम् = ज्ञातम् यः वाचकः सः शब्दः। यश्च वाच्याभिधेयः = वाच्यनामकः। सः अर्थः भवतीति। ननु च द्योतकव्यञ्जकौ अपि द्योतकः व्यञ्जकश्चादिशब्दौ सम्भवतः। तदसंग्रहात् = द्योतकव्यञ्जकाग्रहणात्। न अव्याप्तिः = अव्याप्तिदोषः नास्ति। यस्मात् = यतः। अर्थप्रतीतिकारित्वसामान्यात् = अर्थप्रतीतिकारितासाधारण्यात् उपचारात् द्योतकव्यञ्जको अपि। वाचको एव। एवम् = इत्थम्। द्योत्यव्यङ्ग्ययोः = अर्थयोः। प्रत्येयत्वसामान्यात् = ज्ञेयतासाधारण्यात्। उपचारात् वाच्यत्वम् एव भवेत्। तस्मात् = तर्हि। वाचकत्वं वाच्यत्वं च शब्दार्थयोः शब्दे अर्थे च लोके जगति। प्रसिद्धम् = विख्यातम्। यद्यपि लक्षणम् = स्वरूपम्। तथापि अस्मिन् = एतस्मिन्। अलौकिके = अद्भुते। काव्यमार्गे = कवितावर्त्मनि अयम् एतयोः वक्ष्यमाणलक्षणः परमार्थः किमपि अपूर्वम् = अलौकिकम् तत्वम् इत्यर्थः।

***कीदृशमित्याह -***

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः॥ ९॥**

**अन्वयः**- विवक्षितार्थैकवाचकः शब्दः अन्येषु सत्सु अपि सहृदयहृदयाह्लादकारिस्वस्पन्दसुन्दरः अर्थः।

शब्दस्य स्वरूपम्

**व्याख्या** - विवक्षितार्थैकवाचकः = वक्तुं वर्णयितुमिच्छतः अर्थस्य एकवाचकः शब्दः। अन्येषु = बहुलेषु पर्यायेषु। सत्सु -भवत्सु अपि। सहृदयहृदयाह्लादकारि = स्वस्पन्दसुन्दरः- सहृदयस्य = रसिकस्य हृदये= चेतसि आह्लादकारि आनन्ददायकः यः स्वस्पन्दसुन्दरः- आत्मनः स्पन्देन = स्वभावेन सुन्दरः कमनीयः अर्थः भवतीति।

**वृत्ति - स शब्दः काव्ये यस्तत्समुचितसमस्तसामग्रीकः । कीदृक् - विवक्षितार्थैकवाचकः। विवक्षितो योऽसौ वक्तुमिष्टोऽर्थस्तदेकवाचक-स्तस्यैकः केवल एव वाचकः । कथम् - अन्येषु सत्स्वपि । अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु। तथा च-**

**व्याख्या** - सः = असौ । शब्दः = वाचकः। काव्ये = कविकर्मणि। यः तत्समुचितसमस्तसामग्रीकः - तस्य काव्यस्य समुचितैः = उपयुक्तैः। समस्तैः = सम्पूर्णैः। सामग्रीभिः युक्तः भवति। विवक्षितः = वणितस्यार्थस्य एकवाचकः कीदृक् भवति ? विवक्षितः यः असौ सः वक्तुम् = कथयितुम्। इष्टः = अभीष्टः। अर्थः तदेकवाचकः = तस्य शब्दस्य एक एव केवलः वाचकः। कथम् = केन प्रकारेण ? अन्येषु = अपरेषु पर्यायेषु सत्सु अपि। अपरेषु तद्वाचकेषु। बहुषु अपि = बहुलेषु अपि। विद्यमानेषु = वर्तमानेषु। तथा च-

**सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग्वाचकतां न प्रतिपद्यते।**

समीचीनं शब्दत्वम् नैव प्राप्यते

**व्याख्या**- सामान्यात्मना = सामान्येन साधारणरूपेण । आत्मना = स्वेन। वक्तुम् = कथयितुम्। अभिप्रेतः = अभीष्टः। यः अर्थः = वाच्यः। तस्य विशेषाभिधायी -विशिष्टरूपेण अभिधायी = अभिधानकर्ता। शब्दः = वाचकः। सम्यक् = समीचीनम् वाचकताम् = शब्दत्वम्। न प्रतिपद्यते = नैव प्राप्यते।

**यथा -**

**कल्लोलवेल्लित दृषत्पुरुषप्रहारैरत्नान्यमूनि मकराकर माऽवमंस्थाः।**
**किं कौस्तुभेन भवतो विहितो न नाम याञ्चाप्रसारितकरः पुरुषोत्तमोऽपि॥**

**अन्वयः** - मकराकर ! कल्लोलवेल्लितदृषत्परुषप्रहारैः अमूनि रत्नानि मा अवमंस्थाः। किम् कौस्तुभेन पुरुषोत्तमः अपि याञ्चाप्रसारितकरः भवतः नाम न विहितः।

मकराकर ! - मकराणामाकरस्तत्सम्बुद्धौ = हे सागर ! कल्लोलवेल्लितदृषत्पुरुषप्रहारैः- कल्लोलैः = तरङ्गैः वेल्लिता = चपलिताः ये दृषदाम् = नवपाषाणानां पुरुषप्रहारा = कठोराघातास्तैः। अमूनि = एतानि। रत्नानि = मणीन् मा अवमंस्थाः = अपमानं मा कुरु। किम् कौस्तुभेन = कौस्तुभमणिन। पुरुषोत्तमः = भगवान् विष्णुः अपि। याञ्चाप्रसारितकरः - याञ्चायै = भिक्षायै। प्रसारितौ – संतानितौ करी = हस्तौ येन सः। भवतः = श्रीमतः। नाम = अभिधानम्। न विहित = नैव कृतः।

रत्नविशेषस्योत्कर्षकथनम् आरम्भोपसंहारस्य विषमताम् अत्यधिकशोभाम् नैव धारयति

**वृत्ति- अत्र रत्नसामान्योत्कर्षाभिधानमुपक्रान्तम्। कौस्तुभेनेति रत्नविशेषाभिधायी शब्दस्तद्विशेषोत्कर्षाभिधानमुपसंहरतीति प्रक्रमोपसंहारवैषम्यं न शोभातिशयमावहति। न चैतद्वक्तुं शक्यते यः कश्चिद्विशेषे गुणग्रामगरिमा विद्यते स सर्वसामान्येऽपि सम्भवत्येवेति। यस्मात् -**

**व्याख्या** - अत्र = अस्मिन् श्लोके । रत्नसामान्योत्कर्षाभिधानम्-रत्नसामान्यस्य = साधारणरत्नस्योत्कर्षस्योत्थानस्याभिधानम्-कथनम् तत्। उपक्रान्तम् = प्रारब्धम्। कौस्तुभेन- कौस्तुममणिना इति रत्नविशेषाभिधायो विशेषरत्नवाचकः। शब्दः तद्विशेषोत्कर्षाभिधानम् = रत्नविशेषस्योत्कर्षकथनम्। उपसंहरति = उपसंहारं करोति इति प्रक्रमोपसंहारवैषम्यम् = आरम्भोपसंहारस्य विषमताम्। शोभातिशयम् = अत्यधिकशोभाम्। न आवहति = नैव धारयति। च = तथा। एतत् इदम्। वक्तुम् = कथयितुम्। न शक्यते - यः कश्चित्- यः कोऽपि। विशेषे वैशिष्ट्ये। गुणग्रामगरिमा = गुणसमूहगौरवम्। विद्यते = वर्तते। सः = असौ। सर्वसामान्ये = सर्वसाधारणे अपि। सम्भवत्येव = भवत्येव इति। यस्मात् = यतः -

**वाजिवारणलोहानां काष्ठपाषाणवाससाम्।**
**नारीपुरुषतोयानामन्तरं महदन्तरम्॥ २६॥**

**अन्वयः** - वाजिवारणलोहानां काष्ठपाषाणवाससां नारीपुरुषतोयानाम् अन्तरं महदन्तरं ( भवति )।

**व्याख्या** - वाजिवारणलोहानां-वाजिनः = अश्वस्य, वारणस्य गजस्य, लोहस्य = अयसश्च, तेषाम्। काष्ठपाषाणवाससाम्-काष्ठस्य पाषाणस्य वाससश्च तेषाम् = इन्धनप्रस्तरवस्त्राणाम्। नारीपुरुषतोयानाम् - नार्यः पुरुषस्य तोयस्य च तेषाम् = स्त्रीपुरुषजलानाम्। अन्तरम् = भेदः, स्वजातिभिन्नता। महदन्तरम् = अतिभिन्नता भवतीति।

**तस्मादेवंविधे विषये सामान्याभिधाय्येव शब्दः सहृदयहृदयहारितां प्रतिपद्यते। तथा चास्मिन् प्रकृते पाठान्तरं सुलभमेव - "एकेन किं न विहिता भवतः स नाम" इति।**

**व्याख्या** - तस्मात् = तत्कारणात्। एवंविधविषये = एतत्प्रकारके विषये। सामान्याभिधायी = साधारणाभिधानकः एव शब्दः = वाचकः। सहृदयहृदयहारिताम् = रसिकजनाह्लादकारिताम्। प्रतिपद्यते = प्राप्यते। तथा च-अस्मिन् प्रकृते = एतस्मिन् श्लोके। पाठान्तरम् = पाठभेदः। सुलभमेव = सरलमेव। 'एकेन कि न विहितः = कृतः। भवतः स नाम' इति।

विवक्षितस्य तस्यैवर्थस्य वाचकः-बोधकः शब्द इति शब्दस्वरूपं पर्यवस्यति

**यत्र विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवा-भिधानं निबध्नन्ति कवयः। यथा-**

**व्याख्या** - यत्र = यस्मिन् श्लोके। विशेषात्मना = विशेषरूपेण। वस्तुप्रतिपादयितुम् = सिद्धयितुम्। अभिमतम् = अभीष्टम्। तत्र विशेषाभिधायकम् - विशिष्टाभिधानकारकम् एव। अभिधानम् = कथनम्। कवयः = सूरयः। निबध्नन्ति = रचयन्ति।

**यथा**

> **द्वयं गतं सम्प्रति शोचनीयतां**
> **समागमप्रार्थनया कपालिनः।**
> **कला च सा कान्तिमती कलावत-**

**स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ २७ ॥**

**अन्वयः -** सा कलावतः कान्तिमती कला अस्य लोकस्य नेत्रकौमुदी च त्व सम्प्रति कपालिनः समागमप्रार्थनया शोचनीयतां द्वयं गतम्।

अत्र विशेषयुक्ता द्वयमिति पदं प्रयुज्यते

**व्याख्या** - सा = असौ। कलावतः - कलायुक्तस्य चन्द्रस्य। कान्तिमती-कान्तियुक्ता कला। अस्य = एतस्य। लोकस्य = संसारस्य। नेत्रकौमुदी = नयनज्योत्स्ना च त्वम्। सम्प्रति = अधुना। कपालिनः - कपालमस्येति कपालो तस्य = शिवस्य। समागमप्रार्थनया - समागमस्य = सम्प्राप्तेः प्रार्थनया = याञ्चया। शोचनीयताम् = शोकम्। द्वयम् = उभयम्। गतम् = प्राप्तम्।

**अत्र परमेश्वरवाचकशब्दसहस्रसंभवेऽपि कपालिन इति बीभत्सरसालम्बनविभाववाचकः शब्दो जुगुप्सास्पदत्वेन प्रयुज्यमानः कामपि वाचकवक्रतां विदधाति। 'सम्प्रति' 'द्वयं' चेत्यतीव रमणीयम् - यत् किल पूर्वमेका सैव दुर्व्यसनदूषितत्वेन शोचनीया संजाता, सम्प्रति पुनस्त्वया तस्यास्तथाविधदुरध्यवसायसाहायकमिवारब्धमित्युपहस्यते। 'प्रार्थना' शब्दोऽप्यतितरां रमणीयः, यस्मात् काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः। प्रार्थना पुनरत्रात्यन्तं कौलीनकलङ्ककारिणी।**

अत्र कपालि इति पदेन वाचकवक्रता प्रतीयते

**व्याख्या** - अत्र अस्मिन् श्लोके। परमेश्वरवाचकशब्दसहस्रसम्भवे = ईश्वरपर्यायिसहस्रशब्दसञ्जाते अपि। 'कपालिनः' इति रसालम्बनविभाववाचकः = बीभत्सरसरूपस्यालम्बनविभाववाचकः, आलम्बनविभावपर्यायवाची शब्दः। जुगुप्सास्पदत्वेन = घृणात्मकत्वेन। प्रयुज्यमानः = प्रयोगगतः। कामपि = विचित्राम्। वाचकवक्रताम् = वाचकसुन्दरताम्। विदधाति = करोति। तथा च। सम्प्रति = इदानीम्। 'द्वयम्' इति अतीव रमणीयम् = अतिमनोरमम्। यत् = यतः। किल = खलु। पूर्वम् = प्राक्। एका सैव = असावेव। दुर्व्यसनदूषितत्वेन = दुर्व्यसनस्य दूषणेन। शोचनीया = शोच्या सञ्जाता = सम्भूता। सम्प्रति = इदानीम् पुनः। त्वया = भवत्या। तस्याः = एतस्याः। तथाविधदु-

रध्यवसायसहायकम् = पूर्वोक्तदुःखदोत्साहसहायकम् इव। आरब्धम् = प्रारब्धम्। इति। उपहस्यते = उपहासः क्रियते। 'प्रार्थना' शब्दः अपि। अतितराम् = अत्यन्तम्। रमणीयः = मनोरमः। यस्मात् काकतालीयत्व-योगेन = आकस्मिकसंयोगेन। तत्समागमः = तत्सम्प्राप्तिः। कदाचित् वाच्यताम् = अर्थताम्। नैव आवहः = नेवावहणार्हः। प्रार्थना पुनः अत्र अस्मिन् स्थाने।

कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्

**वृत्ति - 'सा च' 'त्वं च' इति द्वयोरप्यनुभूयमानपरस्पर्धिंलावण्यातिशय - प्रतिपादनपरत्वेनोपात्तम्। 'कलावतः' 'कान्तिमती' इति च मत्वर्थीयप्रत्ययेन द्वयोरपि प्रशंसा प्रतीयत इत्येतेषां प्रत्येकं कश्चिदप्यर्थः शब्दान्तराभिधेयतां नोत्सहते। कविविवक्षितविशेषाभिधानक्षमत्वमेव वाचकत्वलक्षणम्। यस्मात्प्रतिभायां तत्कालोल्लिखितेन केनचित्परि-स्पन्देन परिस्फुरन्तः पदार्थाः प्रकृतप्रस्तावसमुचितेन केनचिदुत्कर्षणेन वा समाच्छादितस्वभावाः सन्तो विवक्षाविधेयत्वेनाभिधेयतापदवी-मवतरन्तस्तथाविधविशेष-प्रतिपादन-समर्थेनाभिधाने-नाभिधीयमाना-चेतनचमत्कारितामापद्यन्ते।**

**व्याख्या** - 'सा च' 'त्वं च' इति द्वयोः उभयोः अपि। अनुभूयमानपरस्पर स्पर्धिलावण्यातिशयप्रतिपादनपरत्वेन- अनुभूयमानस्य परस्परस्पर्धिनः अन्योन्यस्पर्धायुक्तस्य लावण्यस्य सौन्दर्यस्यातिशयप्रतिपादनपरत्वेन अत्यन्तसमर्थनहेतुना। उपात्तम् - गृहीतम् 'कलावतः 'कान्तिमतो' इति च मत्वर्थीयप्रत्ययेन अत्र च मतुपार्थकप्रत्ययेन। द्वयोः = उभयोः अपि। प्रशंसा = स्तुतिः। प्रस्तूयते प्रतीयते। इति एतेषाम्-अमीषाम्। प्रत्येकं कश्चित् = कोऽपि। अर्थः वाचकः। शब्दान्तराभिधेयताम् = अन्यशब्दा-भिधेयत्वम्। नोत्सहते = स्थानं नैव वहति। कविविवक्षितविशेषाभि-धानक्षमत्वम् = कविकथयितुमभिप्रेतस्य विशेषस्यार्थस्य कथनसामर्थ्यम् एव। वाचकत्वलक्षणम् = वाचकतारूपम् अस्ति। यस्मात् = यतः। प्रतिभायाम् तत्कालोल्लिखितेन = तत्क्षणरचितेन। केनचित् = केनापि। परिस्पन्देन = सौन्दर्येण। परिस्फुरन्तः = परिस्फुटिताः पदार्थाः। प्रकृतप्रस्तावसमुचितेन = प्रकृतप्रकरणयोग्येन।

केनचित् = केनापि। उत्कर्षणेन - उत्थानविशेषेण। समाच्छादित-स्वभावाः = आच्छन्नप्रकृतयः। सन्तः = भवन्तः। विवक्षाभिधेयत्वेन = वक्तुमिच्छाविषेयतया। अभिधेयतापदवीम् = अभिधेयत्वस्थानम्। तथाविधविशेषप्रतिपादनसमर्थेन = तत्प्रकार कविशेषायंप्रतिपादन-क्षमेण अभिधीयमानाः = कथ्यमानाः शब्दाः। चेतनचमत्कारिताम् = सहृदय-हृदयचमत्कारित्वम् आपद्यन्ते = प्राप्नुवन्ति।

**संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः**
**सर्वस्यैव स जातिमात्रविहितो हेवाकलेशः किल।**
**इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्**
**योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी॥ २८॥**

**अन्वयः**- करिकीटमेघशकलोद्देशेन सिंहस्य यः संरम्भः, सः सर्वस्य एव जातिमात्रविहितः। हेवाकलेशः किल यः असौ अम्बिकाकेसरी आशाद्विरदक्षयाम्बुदघटाबन्धे अपि असंरब्धवान् (सः) कुत्र चमत्कृतेः अतिशयं यातु।

**व्याख्या** - करिकीटमेघशकलोद्देशेन - करिकीटरूपं यन्मेघशकलं तदुद्देशेन = गजकीटघनरखण्डोद्देशेन। सिंहस्य = मृगराजस्य यः संरम्भः = तिरस्कारः। सः = असौ सर्वस्य = सम्पूर्णस्य एव। जातिमात्रविहितः। मृगराज जातिमात्रकृतः। हेवाकलेशः = स्वभावमात्रम्। किल = खलु। यः असौ = सः। अम्बिकाकेसरी -अम्बिकायाः = दुर्गायाः केसरी = सिंहः। आशाद्विरदक्षयाम्बुदघटाबन्धे - आशाद्विरदरूपिणां - दिग्गज-रूपिणाम् क्षयाम्बुदानाम् = प्रलयमेघानाम् घटाबन्धे = घटारचनाकाले अपि। असंरब्धवान् = अभिनिवेशहीनः (सः) कुत्र = क्व। चमत्कृतेः चमत्कारस्य। अतिशयम् = अत्यधिकम्। यातु = गच्छतु।

अत्र कीट,शकल, सर्वस्य,मात्र,लेश-घटबन्धशब्दाः विविक्षितार्थवाचिनः

**वृत्ति - अत्र करिणां 'कीट'-व्यपदेशेन तिरस्कारः, तोयदानां च 'शकल' शब्दाभिधानेनानादरः, 'सर्वस्य' इति यस्य कस्यचित्तुच्छतर-प्रायस्येत्यवहेला, जातेश्च 'मात्र'-शब्दविशिष्टत्वेनावलेपः, हेवाकस्य 'लेश' शब्दाभिधानेनाल्पताप्रतिपत्तिरित्येते विवक्षितार्थैकवाचकत्वं**

**द्योतयन्ति। 'घटाबन्ध' शब्दस्य प्रस्तुतमहत्त्वप्रतिपादनपरत्वेनोपात्तस्तन्निबन्धनतां प्रतिपद्यते। विशेषाभिधानाकाङ्क्षिणः पुनः पदार्थस्वरूपस्य तत्प्रतिपादनपरविशेषणशून्यतया शोभाहानिरुत्पद्यते।**

**व्याख्या** - अत्र अस्मिन् श्लोके। करिणां = गजानाम्। कीटव्यपदेशेन = कीटव्याजेन । तिरस्कारः = तिरस्कृतिः । तोयदानाम् = घनानाम् च 'शकल' शब्दाभिधानेन शकल-शब्दकथनेन। अनादरः = तिरस्कारः। 'सर्वस्य' इति यस्य कस्यचित् तुच्छतरप्रायस्य = प्रायोऽत्यधिकतुच्छस्य। इति अवहेला = अनादरः। जातेश्च 'मात्र' शब्दविशिष्टत्वेन = मात्रशब्दविशेषतया। अवलेपः = गर्वः। हेवाकस्य = स्वभावस्य। 'लेश' शब्दाभिधानेन = लेशशब्दसंज्ञया। अल्पताप्रतिपत्तिः- अल्पतायाः तुच्छतायाः प्रतिपत्तिः प्रतीतिः इति। एते = इमे। विवक्षितार्थैकवाचकत्वम् = वक्तुमिष्टस्यार्थस्य केवलं वाचकत्वम्। द्योतयन्ति = प्रकटयन्ति। 'घटाबन्ध' शब्दस्य प्रस्तुतमहत्त्वप्रतिपादनपरत्वेन = प्रस्तुतस्याम्बिकाकेसरिणः महत्त्वस्य प्रतिपादनपरत्वेन = समर्थनपरत्वेन उपात्तः गृहीतः। विशिष्टाभिधानाभिलाषिणः। पुनः पदार्थस्वरूपस्य। तत् प्रतिपादनपरविशेषणशून्यतया बन्धनताम् = महत्त्वप्राप्तिकारणताम्। प्रतिपद्यते क्रियते। विशेषाभिधानाकांक्षिणः। विशेषाभिधानसमर्थनयुक्तविशेषणशून्यतया। शोभाहानिः = सौन्दर्यहानिः । उत्पद्यते = जायते।

विशेषाभिधानसमर्थनयुक्तविशेषणशून्यतया सौन्दर्यहानिः जायते

यथा -

**तत्रानुल्लिखिताख्यमेव निखिलं निर्माणमेतद्विधे-**
**रुत्कर्षप्रतियोगिकल्पनमपि न्यक्कारकोटिः परा।**
**याताः प्राणिभृतां मनोरथगतीरुल्लङ्घ्य यत्संपद-**
**स्तस्याभासमणीकृताश्मसु मणेरश्मत्वमेवोचितम्॥ २९॥**

**अन्वयः** - तत्र विधेः एतत् निखिलं निर्माणम् अनुल्लिखिताख्यम् एव उत्कर्षप्रतियोगिकल्पनम् अपि परा न्यक्कारकोटिः, यत्सम्पदः प्राणिभृतां

मनोरथगतीः उल्लङ्घ्य याताः तस्य आभासमणीकृताश्मसु मणेः अश्मत्वम् एव उचितम्।

**व्याख्या** - तत्र = चिन्तामणौ। विधेः = ब्रह्मणः। एतत् = इदम्। निखिलम् = अखिलम्। निर्माणम् = संरचनम्। अनुल्लिखितम् एव = नामोल्लेखनमेव। उत्कर्षप्रतियोगिकल्पनम् - उत्कर्षस्य = उत्कर्षण-शीलपदार्थस्य प्रतियोगिनः प्रतिधिनः कल्पनम् = कल्पनाकरणम् अपि। परा = महती। न्यक्कारकोटिः = अपमानपराकाष्ठा अस्ति। यत्सम्पदः यस्य संपत्तिः, प्राणिभृताम् - जीवधारिणाम्। मनोरथगतीः = कामनागतीः। उल्लंघ्य = पारं कृत्वा। याताः प्रयाताः। तस्य चिन्तामणेः। आभासमणीकृताश्मसु-आभासेन कृतेषु = विहितेषु अश्मसु = प्रस्तरखण्डेषु मणेः = मणिरत्नस्य प्रस्तरस्य। अश्मत्वम् = पाषाणत्वम् एव उचितम् = उपयुक्तम्।

**वृत्ति - अत्र 'आभास'शब्दः स्वयमेव मात्रादिविशिष्टत्वमभिलषंल्लक्ष्यते। पाठान्तरम् - 'छायामात्रमणीकृताश्मसु मणेस्तस्याश्मतैवोचिता' इति। एतच्च वाचकवक्रताप्रकारस्वरूपनिरूपणावसरे प्रतिपदं प्रकटीभविष्यतीत्यलमतिप्रसङ्गेन।**

आभासशब्दोऽवधारणबो-धकस्य मात्रादिशब्दस्य सम्बन्दाभावेन विविश्रितस्य अर्थबोधको वर्तते

**व्याख्या** - अत्र - अस्मिन् श्लोके। 'आभास' शब्दः स्वयमेव आत्मनैव। मात्रादिविशिष्टत्वम् = मात्रादिवैशिष्ट्यम्। अभिलषन् = वाञ्छन्। लक्ष्यते = दृश्यते। पाठान्तरम् - "छायामात्रमणीकृताश्मसु मणीस्तस्या-श्मतैवोचिता" इति छायामात्रेण कृताश्मसु = कृतपाषाणखण्डेषु मणेः = मणिप्रस्तरस्य। तस्य अश्मत्वम् = पाषाणत्वम् एव। उचिता = उपयुक्ता। इति एतच्च = इदञ्च। वाचकवक्रताप्रकारस्वरूपनिरूपणा-वसरे- वाचक-वक्रतायाः = शब्दवक्रतायाः प्रकारस्य = भेदस्य स्वरूपस्य = लक्षणस्य निरूपणावसरे = अवलोकनकाले। प्रतिपदम् = पदे पदे। प्रकटीभविष्यति। इति अतः अतिप्रसङ्गेन = महद्विवेचनेन। अलम्।

**वृत्ति - अर्थश्च वाच्यलक्षणः कीदृशः - काव्ये यः सहृदयाह्लादकारि स्वस्पन्दसुन्दरः। सहृदयाः काव्यार्थविदस्तेषामाह्लादमानन्दं करोति यस्तेन स्वस्पन्देनात्मीयेन स्वभावेन सुन्दरः सुकुमारः। तदेतदुक्तं भवति - यद्यपि पदार्थस्य नानाविधधर्मखचितत्वं संभवति तथापि तथाविधेन धर्मेण सम्बन्धः समाख्यायते यः सहृदय-हृदयाह्लादमाधातुं क्षमते। तस्य च तदाह्लादसामर्थ्यं संभाव्यते येन काचिदेव स्वभावमहत्ता रसपरिपोषाङ्गत्त्वं वा व्यक्तिमासादयति।**

अर्थस्य स्वरूपणम्

**व्याख्या** - वाच्यलक्षणः = वाच्यस्वरूपः। अर्थः कीदृशः कीदृग्विधः? काव्ये = काव्यबन्धे। यः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः- सहृदयानाम् = सज्जनानाम् हृदयाह्लादकारि = चित्तानन्ददायकम् स्वस्पन्देन = निजस्वभावेन सुन्दरः = शोभनश्च। सहृदयाः = सहृदयजनाः। काव्यार्थविदः = काव्यमर्मज्ञाः। तेषां = तथाविधानाम्। आह्लादम् = आनन्दम् करोति योऽयं तेन तद् हेतुना। स्वस्पन्देन = निजस्वभावेन। सुन्दरः = शोभनः सुकुमारः तत् = तस्मात्। एतत् = इदम् उक्तम् भवति यद्यपि पदार्थस्य = वस्तुनः। नानाविधधर्मखचितम् = विविधधर्मयुक्तत्वं सम्भवति तथापि तद्विधेन = तत्प्रकारेण धर्मेण सम्बन्धः समाख्यायते = सम्यग्वर्ण्यते। यः सहृदयाह्लादम् = सज्जनानन्दम् आधातुम् = धारयितुम् उत्पादयितुं वा। क्षमते = समर्थो भवति। तस्य = तत्पदार्थस्य च तदाह्लादसामर्थ्यम् = सहृदयानन्दसमर्थता सम्भाव्यते। येन = येन कारणेन। काचिदेव = काप्येव। स्वभावमहत्ता = प्रकृतिमहत्ता। रसपरिपोषाङ्गम् = रसपरिपुष्टता। व्यक्तिम् = अभिव्यक्तिम्। आसादयति = प्रापयति।

**यथा-**

> **दंष्ट्रापिष्टेषु सद्यः शिखरिषु न कृतः स्कन्धकण्डूविनोदः**
> **सिन्धुष्वङ्गावगाहः खुरकुहरगलत्तुच्छतोयेषु नाप्तः।**
> **लब्धाः पातालपङ्के न लुठनरतयः पोत्रमात्रोपयुक्ते**
> **येनोद्धारे धरित्र्याः स जयति विभुताविघ्नितेच्छो वराहः॥ ३०॥**

**अन्वयः -** येन धरित्र्याः उद्धारे दंष्ट्रापिष्टेषु शिखरिषु स्कन्धकण्डूविनोदः न कृतः खुरकुहरगलत्तुच्छतोयेषु सिन्धुषु अङ्गावनाहः न आप्तः, पोत्रमात्रोपयुक्ते पातालपङ्के लुठनरतयः न लब्धाः, सः विभुताविघ्नितेच्छः वराहः जयति।

**व्याख्या** - येन वराहावतारिणा भगवता विष्णुना। धरित्र्याः = पृथिव्याः। उद्धारे = उद्धरणकाले। दंष्ट्रापिष्टेषु = दंष्ट्राभिः पिष्टेषु चूर्णीभूतेषु। शिखरेषु = पर्वतेषु स्कन्धकण्डूविनोदः स्कन्धाभ्याम् अंसाभ्याम् कण्डूविनोदः घर्षणानन्दः। न कृतः = नैव विहितः। खुरकुहर-गलत्तुच्छतोयेषु = खुराणां कुहरेः गलितं तुच्छं तोयं येषां ते तेषु = शफकुहरविगलितस्वल्पजलेषु। सिन्धुषु = सागरेषु। अङ्गावगाहः स्नानम्। न आप्तः = नैव कृतः। पोत्रमात्रोपयुक्ते - केवलं पोतनार्थम्। उपयुक्ते = अनुकूले। पातालपङ्के = पातालकदमे । लुठनरतयः = लुठनानन्दाः। न लब्धाः = नैव प्राप्ताः। सः = तथाविधः। विभुताविघ्नितेच्छः - विभुतया अविघ्निता = अबाधिता, इच्छा = अभिलाषा यस्य सः वराहः = वराहरूपधारी भगवान् विष्णुः। जयति = सर्वोत्कृष्टो भवति।

तत्पदार्थस्य च सहृदयानन्दसमर्थता सम्भाव्यते येन कारणेन काप्येव प्रकृतिमहत्ता रसपरिपुष्टता अभिव्यक्तिम् प्रापयति

**अत्र च तथाविधः पदार्थपरिस्पन्दमहिमा निबद्धोदयः स्वभावसम्भावसंभविनस्तत्परिस्पन्दान्तरस्य संरोधसम्पादनेन स्वभाव-महत्तां समुल्लासयन् सहृदयाह्लादकारितां प्रपन्नः। यथा च -**

**व्याख्या** - अत्र = अस्मिन् श्लोके च। तथाविधः = तादृशः। पदार्थपरिस्पन्दमहिमा - पदार्थस्य = वराहरूपिणो भगवतः विष्णोः परिस्पन्दमहिमा = व्यापारमहत्त्वम्। निबद्धोदयः - निबद्धस्य = वर्णनस्योदयः = प्रस्तुतिरस्ति। स्वभावसम्भावसम्भाविनः = प्रकृत्योत्पन्नस्य तत्परिस्पन्दान्तरस्य = पदार्थव्यापारान्तरस्य। संरोधसम्पादनेन = विरोधकरणेन। स्वभावमहत्ताम् = प्रकृति-महत्त्वम्। समुल्लासयन् = आह्लादयन्। सहृदयाह्लादकारिताम् = सज्जनानन्दकारिताम्। प्रपन्नः = सम्पन्नः।

**तामभ्यगच्छद्रुदितानुसारी मुनिः कुशेष्महरणाय यातः।**
**निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः॥ ३१॥**

**अन्वयः** - कुशेष्माहरणाय यातः मुनिः रुदितानुसारी ताम् अभ्यगच्छत्। यस्य निषादविद्धाण्डजदर्शनोत्थः शोकः श्लोकत्वम् आपद्यत।

परमकारुणिकत्वेन धर्मेण विशिष्टो वाल्मीकिः काव्यसम्मतोऽर्थो भवति

**व्याख्या** - कुशेष्माहरणाय = कुशेन्धनानयनार्थम्। यातः = गतः। मुनिः = वाल्मीकिः। रुदितानुसारी = रुदनानुयातः। तां = सीताम्। अभ्यगच्छत् = अभ्याजगाम। यस्य = यन्मुनेः। निषादविद्धाण्डज-दर्शनोत्थः - निषादेन = आखेटकेन विद्धस्याण्डजस्य = क्रौञ्चपक्षिणः दर्शनेन = अवलोकनेनोत्थः = संजातः। शोकः = दुःखम्। श्लोकत्वम् = श्लोकरूपताम्। आपद्यत = समभवत्।

**अत्र कोऽसौ मुनिर्वाल्मीकिरिति पर्यायपदमात्रे वक्तव्ये परमकारुणिकस्य निषादनिर्भिन्नशकुनिसंदर्शनमात्रसमुत्थितः शोकः श्लोकत्वमभजत यस्येति तस्य तदवस्थाजनकराजपुत्रीदर्शन विवशवृत्तेरन्तःकरणपरिस्पन्दः करुणरसपरिपोषाङ्गतया सहृदयहृदया-ह्लादकारी कवेरभिप्रेतः। यथा च -**

**व्याख्या** - अत्र = अस्मिन् श्लोके। असौ = सः। मुनिः = ऋषिः। वाल्मीकिः = वाल्मीकिनामा कः आसीदिति। पर्यायपदमात्रे = केवलं पर्यायवाचिपदे। वक्तव्ये = कथने। परमकारुणिकस्य = परमदयालोः। निषादनिर्भिन्नशकुनिसन्दर्शनमात्रसमुत्थितः - निषादेन = भिल्लेन निर्भिन्नस्य = हतस्य शकुनेः = पक्षिणः सन्दर्शनमात्रेण = अवलोकनमात्रेण। समुत्थितः = सञ्जातः। शोकः = दुःखम्। श्लोकत्वम् श्लोकरूपताम्। अभजत = अजायत। यस्य = यन्मुनेः इति, तस्य। तदवस्थाजनकराजपुत्रीदर्शनविवशवृत्तेः तदवस्थायां शोकाकुलदशा-याम्, जनकराजपुत्र्याः सीतायाः, दर्शनेन अवलोकनेन विवशवृत्तेः पराधीनवृत्तेः। अन्तःकरणपरिस्पदः चेतसो व्यापारः। करुणरसपरिपो-षाङ्गतया - करुण रसस्य परिपोषाङ्गतया परिपोषणतया।

सहृदयाह्लादकारी = सरसहृदयानन्ददायी। कवेः = वाल्मीकेः। अभिप्रेतः अभिप्रायः।

**यथा-**

> **भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं**
> **तत्संदेशाद्धृदयनिहितादागतं त्वत्समीपम्।**
> **यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां**
> **मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३२ ॥**

**अन्वयः**- हे अविधवे ! अम्बुवाहम् मां भर्तुः प्रियं मित्रं हृदयनिहितात् तत्संदेशात् त्वत्समीपम् आगतं विद्धि । यः पथि श्राम्यतां प्रोषितानाम् अबलावेणिमोक्षोत्सुकानि वृन्दानि मन्द्रस्निग्धैः ध्वनिभिः त्वरयति ।

**व्याख्या** - भर्तुरिति। हे अविधवे = अयि सौभाग्यवति ! अम्बुवाहम् = मेघम्। माम्। भर्तुः = पत्युः। प्रियं मित्रम् = प्रियसखायम्। हृदयनिहितात् = चेतसि धृतात्। तत्सन्देशात् = पतिसमाचारात्। त्वत्समीपम् = तव सकाशम्। आगतम् = आयातम्। विद्धि = जानीहि। यः अयम् = एषः। पथि = वर्त्मनि । श्राम्यताम् = विश्राम्यताम् । प्रोषितानाम् = प्रवासिनाम्। अबलावेणिमोक्षोत्सुकानि - अबलानाम् = नारीणां वेणिमोक्षाय = कचविमोचनायोत्सुकानि = समुत्साहितानि । वृन्दानि समूहानि। मन्द्रस्निग्धैः = गम्भीरस्निग्धैः। ध्वनिभिः = रवैः। त्वरयति = शीघ्रतां करोति।

यत् मेघे यद्यपि विरहिव्यथाकारित्वादयो विविधधर्माः सन्ति तथापीह विरहिसंयोजकत्वेन वर्णितो रमणीयः सन्नाह्लादयति

**अत्र प्रथममामन्त्रणपदार्थस्तदाश्वासकारिपरिस्पन्दनिबन्धनः। भर्तुर्मित्रं मां विद्धीत्युपादेयत्वमात्मनः प्रथयति । तच्च न सामान्यम्, प्रियमिति विश्वम्भकथापात्रताम्। इति तामाश्वास्योन्मुखीकृत्य च तत्संदेशात्त्वत्समीपमागमनमिति प्रकृतं प्रस्तौति । हृदयनिहितादिति स्वहृदयानिहितं सावधानत्वं द्योत्यते। ननु चान्यः कश्चिदेवंविधव्यवहारविदग्धबुद्धिः कथं न नियुक्त इत्याह-ममैवात्र किमपि कौशलं विजृम्भते। अम्बुवाहमित्या मनस्तत्कारिताभि यः प्रोषितानां वृन्दानि त्वरयति, संजातत्वराणि करोति। कीदृशानाम् - श्राम्यतां त्वरायामसमर्थानामपि।**

**वृन्दानीति बाहुल्यात्तत्कारिताभ्यासं कथयति। केन - मन्द्रस्निग्धैः ध्वनिभिः, माधुर्यरमणीयैः शब्दैर्विदग्धदूतप्ररोचनावचनप्रायैरित्यर्थः। क्व-पथि मार्गे। यदृच्छया यथाकथंचिदहमेतदाचरामीति किं पुनः प्रयत्नेन सुहृत्प्रेमनिमित्तं संरब्धबुद्धिर्न करोमीति।**

**व्याख्या -** अत्र = अस्मिन् श्लोके। प्रथमम् = प्राक्। आमन्त्रणपदार्थः = सम्बोधनपदार्थः। तदाश्वासकारिपरिस्पन्दनिबन्धनः तस्याः यक्षिण्याः आश्वासनकारी = आश्वासनदाता परिस्पन्दनिबन्धनः व्यापारकारणः। भर्तुः = स्वामिनः। मित्रम् = सखा। माम् = मा। विद्धि = जानीहि इति आत्मनः = स्वस्य। उपादेयत्वम् = उपयोगिताम्। प्रथयति = प्रमाणयति। तच्च न सामान्यम् = साधारणम्। 'प्रियम्' इति विश्रम्भकथापात्रताम् = विश्वासवार्त्तापात्रताम्। इति = एवम्। ताम् = यक्षिणीम् आश्वास्य = धैर्यं दत्वा। उन्मुखीकृत्य = ध्यानमाकृष्य च। तत्सन्देशात् = तत्समाचारात्। स्वत्समीपम् = तव पार्श्वम्। आगमनम् इति प्रकृतम् = मौलिकम्। प्रस्तौति = उपस्थापयति। हृदयनिहितात् = चेतसि घृतात्। इति स्वहृदयनिहितम् - आत्मचेतोघृतम्। सावधानत्वम् = सावधानताम्। द्योतते = प्रकटयति। ननु च अन्यः = कश्चित्। एवं विधव्यवहारविदग्धबुद्धिः = एतत्प्रकारकव्यवहार कुशलधीः कथं न नियुक्तः = कथं न स्थापितः। इति आह = प्राह। मम = मे एव अत्र किमपि = किञ्चिदपि कौशलम् = निपुणत्वम्। विजृम्भते दृश्यते। 'अम्बुवाहम्' इति। आमनः = मनःपर्यन्तम्। तत्कारिताभिधानम् अम्बुवाहनकार्यनामकम्। द्योतयति = प्रकटयति। यः प्रोषितानाम् - विदेशगतानाम्। वृन्दानि = समूहानि। त्वरयति = द्रुतयति। कीदृशानाम् = कीदृग्विधानाम्। श्राम्यताम् = विश्राम्यताम्। त्वरायाम् शीघ्रतायाम्। असमर्थानाम् = अशक्तानाम् अपि। 'वृन्दानि' इति बाहुल्यात्- बहुवचनात्। तत्कारिताभ्यासम्= तत्कृत्याभ्यासम्। कथयति = वदति। केन = केन प्रकारेण ? मन्द्रस्निग्धैः = मन्द्रगभीरैः स्निग्धैश्च। ध्वनिभिः = रवैः। माधुर्यरमणीयशब्दैः। विदग्धदूतप्ररोचना-वचनप्रायैः = चतुरदूतवचनरचनाप्रायैः। इति अर्थः अभिप्रायः। क्व

कुत्र? पथि वर्त्मनि। यदृच्छया = यथेच्छया। यथा कथञ्चित् = येन केन प्रकारेण। अहम् एतत् = इदम्। आचरामि = करोमि इति। किं पुनः प्रयत्नेन = प्रयासेन सुहृत्प्रेमनिमित्तम् = मित्रप्रीतिकारणम्। संरब्धबुद्धिः = समाहितचेता। न करोमि = नैव सम्पादयामि इति।

**यथा-**

**कीदृशानि वृन्दानि-अबलावेणिमोक्षोत्सुकानि । 'अबला' शब्देनात्र तत्प्रेयसीविरहवैधुर्यासहत्वं भण्यते, तद्वेणिमोक्षोत्सुकानीति तेषां तदनुरक्तचित्तवृत्तित्वम्। तदयमत्र वाक्यार्थः - विधिविहितविरह-वैधुर्यस्य परस्परानुरक्तचित्तवृत्तेर्यस्य कस्यचित्कामिजनस्य समागम-सौख्यसम्पादनसौहार्दं सदैव गृहीतव्रतोऽस्मीति। अत्र यः पदार्थपरिस्पन्दः कविनोपनिबद्धः प्रबन्धस्य मेघदूतत्वे परमार्थतः स एव जीवितमिति सुतरां सहृदयहृदयाह्लादकारी। न पुनरेवंविधो यथा-**

एतादृशैः स्वभावैः विशिष्ट एव मेघः काव्येऽर्थो भवति

**व्याख्या** - कीदृशानि वृन्दानि = कीदृक्समूहानि। अबलावेणिमोक्षोत्सुकानि - अबलानाम् = नारीणाम् वेणिमोक्षाय = कचविमोचनायोत्सुकानि = इच्छुकानि। 'अबला 'शब्देनात्र तत्प्रेयसीविरहवैधुर्यासहत्वम्- तस्य यक्षस्य प्रेयस्याः = प्रियायाः वैघुर्यासहत्वम् = विरहासहिष्णुता। भण्यते = कथ्यते। तद्वेणिमोक्षोत्सुकानि इति तेषां प्रोषितानाम् = विदेशिनाम्। तदनुरक्तचित्तवृत्तित्वम् = यक्षिण्यनुरक्तमनोवृत्तिताम्। तत्= तस्मात्। अयम् =एषः। अत्र श्लोके। वाक्यार्थः वाक्याशयः अस्ति। विधिविहितविरहवैधुर्यस्य = दैवकृतवियोगविधुरतायाः। परस्परानुरक्तचित्तवृत्तेः = अन्योन्यानुरक्तमनोदशायुक्तस्य । यस्य कस्यचित् यस्य कस्यापि । कामिजनस्य कामुकस्य। समागम-सौख्यसम्पादनसौहार्दं = मिलनानन्दसम्पादनप्रिये मयि। सदैव = नित्यम्। गृहीतव्रतः = कृतसंकल्पः अस्मीति। अत्र एतस्मिन् स्थाने। यः पदार्थपरिस्पन्दः = मेघस्वभावः। कविना = सूरिणा। उपनिबद्धः लिखितः। प्रबन्धस्य = काव्यस्य मेघदूतत्वे परमार्थतः = वस्तुतः। स एव = असावेव। जीवितम् = प्राणभूतम् इति। सुतराम् =नितराम्।

सहृदयहृदयाह्लादकारी = सत्पुरुषानन्ददायी। न पुनः एवं विधः = ईदृशः।

**सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी**
**सीता जवात् त्रिचतुराणि पदानि गत्वा।**
**गन्तव्यमद्य कियदित्यसकृद् ब्रुवाणा**
**रामाश्रुणः कृतवती प्रथमावतारम्॥ ३३॥**

**अन्वयः** - शिरीषमृद्वी सीता सद्यः पुरीपरिसरे अपि जवात् त्रिचतुराणि पदानि गत्वा अथ कियत् गन्तव्यम् इति असकृत् ब्रुवाणा रामाश्रुणः प्रथमावतारं कृतवती।

सीतायाः गन्तविषयकः असकृत्प्रश्नरूपः यः स्वभावो वर्णितः तस्याः स्वभावस्य महत्तां न प्रकाशयति

**व्याख्या** - शिरीषमृद्वी = शिरीषकुसुमसदृशकोमलाङ्गी । सीता = जनक-नन्दिनी। सद्यः = तत्क्षणम्। पुरीपरिसरे - पुर्याः = अयोध्यायाः परिसरे = समीपे अपि। जवात् = शीघ्रतया। त्रिचतुराणि = कतिपयानि। पदानि गत्वा = यात्वा। अद्य = सम्प्रति। कियत् = कियत्प्रमाणम्। गन्तव्यम् = चलितव्यम् इति। असकृत् = वारंवारम्। ब्रुवाणा = भाषमाणा। रामाश्रुणः - रामस्य = रामचन्द्रस्याश्रुणः = नयनवारिणः। प्रथमावतारम् - प्रथमम् = प्रथमवारम् अवतारम् = अवरितम्। कृतवती = विहितवती।

**अत्रासकृत्प्रतिक्षणं कियदद्य गन्तव्यमित्यभिधानलक्षणः परिस्पन्दो न स्वभावमहत्तामुन्मीलयति, न च रसपरिपोषाङ्गतां प्रतिपद्यते। यस्मात्सीतायाः सहजेन केनाप्यौचित्येन गन्तुमध्यवसितायाः सौकुमार्यादेवंविधं वस्तु हृदये परिस्फुरदपि वचनमारोहतीति सहृदयैः सम्भावयितुं न पार्यते। न च प्रतिक्षणमभिधीयमानमपि राघवाश्रुप्रथमावतारस्य सम्यक् सङ्गतिं भजते, सकृदाकर्णनादेव तस्योपपत्तेः। एतच्चात्यन्तरमणीयमपि मनाङ्मात्रचलितावधानत्वेन कवेः कथितम्। तस्माद् 'अवशम्' इत्यत्र पाठः कर्तव्यः। तदेवंविधं विशिष्टमेव शब्दार्थयोर्लक्षणमुपादेयम्। तेन नेयार्थापार्थादयो दूरोत्सारितत्वात्पृथङ् न वक्तव्याः।**

**व्याख्या** - अत्र = अस्मिन् उदाहरणे। असकृत् = वारंवारम् प्रतिक्षणं वा। कियत् = कियत्प्रमाणम्। सद्य = सम्प्रति। गन्तव्यम् = यातव्यम्। गमनीयमवशिष्टम्। इति अभिधानलक्षणः = कथनरूपः। परिस्पन्दः व्यापारः। स्वभावमहत्ताम् = प्रकृतिमहत्त्वम्। नोन्मूलयति = नैव प्रकटयति। च तया। रसपरिपोषाङ्गताम् - रसस्य करुणारसस्य। परिपोषणस्य परिपुष्टेः। अङ्गताम् अङ्गत्वम्। न प्रतिपद्यते नैव सम्पद्यते। यस्मात् = यतः। सीतायाः जनकनन्दिन्याः। सहजेन सरलेन। केनापि औचित्येन = औचित्यकारणेन। गन्तुम् = यातुम्। अध्यवसितायाः = उद्यतायाः। सौकुमार्यात् = सुकुमारावस्थायाः। एवं विधम् = ईदृक्। वस्तु पदार्थः। हृदये = चेतसि। परिस्फुरत् = स्वन्दितमपि। वचनम् = कथनम्। आरोहति इति एवम्। सहृदयैः = सज्जनैः। सम्भावयितुम् = कल्पयितुम्। न पारयति = पारं नैव गच्छति। तथा च प्रतिक्षणम् = प्रतिपलम्। अभिधीयमानम् भाषमाणम् अपि। राघवाश्रुप्रथमावतारस्य = रामनयनवारिणः प्रथमपातस्य। सम्यक् समीचीनम्। सङ्गतिं न भजते संगतिं न करोति। सकृत् = एकवारम्। आकर्णनात् आश्रवणात् एव। तस्य अश्रुणः। उपपत्तेः = प्रमाणात्। तथा च। एतत् इदम्। अत्यन्तरमणीयम् = अतिमनोरमम् अपि। मनाङ्मात्रं = किञ्चिन्मात्रम्। चलितावधानत्वेन चलनसावधानतया। कवेः = सूरेः। कथितम् = निन्दितम्। तस्मात् ततः। अवश्रम् इत्यत्र पाठः, कर्त्तव्यः = करणीयः। तत् = तस्य। एवं विधम् = ईदृशम्। विशिष्टम् एव = विशेषमेव। शब्दार्थयोः = वाच्यवाचकयोः। लक्षणम् = स्वरूपम्। उपादेयम्- उपयुक्तम्। तेन-ततः। नेयार्थोपार्थादयः = नेयार्थकाः। अपार्थादयः दोषाश्च। दूरोत्सारितत्वात् - दूरतः उत्सारणतया। पृषङ् न वक्तब्याः पृथङ् न वर्णनीयाः।

असकृत् इत्यस्य स्थाने अवशम् इति पाठः कर्तव्यः

***एवं शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि, किन्तु वैचित्र्यान्तरविशिष्टमित्याह -***

**उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।**

**वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते॥ १०॥**

**अन्वयः** - एतौ उभौ अलङ्कायौ पुनः तयोः अलङ्कृतिः वक्रोक्तिः एव वैदग्ध्यभङ्गीभणितिः उच्यते।

**व्याख्या** - एतौ = इमौ। उभौ द्वौ। अलङ्कार्यौ स्तः। पुनः = भूयः। तयोः = द्वयोः शब्दार्थयोः। अलङ्कृतिः- अलङ्कारता। वैदग्ध्यभङ्गीभणितिः = चातुर्यपूर्णभङ्गी उक्तिः। वक्रोक्तिः - वक्रोक्तिर्नाम। इति एवम्। उच्यते = कथ्यते।

वैदग्ध्यभङ्गीभणितिः वक्रोक्तिः

**वृत्तिः - उभौ द्वावप्येतौ शब्दार्थावलङ्करणीयौ केनापि शोभातिशयकारिणाऽलङ्करणेन योजनीयौ। किं तत्तयोरलङ्करणमित्य - भिधीयते तयोः पुनरलङ्कृतिः। तयोः द्वित्वसंख्या-वशिष्टयोरप्यलङ्कृतिः पुनरेकैव, यया द्वावप्यलंक्रियेते। कासौ - वक्रोक्तिरेव। वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। कीदृशी - वैदग्ध्यभङ्गीभणितिः। वैदग्ध्यं विदग्धभावः कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः, तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। तदिदमत्र तात्पर्यम् - यत् शब्दार्थौ पृथगवस्थितौ केनापि व्यतिरिक्तेनालङ्करणेन योज्येते, किन्तु वक्रतावैचित्र्ययोगितयाभिधानमेवानयोरलङ्कारः, तस्यैव शोभातिशय-कारित्वात्। एतच्च वक्रताव्याख्यानावसर एवोदाहरिष्यते।**

**व्याख्या** - उभौ द्वौ अपि एतौ = इमौ। शब्दार्थौ = वाच्यवाचकौ। अलङ्कार्यौ - अलङ्करणीयौ, अलङ्करणयोग्यौ। केनापि शोभातिशयकारिणा = अत्यन्तसौन्दर्यकारिणा। अलङ्करणेन च = अलङ्कृत्या च। योजनीयौ = संयोज्यौ। किं तत् तयोः = शब्दार्थयोः अलङ्करणम् = अलङ्कृतिः। इति अभिधीयते अलङ्कृतिः = अलङ्कारः। कथ्यते। पुनः तयोः = शब्दार्थयोः। अलङ्कृतिः = अलङ्कारः। तयोर्द्वित्वसंख्याविशिष्टयोः शब्दार्थयोः अपि अलङ्कृतिः = अलङ्कारः। पुनः एक एव। यया अलङ्कृत्या। द्वौ अपि = उभावपि। एतौ = इमौ। अलङ्क्रियेते। असौ का ? वक्रोक्तिः विचित्रभणितिः एवासौ अलङ्कृतिः वक्रोक्तिः। प्रसिद्धाभिधानव्यतिरेकिणी = प्रख्यातकथनभिन्ना। विचित्रा

अद्भुतैव। अभिधाऽस्ति। कीदृशी विचित्राभिधा? वैदग्ध्यभङ्गीभणितिः = चातुर्यपूर्णोक्तिः। वैदग्ध्यम् विदग्धभावः, कविकर्मकौशलं तस्य भङ्गी विच्छित्तिः = शोभा, तया भणितिः विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। तदिदमत्र तात्पर्यम् आशयः । यत् शब्दार्थौ = वाच्यवाचकौ । पृथक् अवस्थितौ = स्थितौ केनापि व्यतिरिक्तेन अलङ्करणेन = भिन्नालङ्कारेण। योज्येते = संयोज्येते। किन्तु वक्रतावैचित्र्ययोगितया- वक्रतायाः वैचित्र्ययोगितया = विचित्रतायुक्तत्वेन। अभिधानम् एव = कथनमेव। अनयोः = एतयोः अलङ्कारः। तस्यैव शोभातिशयकारित्वात् = अत्यन्तशोभोत्पादनत्वात्। एतत् = इदम् च। वक्रताव्याख्यानावसरे = वक्रतावर्णनकाले एव। उदाहरिष्यते = व्याख्यास्यते।

***ननु च किमिदं प्रसिद्धार्थविरुद्धं प्रतिज्ञायते यद्वक्रोक्तिरेवालङ्कारो नान्यः कश्चिदिति, यतश्चिरन्तनैरपरं स्वभावोक्तिलक्षणमलङ्करणमाम्नातं तच्चातीव रमणीयमित्यसहह्यानस्तदेव निराकर्तुमाह***

**अलङ्कारकृतां येषां स्वभावोक्तिरलङ्कृतिः।**
**अलङ्कार्यतया तेषां किमन्यदवतिष्ठते॥ ११॥**

**अन्वयः** - येषाम् अलङ्कारकृतां स्वभावोक्तिः अलङ्कृतिः, तेषाम् अलङ्कार्यतया अन्यत् किम् अवतिष्ठते।

स्वभावोक्तेः निराकरणम्

**व्याख्या** - येषामलङ्कारकृताम् = अलङ्कारग्रन्थकृताम्। स्वभावोक्तिः = स्वमावोक्तिर्नाम । अलङ्कृतिः- अलङ्कारः । तेषाम् = अलङ्कारकृताम्। अलङ्कार्यतया = अलङ्कार्यरूपेण। अन्यत् = अपरम्। किं = किं वस्तु। अवतिष्ठते = अवस्थितं भवति।

येभ्यः आलङ्कारिमाचार्येभ्यः स्वाभावोक्त्यलङ्कार एवाभिप्रेतः तेभ्यः अलङ्काररूपेण पुनः किमवशिष्टम्। एतदेव विस्फोरयन् वृत्तौ

**वृत्ति - येषामलङ्कारकृतामलङ्कारकाराणां स्वभावोक्तिरलङ्कृतिः, या स्वभावस्य पदार्थधर्मलक्षणस्य परिस्पन्दस्य उक्तिरभिधा सैवालङ्कृतिरलङ्करणमिति प्रतिभाति, ते सुकुमारमानसत्वाद् विवेकक्लेशद्वेषिणः। यस्मात् स्वभावोक्तिरिति कोऽर्थः? स्वभाव**

**एवोच्यमानः स एव यद्यलङ्कारस्तत्किमन्यत्तद्व्यतिरिक्तं काव्यशरीरकल्पं वस्तु विद्यते यत्तेषामलङ्कार्यतया विभूष्यत्वेनावतिष्ठते पृथगवस्थितिमासादयति, न किञ्चिदित्यर्थः।**

**व्याख्या** - येषामलङ्कारकृताम् = अलङ्कारग्रन्थलेखकानाम्, दण्डी प्रभृतीनाम्। स्वभावोक्तिः = तन्नामैव। अलङ्कृतिः = अलङ्कारः। या स्वभावस्य = पदार्थधर्मलक्षणस्य। परिस्पन्दस्य = व्यापारस्य स्वभावोक्तिः अभिधा। सैव = अभिधैव। अलङ्कृतिः। इति प्रतिभाति = प्रतीयते। ते = अलङ्कारिकाः। सुकुमारमानसत्वात् = कोमलहृदयत्वात्। विवेकक्लेशद्वेषिणः- विवेकस्य = ज्ञानस्य। क्लेशः = कष्टम्, तेन द्विषन्तीति = विरोधिनः। यस्मात् यतः। स्वभावोक्तिः इति कः अर्थः = किं तात्पर्यम्। स्वभाव एव उच्यमानः स्वभावोक्तिः। स एव स्वभावोक्तिरेव। यदि अलङ्कारः = अलङ्कृतिः। तत् = तर्हि। अपरम् = अन्यत् किं तद्व्यतिरिक्तम् = तद्भिन्नम्। काव्यशरीरकल्पम् = काव्यदेहसदृशम्। वस्तु = पदार्थः। विद्यते = वर्तते। यत् तेषाम् सुकुमारमती नामलङ्कारकृताम्। अलङ्कार्यतया = अलङ्काररूपेण। विभूषत्वेन = अलङ्करणार्हत्वेन। अवतिष्ठते = तिष्ठति। पृथक् = भिन्नम्। अवस्थितिम् = अवस्थानं च। आसादयति = प्राप्नोति। न किञ्चित् नैव किमपि। इति अर्थः = आशयः।

**स्वभावोक्तेः अलङ्कारत्वे अलङ्कार्यस्य अभावः**

अत्र दण्डिप्रभृतिभ्यः आचार्येभ्यः स्वाभावोक्त्यलङ्कारः विद्यते, यः स्वभावस्य (पदार्थधर्मस्वरूपस्वभावस्य) या उक्तिः कथनं वा सैवालङ्कृतिः प्रतीयते। नन्वत्र शङ्कते यत् (तदाह वृत्तौ)

**वृत्ति - ननु च पूर्वमवस्थापितम् - यद्वाक्यस्यैवाविभागस्य सालङ्कारस्य काव्यत्वमिति (११६) तत्किमर्थमेतदभिधीयते? सत्यम्, किन्तु तत्रासत्यभूतोऽप्यपोद्धारबुद्धिविहितो विभागः कर्तुं शक्यते वर्णपदन्यायेन वाक्यपदन्यायेन चेत्युक्तमेव।**

**व्याख्या** - ननु च = यद्यपि। पूर्वम् = प्राक्। अवस्थापितम् = भवता प्रतिपादितं यद् वाक्यस्य = अलङ्कारालङ्कार्यस्य एव। अविभागस्य =

विभागहीनस्य । सालङ्कारस्य = अलङ्कारसहितस्य । काव्यत्वम् = काव्यता । इति । तत् = तर्हि । किमर्थम् = किं निमित्तम् । एतत् = इदम् । अभिधीयते = कथ्यते । सत्यम् = तथ्यम् । किन्तु तत्र असत्यभूतः अपि = मिथ्याभूतोऽपि । अपोद्धारबुद्धिविहितः = अपोद्धारबुद्धिभिः कृतः विभागः = भेदः । कर्तुं शक्यते = विधास्यते । वर्णपदन्यायेन अथवा वाक्यपदन्यायेन च उक्तम् = कथितम् । एव ।

*एतदेव प्रकारान्तरेण विकल्पयितुमाह-*

**स्वभावव्यतिरेकेण वक्तुमेव न युज्यते ।**
**वस्तु तद्रहितं यस्मान्निरुपाख्यं प्रसज्यते ॥ १२ ॥**

**अन्वयः** - स्वभावव्यतिरेकेण (वस्तु) वक्तुम् न युज्यते । यस्मात् तद् रहितं वस्तु निरुपाख्यं प्रयुज्यते ।

**व्याख्या** - स्वभावव्यतिरेकेण = स्वभावेन विना । वस्तु वक्तुम् = कथयितुम् । न युज्यते = नैव शक्यते । यस्मात् = यतः । तद् रहितम् = स्वभाववर्जितम् वस्तु । निरुपाख्यम् = अभिधानशून्यम् । प्रसज्यते = संजायते ।

स्वभावेन विना वस्तुनः वर्णनं न भवितुमर्हति,यतो हि स्वभावरहितं किमपि वस्तु कथनीयं न भवति

**वृत्ति - स्वभावव्यतिरेकेण स्वपरिस्पन्दं विना निःस्वभावं वक्तुमभिधातुमेव न युज्यते न शक्यते। कुतः - तद्रहितं तेन स्वभावेन रहितं वर्जितं यस्मान्निरुपाख्यं प्रसज्यते । उपाख्याया निष्कान्तं निरुपाख्यम्। उपाख्या शब्दः, तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभावशब्दस्येदृशी व्युत्पत्तिः - भवतोऽस्मादभिधा-नप्रत्ययाविति भावः, स्वस्यात्मनो भावः स्वभावः। तेन वर्जितम-सत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव सर्वथाभिधेयपदवीमवनरतीति शाकटिवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन।**

**व्याख्या** - स्वभावव्यतिरेकेण = स्वपरिस्पन्दं विना निःस्वभावम् । वक्तुम् = अभिधातुम् । एव न युज्यते = न शक्यते । वस्तु = पदार्थः । वाच्यलक्षणम् = वाच्यरूपम्। कुतः = कस्मात् । तद्रहितं = तेन

स्वभावेन रहितं = वर्जितम्। यस्मात् निरुपाख्यम् प्रसज्यते = उपाख्यायाः निष्क्रान्तं निरुपाख्यम्, उपाख्या शब्दः तस्यागोचरभूतमभिधानायोग्यमेव सम्पद्यते। यस्मात् स्वभाव-शब्दस्येदृशी व्युत्पत्तिः = व्याख्या भवतोऽस्मादभिधानप्रत्ययाविति भावः। स्वस्य = आत्मनो भावः स्वभावः। तेन वर्जितमसत्कल्पं वस्तु शशविषाणप्रायं शब्दज्ञानागोचरतां प्रतिपद्यते। स्वभावयुक्तमेव सर्वथाभिध्यपदवीमवतरतीति शाकटिवाक्यानामपि सालङ्कारता प्राप्नोति, स्वभावोक्तियुक्तत्वेन।

*एतदेव युक्त्यन्तरेण विकल्पयति।*

**शरीरं चेदलङ्कारः किमलङ्कुरुतेऽपरम्।**
**आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति॥ १३॥**

**अन्वयः** - चेत् शरीरम् अलङ्कारः, अपरं किम् अलङ्कुरुते। आत्मा एव आत्मनः स्कन्धं क्वचिद् अपि न अधिरोहति॥

**व्याख्या** - चेत् = यदि। शरीरम् = देहम्। अलङ्कारः = अलङ्कृतिः। तर्हि अपरम् = अन्यत् किम् अलङ्कुरुते = अलंकरोति। यतः = हि। आत्मा = स्वयम् एव। आत्मनः = स्वस्य। स्कन्धम् = अंसदेशम्। क्वचित् = क्वापि। नाधिरोहति = आरोहणं न करोति।

स्वभावोक्तेः अलङ्कारत्वे अलङ्कार्यत्वस्य अभावः

**वृत्ति - यस्य कस्यचिद्वर्ण्यमानस्य वस्तुनो वर्णनीयत्वेन स्वभाव एव वर्ण्यशरीरम्। स एव चेदलङ्कारो यदि विभूषणं तत्किमपरं तद्व्यतिरिक्तं विद्यते यदलङ्कुरुते बिभूषयति। स्वात्मानमेवालङ्करोतीति चेत्तदयुक्तम् अनुपपत्तेः। यस्मादात्मैव नात्मनः स्कन्धं कृचिदप्यधिरोहति, शरीरमेव शरीरस्य न कुत्रचिदप्यंसमधिरोहतीत्यर्थः, स्वात्मनि क्रियाविरोधात्।**

**व्याख्या** - यस्येति। यस्य कस्यचित् = यत्कस्यचित्। वर्ण्यमानस्य = वर्णनीयस्य वस्तुनः - पदार्थस्य। वर्णनीयत्वेन = वर्ण्यमानत्वेन। स्वभाव एव। वर्ण्यशरीरं = वर्ण्यनीयदेहम् भवति। स एव = स्वभाव एव। अलङ्कारश्चेत्। विभूषणम्-भूषणम्। तत् = तर्हि। किम् अपरम् = अन्यत्। व्यतिरिक्तम् = भिन्नं, विद्यते = वर्तते। यत् अलङ्कुरुते =

विभूषयति । स्वात्मानम् एव अलङ्करोति इति चेत् । तत् अयुक्तम् = अनुपयुक्तम् । अनुपपत्तेः युक्तिसंगतत्वात् । यस्मात् = यतः । आत्मैव = स्वयमेव । आत्मनः स्वस्य । स्कन्धे = अंसदेशम् । क्वचित् = कुत्रापि नाधिरोहति । शरीरम् एव शरीरस्य = देहस्य । न कुत्रचित् = न क्वापि । अंसम् = स्कन्धम् नाधिरोहतीत्यर्थः । स्वात्मनि क्रियाविरोधात् ।

***अन्यच्चाभ्युपगम्यापि ब्रूमः -***

**भूषणत्वे स्वभावस्य विहिते भूषणान्तरे ।**
**भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा । १४ ॥**

**अन्वयः** - स्वभावस्य भूषणत्वे भूषणान्तरे विहिते भेदावबोधः प्रकटयति अथवा तयोः अप्रकटः ।

**व्याख्या** - स्वभावस्य = स्वभावोक्तेः । भूषणत्वे = अलङ्कारत्वे । भूषणान्तरे = उपमाद्यन्यलङ्कारत्वे । विहिते = कृते । भेदावबोधः = विभेदज्ञानम् । प्रकटः = स्पष्टः । अथवा = वा अप्रकटः = अस्पष्टः स्यात् ।

स्वभावोक्तेरुपमाद्यलङ्काराणां भेदावबोधो द्वाभ्यां प्रकाराभ्यां भविष्यति प्रकटरूपेण अप्रकटरूपेण च

**स्पष्टे सर्वत्र संसृष्टिरस्पष्टे सङ्करस्ततः ।**
**अलङ्कारान्तराणां च विषयो नावशिष्यते ॥ १५ ॥**

**अन्वयः** - स्पष्टे सर्वत्र संसृष्टिः तथा अस्पष्ट संकरः । अलङ्कारान्तराणां विषयः च न अवशिष्यते ।

**व्याख्या** - स्पष्टे = स्वभावोक्तौ । अपरालङ्कारे च भेदस्य स्पष्टे सति । सर्वत्र, संसृष्टिः = संसृष्टिनामालङ्कारः । ततः उभयो भेदे अस्पष्टे सति । सङ्करालङ्कारः च । अलङ्काराणाम् = अन्योपमाद्यलङ्काराणां विषयः । नावशिष्यते = अवशिष्टो न भविष्यति ।

**वृत्ति - भूषणत्वे स्वभावस्यालङ्कारत्वे स्वपरिस्पन्दस्य यदा भूषणान्तरमलङ्कारान्तरं विधीयते तदा विहिते कृते, तस्मिन् सति, द्वयी गतिः संभवति । कासौ - तयोः स्वभावोक्त्यलङ्कारयोः भेदावबोधो भिन्नत्वप्रतिभासः प्रकटः सुस्पष्टः कदाचिदप्रकटश्चापरिस्फुटो वेति । तदा स्पष्टे प्रकटे तस्मिन् सर्वत्र सर्वस्मिन् कविवाक्ये**

**संसृष्टिरेवैकालङ्कृतिः प्राप्नोति । अस्पष्टे तस्मिन्नप्रकटे सर्वत्रैवैकः संकरोऽलङ्कारः प्राप्नोति । ततः को दोषः स्यादित्याह - अलङ्कारान्तराणां च विषयो नावशिष्यते । अन्येषामलङ्काराणामुपमादीनां विषयो गोचरो न कश्चिदप्यवशिष्यते, निर्विषयत्वमेवायातीत्यर्थः। ततस्तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः । यदि वा तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते तदपि न किञ्चित्, तैरेवालङ्कारकारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इत्यनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन। प्रकृतमनुसरामः। सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन वर्णनापदवीमवतरतः स्वभाव एव सहृदयाह्लादकारी काव्यशरीरत्वेन वर्णनीयतां प्रतिपद्यते। स एव च यथायोगं शोभातिशयकारिणा येन केनचिदलङ्कारेण योजयितव्यः। तदिदमुक्तम् – 'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१।९) इति। 'उभावेतालङ्कार्यौ' (१।१०) इति च।**

स्वभावोक्तेः अलङ्कारत्वे अलङ्कारान्तराणां विषयस्य अभावः

**व्याख्या** - भूषणत्वे स्वभावस्यालङ्कारत्वे स्वपरिस्पन्दस्य यदाभूषणान्तरम् = अलङ्कारान्तरम् विधीयते तदा विहिते = कृते, तस्मिन् सति द्वयी गतिः सम्भवति = भवति । काऽसौ तयोः = स्वभावोक्त्यलङ्कारान्तरयोः भेदावबोधः = भेदज्ञानम् भिन्नत्वप्रतिभासः प्रकटः = सुस्पष्टः । कदाचित् अप्रकटः = अपरिस्फुटश्चापि वा । तदा, स्पष्टे = प्रकटे, तस्मिन् सर्वत्र = सर्वस्मिन् कविवाक्ये संसृष्टिरेवैकालङ्कृति । प्राप्नोति । अस्पष्टे = तस्मिन् अप्रकटे सर्वत्रैवैकः सङ्करालङ्कारः प्राप्नोति । ततः कः दोषः स्यात् इत्याह- अलङ्कारान्तराणाम् - उपमाद्यन्यालङ्काराणां च विषयो नावशिष्यते । अन्येषाम् अलङ्काराणाम् उपमादीनां विषयो गोचरो न कश्चिद् अवशिष्यते = निर्विषयत्वमेवायाति इत्यर्थः । ततः तेषां लक्षणकरणवैयर्थ्यप्रसङ्गः । यदि वा तावेव संसृष्टिसंकरौ तेषां विषयत्वेन कल्प्येते, तदपि न कश्चिद्, तैरेवालङ्कारैस्तस्यार्थस्यानङ्गीकृतत्वात्। इति अनेनाकाशचर्वणप्रतिमेनालमलीकनिबन्धनेन। प्रकृतम् = मूलमनुसरामः अनुसरणं कुर्मः । सर्वथा यस्य कस्यचित् पदार्थजातस्य कविव्यापारविषयत्वेन

वर्णनापदवीमवतरतः स्वभाव एव सहृदयहृदयाह्लादकारी = सज्जनचित्तानन्ददायी । काव्यशरीरत्वेन वर्णनीयतां = वर्णनत्वम् । प्रतिपद्यते = प्राप्यते । स एव च यथायोगं शोभातिशयकारिणा = अत्यन्तशोमाकारिणा। येन केनचित् अलङ्कारेण योजयितव्यः संयोज्यः। ततः = तस्मात्। इदम् = एतत्। उक्तम् = कथितम्। 'अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' (१।९) इति। उभौ = द्वौ। एतौ = इमौ। अलङ्कार्यौ = अलङ्करणयोग्यौ इति च।

***एवं शब्दार्थयोः परमार्थमभिधाय 'शब्दार्थौ' इति (१।७) काव्यलक्षणवाक्ये पदमेकं व्याख्यातम्। इदानीं 'सहितौ' इति (१।७) व्याख्यातुं साहित्यमेतयोः पर्यालोच्यते -***

सहितस्य स्वरूपं

**शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।**
**सहिताविति तावेव किमपूर्वं विधीयते॥ १६॥**

**अन्वयः** - शब्दार्थौ सदा सहितौ एव स्फुरतः प्रतीतौ। तौ एव सहितौ इति अपूर्वं किं विधीयते।

**व्याख्या** - शब्दार्थौ = शब्दश्चार्थश्च तौ । सदा = सर्वदा । सहितौ = अवियुक्तौ एव स्फुरतः प्रतीतौ = भासेते। तौ = शब्दार्थौ एव सहितौ = अवियुक्तौ एव साहित्यमिति। अतः अपूर्वम् = अद्भुतम्। किं विधीयते = किं क्रियते।

**वृत्ति - शब्दार्थावभिधानाभिधेयौ सहिताववियुक्तावेव सदा सर्वकालं प्रतीतौ स्फुरतः ज्ञाने प्रतिभासेते। ततस्तावेव सहिताववियुक्ताविति किमपूर्वं विधीयते न किञ्चिदपूर्वं निष्पाद्यते, सिद्धं साध्यत इत्यर्थः। तदेवं शब्दार्थयोर्निसर्गसिद्धं साहित्यम्। कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयति ? सत्यमेतत्, किन्तु न वाच्यवाचक-लक्षणशाश्वतसम्बन्धनिबन्धनं वस्तुतः साहित्यमित्युच्यते। यस्मादे-तस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि गाङ्कुटा - दिवाक्यान्यसम्बद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्देना- भिधीयेरन्। तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।**

साहित्यपदार्थस्य अद्भुता

**व्याख्या -** शब्दार्थौ = अभिधानाभिधेयौ। सहितौ = अवियुक्तौ। एव सदा = सर्वकालम्। प्रतीतौ = ज्ञाने। स्फुरतः = प्रतिभासेते। ततः तौ एव सहितौ = अवियुक्तौ, इति किम् अपूर्वं विधीयते, न किञ्चित् अपूर्वं निष्पाद्यते, सिद्धम् साध्यत इत्यर्थः। तदेवं शब्दार्थयोः। निसर्गसिद्धम् = प्रकृतिसिद्धं साहित्यं कः सचेताः पुनः तदभिधानेन तत्कथनेन। निष्प्रयोजनम् = व्यर्थम्। आत्मानम् = स्वम्। आयासयति = प्रयासं करोति। एतत् = इदम्। सत्यम् = तथ्यम्। किन्तु न वाच्यवाचकलक्षणशाश्वतसम्बन्धनिबन्धनम् = वाच्यवाचकरूपनिरन्तर-सम्बन्धकारणम्। वस्तुतः = यथार्थतः 'साहित्यम्' इति। उच्यते कथ्यते। यस्मात् = यतः। एतस्मिन् - अस्मिन्। साहित्यशब्देन अभिधीयमाने = कथ्यमाने। कष्टकल्पनोपरचितानि = कठिनया कल्पनया विरचितानि। गाङ्कुटादिवाक्यानि। असम्बद्धानि = क्रमरहितानि। शाकटिकादिवाक्यानि गड्डुलिकावाहकवाक्यानि च सर्वाणि = अखिलानि। साहित्यशब्देन = साहित्यसंज्ञया अभिधीयेरन् = कथ्येरन्। तेन = तत्कारणेन। पदवाक्यप्रमाणव्यतिरिक्तम् - पदेन = व्याकरणेन, वाक्येन = मीमांसया, प्रमाणेन = न्यायशास्त्रेण, च व्यतिरिक्तम् = भिन्नम्, किमपि। तत्त्वान्तरम् = पृथक् तत्त्वम्। साहित्यम् = साहित्यसंज्ञकम्, इति विभागः = भेदः अपि न स्यात् = न भवेत्।

**वृत्ति - ननु च पदादिव्यतिरिक्तं यत्किमपि साहित्यं नाम तदपि सुप्रसिद्धमेव, नाम तदेतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणेव प्रसिद्धम्। न पुनस्तदभिधानेऽपि कथं न पौनरुक्त्यप्रसङ्गः? अत एवैतदुच्यते - यदिदं साहित्यं पुनरेतस्य कविकर्मकौशलकाष्ठाधिरूढिरमणीयस्याद्यापि कश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः। तदद्य सरस्वतीहृदयारविन्दमकरन्दवबिन्दुसन्दोहसुन्दराणां सत्कविवचसा-मन्तरामोदमनोहरत्वेन परिस्फुरदेतत् सहृदयषड्चरणगोचरतां नीयते।**

**व्याख्या** - ननु च = यदि। पदादिव्यतिरिक्तम् = यत्किमपि। साहित्यं नाम = साहित्यसंज्ञकम्। तद् अपि, सुप्रसिद्धमेव विख्यातमेव। व्याकरणादिभिन्नम्। पुनः = भूयः। तदभिधानेन - तस्य = साहित्यस्य अभिधानेन = व्याख्यानेन। कथं न पौनरुक्त्यप्रसङ्गः = पुनरुक्तिदोष, पिष्टपेषणं कथं न स्यात्। अत एव, एतत् = वक्ष्यमाणप्रकारकम् उच्यते = कथ्यते। यदिदं, साहित्यं नाम = पूर्वोक्तं, वक्ष्यमाणं वा साहित्याभिधेयम्। तत् = तर्हि। एतावति निःसीमनि = एतावत्यसीमिते। समयाध्वनि = कालवर्त्मनि। साहित्यशब्दमात्रेण = केवलं साहित्यशब्देन, एव प्रसिद्धम् = विख्यातम्। पुनः एतस्य = अस्य। कविकर्मकाष्ठाधिरूढिरमणीयस्य = काव्यसीमाधिरूढि मनोरमस्य। अद्यापि = सम्प्रत्यपि। कश्चित् = कोऽपि विपश्चित्। यथार्थम्, अयम् = एषः। अस्य = एतस्य। परमार्थः = विशेषार्थः। इति = एवम्। मनाङ्मात्रमपि = स्तोकमात्रमपि। विचारपदवीम् = विवेचनार्थम् अवतीर्णः। तत् = तस्मात्। अद्य = सम्प्रति। सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणाम् - सरस्वत्याः = देव्या। हृदयम् = चेतः रूपम्, यदरविन्दम् = कमलम्, तस्य मकरन्दबिन्दूनि = पुष्परस-कणानि, तेषां सन्दोहेन = समूहेन सुन्दराणाम् = मनोरमाणाम्। सत्कविवचसाम् = सुकविगिराणाम्। अन्तरामोदमनोहरत्वेन = आन्तरिकानन्दमनोरमरूपेण। परिस्फुरत् एतत् = इदम् साहित्यतत्त्वम्। सहृदयषट्चरणगोचरताम् = सहृदयाः एव षट्चरणाः तेषां गोचरताम् = सज्जनभ्रमरावलोकनताम्। नीयते = प्राप्यते।

साहित्यस्य लक्षणम्

> **साहित्यमनयोः शोभातिशालितां प्रति काप्यसौ।**
> **अन्यूनानतिरिक्तमनोहारिण्यवस्थितिः॥ १७॥**

**अन्वयः** - शोभातिशालितां प्रति अनयोः अन्यूना अनतिरिक्तमनोहारिणी असो कापि अवस्थितिः साहित्यम्।

**व्याख्या** - शोभातिशालितां प्रति = अतिशयसौन्दर्यं प्रति । अनयोः = एतयोः । अन्यूना = महती । अनतिरिक्तमनोहारिणी = परस्परस्पर्धया रमणीया । असौ = सा । कापि = अपूर्वा । अवस्थितिः = स्थितिः । साहित्यम् अभिधीयते ।

**वृत्ति - सहितयोर्भावः साहित्यम् । अनयोः शब्दार्थयोर्या काप्यलौकिकी चेतनचमत्कारकारितायाः कारणम् अवस्थितिर्विचित्रैव विन्यासभङ्गी । कीदृशी - अन्यूनानतिरिक्तत्वमनोहारिणी, परस्परस्पर्धित्वरमणीया । यस्यां द्वयोरेकतरस्यापि न्यूनत्वं निकर्षो न विद्यते नाप्यतिरिक्तत्वमुत्कर्षो वास्तीत्यर्थः ।**

वृत्ति - सहितयोः शब्दार्थयुक्तयोः भावः साहित्यं भवति । अनयो. = एतयोः शब्दार्थयोः । या, कापि = काचित् । अलौकिकी = अद्भुता । चेतनचमत्कारकारितायाः = सहृदयानन्दकारितायाः । कारणम् = हेतुः । अवस्थितिः = स्थितिः विचित्रैव = अद्भुतैव । विन्यासभङ्गी = विन्यासभङ्गिमा । कीदृशीः = कीदृग्विधाः । अन्यूनानतिरिक्तत्व-मनोहारिणी = न्यूनतायाः, आधिक्यस्याभावेन च मनोरमा । परस्परस्पर्धित्वरमणीया = अन्योन्यस्पर्धया मनोरमा । यस्यां द्वयोः = शब्दार्थयोरुभयोः । एकतरस्यापि = एकस्यापि । न्यूनत्वम् - हीनत्वं । निकर्षः = अपकर्षः । न विद्यते = नैव वर्तते । वा = अथवा । अतिरिक्तत्वम् = आधिक्यम् । उत्कर्षः = उत्थानम् । अस्तीत्यर्थः ।

काव्यलक्षणे शोभाशालितां इत्यस्यभिप्रायः

**वृत्ति - ननु च तथाविधं साम्यं द्वयोरुपहतयोरपि सम्भवतीत्याह - शोभातिशालितां प्रति । शोभा सौन्दर्यमुच्यते । तया शालते श्लाघते यः स शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति सौन्दर्यश्लाघितां प्रतीत्यर्थः । सैव च सहृदयाह्लादकारिता । तस्यां स्पर्धित्वेन यासाववस्थितिः परस्परसाम्यसुभगमवस्थानं सा साहित्यमुच्यते । तत्र वाचकस्य वाचकान्तरेण वाच्यस्य वाच्यान्तरेण साहित्यमभिप्रेतम्, वाक्ये काव्यलक्षणस्य परिसमाप्तत्वादिति प्रतिपादितमेव (११७) ।**

**व्याख्या** - यदि तथाविधम् = तादृक् । साम्यम् = समानता । द्वयोः = उभयोः, शब्दार्थयोः । उपहतयोः = सहितयोः अपि । सम्भवति = साहित्यं भवति । इति आह = इत्यकथयत् । शोभातिशालितां प्रति = अत्यन्तसौन्दर्यप्रशंसां प्रति । शोभा-सौन्दयम् उच्यते = कथ्यते । तया = शोभया । शालते श्लाघ्यते यः सः शोभाशाली, तस्य भावः शोभाशालिता, तां प्रति = सौन्दर्यश्लाधितां प्रति। सैव = सौन्दर्यश्लाघितैव । सहृदयाह्लादकारिता = रसिकजनानन्दकारिता । तस्यां स्पर्धित्वेन = स्पर्धतया । या असौ अवस्थितिः = स्थितिः । परस्पर-साम्यसुभगम् = न्यूनाधिक्यरहितेन साम्येन मनोरमम् अवस्थानम् = अवस्थितिः । सा साहित्यम् उच्यते = कथ्यते । तत्र वाचकस्य = शब्दस्य । वाचकान्तरेण = अन्यशब्देन सह । वाच्यस्य = अर्थस्य च । वाच्यान्तरेण = अन्यार्थेन सह साहित्यम् अपि अभीष्टम् । काव्यलक्षणस्य - काव्यस्वरूपस्य । वाक्ये परिसमाप्तत्वात् प्रतिपादितम् एव = समर्थितमेव ।

**वृत्ति - ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत्तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च । तस्मादेतयोः शब्दार्थयोर्यथास्वं यस्यां स्वसम्पत्सामग्रीसमुदायः सहृदयाह्लादकारी परस्परस्पर्धया परिस्फुरति, सा काचिदेव विन्याससम्पत् साहित्यव्यपदेशभाग् भवति ।**

काव्ये शब्दार्थयोः साहित्यं यथाक्रममेवं शोभते

**व्याख्या** - वाचकस्य = शब्दस्य । वाच्यान्तरेण = अन्यार्थेन । वाच्यस्य = अर्थस्य च । वाचकान्तरेण=अन्यशब्देन । कथं न साहित्यम् = साहित्यं कथं न भवतीति । चेत् = यदि, तन्न = तथाविधं न स्यात् । क्रमव्युत्क्रमे = क्रमपरिवर्तने । प्रयोजनाभावात् = प्रयोजनस्याभावात् = हीनतया । असमन्वयात् असंगत्या च । तस्मात् = तत्कारणात् । एतयोः = एनयोः । शब्दार्थयोः = वाचकवाच्ययोः । यथास्वम् = यथानुरूपम् । यस्यां स्वसम्पत्सामग्रीसमुदायः = निजशोभासामग्रीसमूहः । सहृदया-ह्लादकारी = सरसजनानन्दकारी । परस्परस्पर्धया = न्यूनाधिक्यरहित-

साम्यस्पर्धया । परिस्फुरति = स्फुरति । सा = एषा । काचिदेव = काप्येव। विन्याससम्पत् = वाक्यविन्याससम्पत्तिः । साहित्यव्यपदेश-भाक् = साहित्यनामभाक् भवति।

**मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।**

**अलङ्करणविन्यासो वक्रतातिशयान्वितः॥ ३४॥**

**अन्वयः** - मार्गानुगुण्यसुभगः माधुर्यादिगुणोदयः वक्रतातिशयान्वितः अलङ्करणविन्यासः क्रियते।

माधुर्यप्रभृतिगुणैर्युक्तः अतिशयवक्रतासंयुक्तः

**व्याख्या** - मार्गानुगुण्यसुभगः = मार्गानुरूपरमणीयः । माधुर्यादिगुणो-दयः = माधुर्यप्रभृतिगुणैर्युक्तः । वक्रतातिशयान्वितः = अतिशयवक्रता-संयुक्तः । अलङ्करणविन्यासः-अलंकारविशिष्टतया विन्यासः = रचना । क्रियते = विधीयते।

**वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।**

**स्पर्धया विद्यते यत्र यथास्वमुभयोरपि॥ ३५॥**

**अन्वयः**- यत्र वृत्यौचित्यमनोहारि रसानां परिपोषणम् उभयोः अपि यथास्वं स्पर्धया विद्यते।

**व्याख्या** - यत्र यस्मिन् - काव्ये । वृत्यौचित्यमनोहारि - वृत्तीनाम् = कैशिक्यादीनाम्। औचित्येन = उपयुक्ततया। मनोहारि = मनोरमम्। रसानाम् = शृङ्गारादीनाम्। परिपोषणम् = परिपुष्टिः। उभयोः = द्वयोः, शब्दार्थयोः। अपि । यथास्वं = यथानुरूपम् । स्पर्धया = न्यूनाधिक्यरहितसामान्येन । विद्यते = वर्तते सा रचना साहित्यमिति कथ्यते।

अनेन आचार्यः व्याकरणादिप्रतिपादितयोः शब्दार्थयोः एव उपर्युक्तकाव्यनुगुणविशेषणविशिष्ठयोः काव्यत्वं अङ्गीकृतवानिति।

**सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा।**

**पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते॥ ३६॥**

**अन्वयः** - तद्विदानन्दस्पन्दसुन्दरा कापि सा अवस्थितिः पदादिवाक्परिस्पन्दसारः साहित्यम्।

**व्याख्या** - तद्विदानन्दस्पन्दसुन्दरा - तस्य काव्यतत्त्वस्य विदाम् अभिज्ञानाम् आनन्दा = = आह्लादकारिणी स्पन्देन = स्वभावेन सुन्दरा = मनोरमा च या, तथाविधा। कापि = काचित्। अपूर्वावस्थितिः = अद्भुता स्थितिः। पदादिवाक्परिस्पन्दसारः - पदवाक्यप्रमाणादिवाचः = वाण्याः। परिस्पन्दानां = विलासानाम् सारभूतः। साहित्यं उच्यते = कथ्यते।

साहित्यस्य प्रयोजनम्

**वृत्ति - एतेषां च पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः। तथा चैतत्वमेवस्वरूपं गकारौकारविसर्जनीयात्मकमेतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्या-ख्यातपदार्थषट्लक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः। पदानां च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः। प्रमाणेन प्रत्यक्षादिनैतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम्। इदमेव परिस्पन्दमाहात्म्यात्सहृदयहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयु-ज्यमानता। एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यमन्येषां गुणीभावस्तथापि सकलवाक्परिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वत्रातिशयित्वम्। यस्मादेतदमुख्यतयापि यत्र वाक्य-सन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते तस्यैतदधिवासशून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति। तस्मादुपादेयतायाः परिहानिरुत्पद्यते। तथा च स्वप्रवृत्तिवैयर्थ्यप्रसङ्गः। शास्त्रातिरिक्तप्रयोजनत्वं शास्त्राभिधेयचतुर्वर्गाधिकफलत्वं चास्य पूर्वमेव प्रतिपादितम् (११३,५)**

**व्याख्या** - एतेषाम् = अमीषाम्। पदवाक्यप्रमाणसाहित्यानाम् = व्याकरणमीमांसान्यायशास्त्राणां साहित्यानाञ्च। चतुर्णाम् अपि। प्रतिवाक्यम् = प्रत्येकवाक्येषु। उपयोगः भवति। तथा च। एतत्पदम् = इदं पदम्। एवं स्वरूपम् =एवं रूपम्। गकारौकार-विसर्जनीयात्मकम्

गकारेण, औकारेण, विसर्गेण च युक्तम्। एतस्य = अस्य। अर्थस्य च प्रातिपदिकार्थपञ्चकलक्षणस्य प्रातिपदिकार्थम् = लिङ्गपरिमाणवचन-कारकं पञ्चकलक्षणस्य। आख्यातपदार्थषट्कलक्षणस्य प्रख्यातकर्तृ-कर्म- कालपुरुषवचनभावषट्कंख्यकलक्षणस्य वाचकम् पर्यायः। इति पदसंस्कारलक्षणस्य = व्याकरणशास्त्रस्य व्यापारः। पदानां च परस्परान्वयलक्षणस्य = अन्वयरूपस्य । सम्बन्धनिबन्धनम् = सम्बन्धकारणम्। एतत् इदम्। वाक्यार्थतात्पर्यम् = वाक्यार्थाशयः। इति वाक्यविचारलक्षणस्य वाक्यविचारनिरूणस्य। उपयोगः प्रमाणेन न्यायशास्त्रेण। प्रत्यक्षादिना प्रत्यक्षानुमानादिना। एतत् इदम्। उपपन्नम् सिद्धम् । इति युक्तत्वं नाम = उपाययुक्तता नाम । प्रमाणलक्षणस्य = प्रमाणरूपस्य । प्रयोजनम्, इदम् = एतदेव। परिस्पन्दमाहात्म्यात् = व्यापारमहत्त्वात्। सहृदयहृदयहारिताम् = सरसचित्तानन्दकारिताम्। प्रतिपन्नम् = सिद्धम्। इति साहित्यस्योपयुज्यमानता = उपयुक्तता। एतेषाम् पदवाक्यप्रमाणादीनाम्। यद्यपि प्रत्येकम् = एकमेकम्। स्वविषये = आत्मसम्बन्धे। प्राधान्यम् प्रधानता। अन्येषाम् = अन्यशास्त्राणाम्। गुणीभावः = गौणत्वम् । तथापि । सकलवाक्परिस्पन्दजीविताय-मानस्य- सकलवाचः समस्तवाग्विलासस्य यत् परिस्पन्दम् व्यापारः, तस्य जीवितायमानस्य प्राणभूतस्य। अस्य = एतस्य। साहित्यलक्षणस्य साहित्यरूपस्यैव। कविव्यापारस्य काव्यस्य । वस्तुतः यथार्थतः । सर्वत्रातिशयित्वम् अतिशयिता । यस्मात् यतः। एतत् = इदम् । अमुख्यतया अपि = सामान्यतयापि। यत्र वाक्ये। सन्दर्भान्तरे अपरव्याकरणादि-सन्दर्भे । स्वपरिमलमात्रेण - निजगन्धमात्रेणैव । संस्कारम् आरभते = प्रारभ्यते । तस्य = एतस्य । एतद् अधिवासशून्यतामात्रेण = निवासरिक्ततामात्रेणैव। रामणीयकविरहः = मनोरमतावियोगः । पर्यवस्यति = स्थास्यति । तस्मात् = यतः । उपादेयतायाः = उपयोगितायाः। परिहानिः- सर्वतो हानिः। उत्पद्यते = जायते । तथा च स्वप्रवृत्तिवैयर्थ्यं-प्रसङ्गः- वाक्यप्रवृत्तेः व्यर्थतायाः

प्रसंगः स्यात्। शास्त्रातिरिक्तप्रयोजनत्वम् = व्याकरण - मीमांसान्यायशास्त्राभिन्नप्रयोजनता। शास्त्राभिधेयचतुर्वर्गाधिक-फलत्वं - शास्त्रैः = धर्मादिशास्त्रैः अभिधेयम् = प्रतिपाद्यम् यत् चतुर्वर्गाधिकफलत्वम् = धर्मार्थकाममोक्षाधिकफलता च। अस्य = एतस्य साहित्यस्य। पूर्वम् = प्रथमम् एव। प्रतिपादितम् = समर्थितम् (१।३,५)।

**अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसम्पदा।**

**गीतवद्हृदयाह्लादं तद्विदां विदधाति यत्॥ ३७॥**

**अन्वयः** - अपर्यालोचिते अर्थे अपि बन्धसौन्दर्यसम्पदा तद्विदां यत् गीतवद् हृदयाह्लादं विदधाति।

**व्याख्या** - अपर्यालोचिते-पर्यालोचनरहिते, अपि अर्थे। बन्धसौन्दर्य सम्पदा-बन्धस्य = वाक्यविन्यासस्य या सौन्दर्यसम्पत् = लावण्यश्रीः, तया तद्विदाम् = तदभिज्ञानाम् यत्। गीतवद् = गीतसदृशम्। हृदयाह्लादम् = चित्तानन्दम्। विदधाति = करोति। अर्थावबोधविरहितमपि काव्यं शब्दार्थज्ञातॄणां हृदयाह्लादं जनयति

**वाच्यावबोधनिष्पत्तौ पदवाक्यार्थजितम्।**

**यत्किमप्यर्पयत्यन्तः पानकास्वादवत्सताम्॥ ३८॥**

**अन्वयः**-- वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितं पानकास्वादवत्सतां यत् किमपि अन्तः अर्पयति।

पदार्थज्ञानात् वाक्यर्थज्ञानात् वा अतिरिक्तं सहृदयानां हृदये आनन्दं अर्पयति

**व्याख्या** - वाच्यावबोधनिष्पत्तौ-वाच्यावबोधस्य = अर्थज्ञानस्य निष्पत्तौ = समाप्तौ। पदवाक्यार्थवर्जितम्-पदेन, वाक्येन, अर्थेन च वर्जितम् = रहितम्। पानकास्वादवत्सताम् -पानकस्य = रसस्यास्वादवत्सताम् यत् किमपि = यत्किञ्चिदपि। अन्तः = चेतः। अर्पयति = अर्पणं करोति।

**शरीरं जीवितेनेव स्फुरितेनेव जीवितम्।**

**विना निर्जीवतां येन वाक्यं याति विपश्चिताम्॥ ३९॥**

**अन्वयः** - जीवितेन विना शरीरम्, स्फुरितेन विना जीवितम् इव येन निर्जीवतां याति (तथा ) वाक्यं विपश्चितां याति।

**व्याख्या** - जीवितेन = प्राणेन विना। शरीरम् = देहम् इव। स्फुरितेन = स्पन्दनेन विना । जीवितम् = जीवनम् इव । निर्जीवताम् = निष्प्राणताम्। याति = गच्छति तथा येन विना वाक्यम्। विपश्चिताम् = व्यर्थताम् याति।

**यस्मात्किमपि सौभाग्यं तद्विदामेव गोचरम्।**
**सरस्वती समभ्येति तदिदानीं विचार्यते॥ ४०॥**

**अन्वयः**-- यस्मात् तद्विदाम् एव गोचरं किमपि सौभाग्यं सरस्वती समभ्येति, इदानीं तद् विचार्यते।

**व्याख्या** - यस्मात् = यस्मात्काव्यत्तत्त्वात्। तद्विदाम् = काव्यतत्त्वज्ञानाम् गोचरम् = दृष्टिपथम् । किमपि = अलौकिकम् । सौभाग्यम् = रमणीयताम्। सरस्वती = वाग्देवी। समभ्येति = याति। इदानीम् = साम्प्रतम्। तत् = तत्काव्यतत्त्वं साहित्यम्। विचार्यते = विविच्यते। एव।

*एवं साहिताविति व्याख्याय कविव्यापारवक्रत्वं व्याचष्टे -*

**कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्।**
**प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः॥। १८॥**

**अन्वयः** - कविव्यापारवक्रत्वप्रकाराः षट् सम्भवन्ति । तेषां प्रत्येकं बहवः भेदा विच्छित्तिशोभिनः (भवन्ति)।

काव्ये वक्रतायाः प्रकाराः षट्

**व्याख्या** - एवम् = इत्थम्। 'सहितौ' इति व्याख्याय = व्याख्यां कृत्वा। कविव्यापारवक्रत्वम् - कविव्यापारस्य = काव्यस्य, वक्रत्वम् = विचित्रताम्, वक्रतां वा। व्याचष्टे - कथयामि।

कविव्यापारवनत्वप्रकाराः = काव्यवक्रताभेदाः। षट् = षट्संख्याकाः, सम्भवन्ति = भवन्ति । तेषाम् - काव्यवक्रत्वभेदानाम्। प्रत्येकम् -

एकमेकम् । बहवः अनेके भेदाः = प्रकाराः । विच्छित्तिशोभिनः = वैचित्र्यभङ्गीभ्राजिष्णवः भवन्ति ।

**वृत्ति - व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकि वैचित्र्यं तस्य प्रकाराः प्रभेदाः षट् सम्भवन्ति । मुख्यतया तावन्त एव सम्भवन्तीत्यर्थः । तेषां प्रत्येकं प्रकाराः बहवो भेदविशेषाः कीदृशाः-विच्छित्तिशोभिनः वैचित्र्यभङ्गीभ्राजिष्णवः । सम्भवन्तीति सम्बन्धः । तदेव दर्शयति-**

**व्याख्या** - कवीनां व्यापारः कविव्यापारः काव्यक्रियालक्षणस्तस्य वक्रत्वम् = वक्रभावः । प्रसिद्धप्रस्थानव्यतिरेकि = प्रमुखप्रस्थानभिन्नम् । वैचित्र्यम् = अद्भुतत्वम् । तस्य =वक्रत्वस्य । प्रकाराः = भेदाः । षट्सम्भवन्ति । मुख्यतया = प्राधान्येन । तावन्तः एव सम्भवन्तीत्यर्थः । तेषां = भेदानाम् । प्रत्येकं प्रकाराः बहवः = अनेकाः भेदविशेषाः = विशेषभेदाः । कीदृशाः = कीदृग्विधाः भेदाः ? विच्छित्तिशोभिनः = वैचित्र्यभङ्गीभ्राजिष्णवः । सम्भवन्तीति सम्बन्धः । तदेव दर्शयति = प्रदर्शयति ।

**वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता ।**
**वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः ॥ १९**

**अन्वयः** - वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता परः अपि प्रत्ययाश्रया ।

**व्याख्या** - वर्णविन्यासवक्रत्वम् - अक्षरविन्यासवक्रता । पदपूर्वार्धवक्रता । वक्रतायाः परः = अन्यः अपि प्रकारः = भेदः । प्रत्ययाश्रयः = प्रत्ययाश्रितवक्रता भवति ।

**वृत्ति - वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं वक्रभावः प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः सन्निवेशविशेषविहितस्तद्विदाह्लादकारी शब्दशोभातिशयः । यथा-**

**व्याख्या** - वर्णानां विन्यासो वर्णविन्यासः अक्षराणां विशिष्टन्यसनं तस्य वक्रत्वं = वक्रभावः । प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येण उपनिबद्धः

सन्निवेशविशेषविहितः तद्विदाह्लादकारी = काव्यमर्मज्ञानन्दकारी । शब्दशोमातिशयः यथा-

**प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-**
**स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।**
**प्रसरति तत्तो ध्वान्तक्षोदक्षमः क्षणदामुखे**
**सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः॥ ४१॥**

**अन्वयः** - क्षणदामुखे प्रथमम् अरुणच्छायः ततः तावत् कनकप्रभः तदनु विरहोत्ताम्यस्तन्वीकपोलतलद्युतिः ततः सरसबिसिनीकन्दच्छेद-च्छविः घ्वान्तक्षोदक्षमः मृगलाञ्छनः प्रसरति।

**व्याख्या** - क्षणदामुखे = निशारम्भे । प्रथमम् = पूर्वम् । अरुणच्छायः--अरुणा = रक्तवर्णा छाया यस्य सः। ततः = तदनन्तरम्। तावत् कनकप्रभः = कनकस्य प्रभेव प्रभा यस्य सः = हेमकान्तः। तदनु तत्पश्चात्। विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः-विरहेण = प्रियवियोगेनोत्ताम्यती = व्याकुला या तन्वी = कृशाङ्गी, तस्याः कपोलवलस्य -गण्डस्थलस्य द्युतिरिव द्युतिः = कान्तिः यस्य सः। ततः = तदनु सरसबिसिनीकन्दच्छेदच्छविः-सरसविसिन्यः = सरसकमलिन्यः। कन्दच्छेदः = मूलोच्छेदः। तद्वदिव छविः = शोभा यस्य सः । ध्वान्तक्षोदक्षमः ध्वान्तस्य = अन्धकारस्य क्षोदे = विनाशे क्षमः = समर्थः। मृगलाञ्छनः = चन्द्रः। प्रसरति = प्रसारं करोति।

अत्र वर्णविन्यासवक्रतामात्रविहितः शब्दशोभातिशयः सुतरां समुन्मीलितः। एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्। अत्र च प्रभेद-स्वरूपनिरूपणं लक्षणावसरे करिष्यते ( २।१)

## Summarised Overview

कुन्तकाचार्यस्य वक्रोक्तिजीवितम् अलङ्कारग्रन्थो वर्तते। यथा कटकादयः शरीरस्य शोभातिशयं कुर्वन्ति तथा उपमादयः, गुणादयश्च। अतः शोभातिशयकारित्वरूपेण सामान्यधर्मेण लक्षणया उपमादयोऽप्यलङ्काराः कथ्यन्ते। एषां प्रतिपादकः सर्वोऽपि ग्रन्थोऽलङ्कारशब्देन व्यपदिश्यते। यथा भामहादीनां ग्रन्थस्य काव्यालङ्कारः वक्तुं शक्यते, किन्तु अन्येभ्यः अलङ्कारग्रन्थेभ्यो व्यावृत्तकं नाम वक्रोक्तिजीवितमेव वर्तते।

अत्र वक्रोक्तिजीवितस्याऽनुबन्धचतुष्टयं ज्ञातम्। प्रयोजनं लोकोत्तरचमत्कारजनकस्य वैचित्र्यस्य सिद्धिः वर्तते। काव्यस्य प्रयोजनं धर्मादिप्राप्तिः, व्यवहारज्ञानम्, अध्ययनसमये एव चमत्कारश्च काव्यस्य प्रयोजनानि सन्ति। तत्र चमत्कारः चरमं सर्वोत्तमं प्रयोजनं वर्तते। अस्य समक्षं धर्मादिलाभरूपं प्रयोजनं तुच्छं वर्तते, इदं हि प्रास्ताविकं गौणं प्रयोजनं वर्तते। एतदपि ज्ञातं यत् काव्यम् अमृतवद् मधुरं सदेव चमत्कारं जनयद् एव चाऽविवेकरूपं व्याधिनिहन्ति, शास्त्रं तु कटुकौषधवत् अविवेकगदस्य नाशकं भवति। काव्यं तत्त्वनिर्मितिलक्षणं भवति। इह स्वभावोक्तिः वक्रोक्तिश्च उभौ स्वीक्रियेते। एवं अत्र अलंकार्यालंकारविभागः काव्यस्य सामान्यं लक्षणं च पठितम्। अलंकार्यस्य अलंकारस्य च विभागः काल्पनिको वर्तते। अस्य विभागस्य प्रयोजनं काव्यस्वरूपस्य ज्ञापनं वर्तते। इदमप्यवगतं यत् सहृदयाह्लादके वक्रताविभूषिते च वाक्यविन्यासरूपे बन्धे विशेषेण निहितौ सहितौ (परस्परप्रतिस्पर्धिनी) शब्दार्थौ काव्यं भवतीति काव्यस्य सामान्यं लक्षणं ज्ञातम्। न केवलः शब्दः, नापि च केवलोऽर्थः, अपितु उभावेव काव्यं वर्तते। 'शब्दार्थौ' इत्यत्र द्विवचनेन शब्दत्वार्थत्वजातिद्वयं विवक्षितम्। शब्दार्थैरेकतरस्यापि साहित्यस्य विरहे काव्यत्वं यत् पूर्वप्रत्यक्षभूतार्थसदृशः प्रतिस्पर्धी अर्थो यदा न साक्षात्क्रियते तदा कवयोऽपूर्वार्थवर्णनेन काव्ये कामपि शोभां सम्पादयन्ति।

पाठे शब्दार्थयोः प्रसिद्धं काव्यसम्मतं च स्वरूपं निरूपितम्। वाचकत्वं वाच्यत्वं च शब्दार्थयोः प्रसिद्धं स्वरूपं वर्तते। काव्ये विवक्षितार्थमात्रबोधकत्वं शब्दस्य, सहृदयहृदयाह्लादकस्वभावसुन्दरत्वम् अर्थस्य स्वरूपं वर्तते। द्योतक-व्यञ्जकयोः वाचके, द्योत्य-व्यङ्ग्ययोश्च वाच्येऽन्तर्भावो विद्यते। ततः ग्रन्थकारेण काव्यविशेषलक्षणप्रसङ्गे वक्रोक्तेः साहित्यस्य च लक्षणं निरूपितमस्ति। अत्र प्रथमं शब्दार्थयोः स्वरूपविशेषस्य निरूपणानन्तरं वक्रोक्तेर्लक्षणं कृतमस्ति, शब्दार्थसाहित्यरूपकाव्यमलङ्कार्यं

भवति। वक्रोक्तिश्चालङ्कारो भवति। वक्रोक्तिश्च वैदग्ध्यभङ्गीभणितिरूपा भवति। प्राचीनैराचार्यैरङ्गीकृतं स्वभावोक्त्यलङ्कारं कुन्तकाचार्यः खण्डिवानस्ति। तत्र हेतुं चोक्तवान्। ततः साहित्यस्य महत्त्वं प्रतिपादितमस्ति। वैदग्ध्यभङ्गीभणितिरूपा वक्रोक्तिरेव शब्दार्थयोः अन्यूनानतिरिक्तत्वरूपस्य साहित्यस्य मूलमस्ति। इयं वक्रता एव कविव्यापारवक्रतारूपेणोक्ताऽस्ति। अस्याः वक्रतायाः षड्भेदाः निगदिता सन्ति- १. वर्णविन्यासवक्रता २. पदपूर्वार्धवक्रता ३. प्रत्ययवक्रता ४. वाक्यवक्रता ५. प्रकरणवक्रता ६. प्रबन्धवक्रता चेति। एतासु वक्रतासु वर्णविन्यास वक्रता प्राचीनानामनुप्रास एवास्ति। अस्याः अनेके भेदाः भवन्ति।

## Assignments

**I. एकेन वाक्येन द्वाभ्यां वा उत्तरयत -**

1. कुन्तकमतानुसारं काव्यसमान्यलक्षणं किम् ?
2. किं नाम वक्रोक्तिः?
3. किं नाम साहित्यम् ?
4. कुन्तकेन साहित्यपदस्य कोऽर्थः ?
5. शोभाशालिता इति पदस्य कोऽर्थः ?
6. अन्यूनातिरिक्तत्वं किमस्ति ?
7. पदवाक्यप्रमाणज्ञाः के ?
8. कानि पञ्च प्रातिपदिकानि ?
9. षड् आख्याताः के ?

**II. उत्तरयत -**

1. काव्यप्रयोजनानि विशदयत।
2. कुन्तकाभिमतं काव्यस्वरूपं निर्दिशत।
3. वक्रोक्तेः लक्षणं व्याख्यात।
4. वक्रोक्तिजीवितकारेण स्वभावोक्तेलङ्कारत्वं कथं निराकृतम्
5. साहित्यस्य लक्षणं लिखत।
6. साहित्यस्वरूपं कुन्तकोक्तदिशा सोदाहरणं प्रतिपादयत।

7. सहितौ इति पदं कुन्तकमतानुसारं व्याख्यात।

8. अलङ्काकार्यऽलङ्काकारविभागस्य प्रयोजनं निरुपयत।

9. सम्मिलतौ एव शब्दार्थौ काव्यं सोदाहरणं प्रतिपादयत।

10. शब्दार्थयोः स्वरूपं निरूपयत।

## Suggested Readings


1. *Vakroktijivitam* of Kuntaka, (ed) K.Krishnamurthy, Karnataka University, Dharwad, 1977
2. श्रीमद्राजानककुन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या डां. प्रज्ञा पाण्डेय (दीक्षित), चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020


## References


1. श्रीमद्राजानककुन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या श्रीपरमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022
2. *Vakroktijivitam* Mal Trans, Chattanatt Achutanunni, Vallathol Vidyapeetham Edappal, 2009


**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 2

# पदपूर्वार्धवक्रता भेदाश्च

## Learning Outcomes

- कुन्तकस्य साहित्यस्य महत्त्वं जानाति।
- पदपूर्वार्धवक्रतायाः भेदान् अवगच्छति।
- पदपूर्वार्धवक्रतायाः वैशिष्ट्यं जानाति।

## Background

अधीत एकके कुन्तकाचार्यविरचितं वक्रोक्तिजीविते प्रथमोन्मेषे काव्यप्रयोजनं काव्यलक्षणं साहित्यस्य स्वरूपं वक्रोक्तेः माहात्म्यं च अधीतम्। अपि तु कविव्यापारवक्रतायाः षड्भेदान् च पठितम्। अस्मिन् एकके पदपूर्वार्धवक्रतां अधिकृत्य अध्ययनं करिष्यामः। सुबन्तं तिङन्तं च पदं द्विविधं भवति। सुबन्तपदस्य पूर्वार्धं प्रातिपदिकं भवति। तिङन्तपदस्य च पूर्वार्धं धातुः भवति। कुन्तकाचार्येण पदपूर्वार्धवक्रतायाः नव भेदाः कृताः। तेषु सुबन्तपूर्वार्धवक्रतायाः अष्टौ भेदाः सन्ति। तिङन्तवक्रतायाः अपि भेदाः सन्ति। तत् पठामः।

## Keywords

सुबन्तं, तिङन्तं, रूढिवैचित्र्यवक्रता, संज्ञावैचित्र्यवक्रता, पर्यायवक्रता, उपचारवक्रता, विशेषणवक्रता, संवृतिवक्रता, वृत्तिवैचित्र्यवक्रता, लिङ्गवैचित्र्यवक्रता, क्रियावैचित्र्यवक्रता।

# Discussion

### पदपूर्वार्धवक्रता

ऋषीणां वचनम् अनुमानेन न बाध्यते

**पदपूर्वार्धवक्रता - पदस्य सुबन्तस्य तिङन्तस्य बा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता वक्रभावो विन्यासवैचित्र्यम्। तत्र च बहवः प्रकाराः सम्भवन्ति।**

**व्याख्या** - पदपूर्वार्धवक्रता - पदस्य = सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रता = वक्रभावः विन्यासवैचित्र्यम्। तत्र च बहवः प्रकाराः = भेदाः सम्भवन्ति = भवन्ति

रूढिवैचित्र्यवक्रता

**यत्र रूढिशब्दस्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तराध्यारोप-गर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथमः प्रकारः । यथा– रामोऽस्मि सर्वं सहे ॥ ४२ ॥**

**व्याख्या** - यत्र – यत्र स्थाने । रूढिशब्दस्य = रूढिवाचकस्य एव । प्रस्तावसमुचितत्वेन = प्रकरणानुकूलत्वेन। वाच्यप्रसिद्धधर्मान्तरा-ध्यारोपगर्भत्वेन - अर्थरूपप्रसिद्धधर्मात् अतिरिक्ताध्यारोपणस्याधारेण। निबन्धः सः पदपूर्वार्धवक्रतायाः प्रथमः = आदिमः प्रकारः = भेदः। यथा - 'रामोऽस्मि सर्वं सहे' - अहं रामः अस्मि, अतः सर्वम् = सर्वंदुःखं सहे = सहनं करिष्यामीति।

**द्वितीयः- यत्र संज्ञाशब्दस्य वाच्यप्रसिद्धधर्मस्य लोकोत्तरातिशयाध्यारोपं गर्भीकृत्योपनिबन्धनः। यथा -**

**व्याख्या** - द्वितीयः = अपरः। पदपूर्वार्धवक्रतायाः भेदः। यत्र स्थाने संज्ञाशब्दस्य = संज्ञावाचकस्य वाच्यप्रसिद्धधर्मस्य = अर्थप्रख्यात-धर्मस्य। लोकोत्तरातिशयारोपम् = अलौकिकातिशयाध्यारोपम्। गर्भीकृत्य = आधारं कृत्वा। उपनिबन्धनः भवति।

**यथा -**

**रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-**

**मस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्।**

**वन्दीवैष यशांसि गायति मरुद्यस्यैकबाणाहति-**

**श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ ४३ ॥**

संज्ञावैचित्र्यवक्रता

**अन्वयः** - असौ रामः भुवनेषु विक्रमगुणैः परां प्रसिद्धिं प्राप्तः यदि अस्मद्भाग्यविपर्ययात् तं परं देवः न जानाति । वन्दी इव एष यस्य एकबाणाहतिश्रेणीभूतविशालतालविवेरोद्गीर्णैः सप्तभिः स्वरैः मरुद् यशांसि गायति ।

**व्याख्या** - असौ = सः । रामः = रामचन्दः । भुवनेषु = लोकेषु । विक्रमगुणैः = पराक्रमैः । पराम् = विशिष्टाम् । प्रसिद्धिम् = विख्यातिम् । प्राप्तः = गतः । यदि = चेत् । अस्मद् भाग्यविपर्ययात् = अस्मद् भाग्यवैपरीत्यात् । तम् = रामम् । परम् = विशिष्टम् । देवः = स्वामी । न जानाति = नैव वेत्ति । वन्दी इव = वन्दीसमः । एषः = अयम् । यस्य एकबाणाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः- एकेन = अद्वितीयेन बाणाहतिः = शरेण विद्धाः, तथाविधानाम् । श्रेणीभूतानाम् = पंक्तिबद्धानाम् विशालसालानां बृहत्तालवृक्षाणाम्, विवराणि = विलानि तेभ्यः उद्गीर्णैः = निःसृतैः । सप्तभिः स्वरैः = सप्तध्वनिभिः । मरुद् = पवनः । यशांसि = कीर्तीः । गायति = गायनं करोति ।

**अत्र रामशब्दो लोकोत्तरशैर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति ।**

रामशब्दः लोकोत्तरशैर्यादि धर्मातिशयाध्यारोपपर त्वेन संज्ञावैचित्र्यवक्रतां प्रमाणयति

**व्याख्या** - अत्र = अस्मिन् श्लोके । रामशब्दः लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्त्वे - लोकोत्तरस्य = अलौकिकस्य । शौर्यादिधर्मातिशयस्य = शौर्यादिगुणातिशयस्याध्यारोपत्वेन = अध्यारोपणहेतुना । उपात्तः = प्राप्तः । वक्रताम् = विचित्रताम् । प्रथयति = प्रमाणयति ।

**पर्यायवक्रत्वं प्रकारान्तरं पदपूर्वार्धवक्रतायाः- यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते ।**

पर्यायवक्रता

**व्याख्या** - पर्यायवक्रत्वम् = पदपूर्वार्धवक्रतायाः तृतीयः भेदः। प्रकारान्तरम्= अन्यप्रकारेण। पदपूर्वार्धवक्रतायाः - यत्र अनेक-शब्दाभिधेयत्वे = बहुशब्दाभिधेयताम्। वस्तुनः = पदार्थस्य। किमपि पर्यायपदम् = पर्यायम्। प्रस्तुतानुगुणत्वेन = प्रकरणानुकूलगुणतया प्रयुज्यते = प्रयोगो विधीयते।

**यथा -**

**वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनं**
**मध्यं क्षाममकाण्ड एव विपुलाभोगा नितम्बस्थली।**
**सद्यःप्रोद्गतविस्मयैरिति गणैरालोक्यमानं मुहुः**
**पायाद्वः प्रथमं वपुः स्मररिपोर्मिश्रीभवत्कान्तया॥ ४४॥**

**अन्वयः**- क ज्जलवद् वामं विलोचनं रोहद्विसारिस्तनम् उरः अकाण्ड एव क्षामं मध्यं विपुलाभोगा नितम्बस्थली सद्यः प्रोद्गतविस्मयैः इति गणैः मुहुः आलोक्यमानं मिश्रीभवत्कान्तया स्मररिपोः वपुः प्रथमं वः पायात्।

**व्याख्या** - कज्जलवद्वामं विलोचनम् = कज्जलसमकृष्णं वामनयनम्। रोहद्विसारिस्तनम् - रोहिते विकसिते विसारिस्तने = विशालपयोधरौ यस्य तम्। अकाण्डे = अनायासे एव क्षामम् = क्षीणम्। मध्यम् = कटिभागम्। विपुलाभोगा = विशाला। नितम्बस्थली = नितम्बप्रदेशः। सद्यः = तत्क्षणम्। प्रोद्गतविस्मयैः = उत्पन्नाश्चर्यैः इति गणैः = शिवगणैः। मुहुः = वारं वारम्। आलोक्यमानम् = विलोक्यमानम्। मिश्रीभवत्कान्तया = मिश्रितभवत्पार्वत्या। स्मररिपोः मदनशत्रोः शिवस्य। वपुः = शरीरम्। प्रथमम् = पूर्वम्। वः युष्मान्। पायात् = रक्षेत्।

**वृत्ति - अत्र 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति। यस्मात्कामशत्रोः कान्तया मिश्रीभावः शरीरस्य न कथञ्चिदपि सम्भाव्यत इति गणानां सद्यःप्रोद्गतविस्मयत्वमुपपन्नम्। सोऽपि पुनः पुनः परिशीलनेनाश्चर्यकारीति 'प्रथम' पदस्य जीवितम्।**

**व्याख्या** - अथ = अस्मिन् श्लोके । 'स्मररिपोः' इति पर्यायः = समानार्थसूचकः, शब्दः । कामपि = अद्भुताम् । वक्रताम् उन्मीलयति = प्रकटयति । यस्मात् = यतः । कामशत्रोः = शङ्करस्य । कान्तया = पत्न्या पार्वत्या । मिश्रीभावः = मिश्रणत्वम् । शरीरस्य = देहस्य । न कथञ्चिदपि = न केनापि प्रकारेण । सम्भाव्यते = सम्भावना क्रियते । इति गणानाम् = रौद्रादीनाम् । सद्यः प्रोद्गतविस्मयत्वम् = तत्क्षणमुत्पन्न विस्मयत्वम् । उपपन्नम् = सिद्धम् । सोऽपि = असावपि । पुनः पुनः = भूयो भूयः । परिशीलनेन = विवेचनेन । आश्चर्यकारी = आश्चर्योत्पादकः इति प्रथमपदस्य जीवितम् = प्राणभूतम् ।

स्मररिपोः इति पदस्य प्रयोगः पर्यायवक्रतां उन्मीलयति

**वृत्ति - एतच्च पर्यायवक्रत्वं वाच्यासम्भविधर्मान्तरगर्भीकरणेनापि दृश्यते ।**

**व्याख्या** - च = तथा । एतत् = इदम् । पर्यायवक्रत्वम् = पर्यायवक्रता । वाच्यासम्भविधर्मान्तरगर्भीकरणेन = असम्भवान्यधर्मधारणेनापि । दृश्यते = अवलोक्यते ।

**अङ्गराज ! सेनापते ! राजवल्लभ ! रक्षैनं भीमाद् दुःशासनम् इति ।**

**व्याख्या** - अङ्गराजेति । हे अङ्गराज = हे अंगदेशाधिपते ! सेनापते = चमूपते ! राजवल्लभ = दुर्योधनप्रिय ! एनम् = अमुम् । दुःशासनम् = दुर्योधनानुजम् । भीमात् = भीमसेनात् । रक्ष = पाहि ।

त्रिषु सम्बोधनेषु वाच्यार्थः कर्णः अस्ति, अनेकपदपर्यायप्रयोगे ण वक्रता समायाति

**अत्र त्रयाणामपि पर्यायाणामसम्भाव्यमानतत्परित्राणपात्रत्वलक्षण - मकिञ्चित्करत्वं गर्भीकृत्योपहस्यते - रक्षैनमिति ।**

**व्याख्या** - अत्र = अस्मिन् उदाहरणे । त्रयाणामपि = अङ्गराजादित्रयाणामपि । पर्यायाणाम् = पर्यायशब्दानाम् । असम्भाव्यमानतत्परित्राणपात्रत्वलक्षणम् = असम्भावितं तस्य = कर्णस्य पात्रत्वलक्षणम् = पात्रत्वस्वरूपम्, रक्षाकरत्वरूपम् । अकिञ्चित्करत्वम् = बहुकरणत्वम् । गर्भीकृत्य = आधारं कृत्वा ।

उपहस्यते = उपहासः क्रियते। एनम् = अमुम् दुःशासनमिति। रक्ष = पाहि।

**वृत्ति - पदपूर्वार्धवक्रताया उपचारवक्रत्वं नाम प्रकारान्तरं विद्यते - यत्रामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात्।**

उपचारवैचित्र्यवक्रता

**व्याख्या** - पदपूर्वार्धवक्रतायाः = तन्नामवक्रतायाः। उपचारवक्रत्वं नाम = उपचारवक्रतासंज्ञकम्। प्रकारान्तरम् = अन्यभेदः। विद्यते = वर्तते। यत्र = यस्मिन् स्थाने। अमूर्तवस्तुनः = अमूर्तपदार्थस्य। मूर्तद्रव्याभिधायिना = मूर्तवस्त्वभिधानकारिणा शब्देन उपचारात् = सादृश्यबलात्। अभिधानम् = कथनम्।

**यथा -**

**निष्कारणं निकारकणिकापि मनस्विनां मानसमायासयति। यथा - हस्तापचेयं यशः॥ ४५॥**

**व्याख्या** - निष्कारणम् = अकारणम्। निकारकणिकापि निकारस्य = महाहानेः कणिका = स्वल्पम् अपि। मनस्विनाम् = महापुरुषाणाम्। मानसम् = चेतः। आयासयति = पीडयति। यथा -

**वृत्ति - 'कणिका' शब्दो मूर्तवस्तुस्तोकार्थाभिधायी स्तोकत्वसामान्योपचारादमूर्तस्यापि निकारस्य स्तोकाभिधानपरत्वेन प्रयुक्तारतद्विदाह्लादकारित्वाद्वक्रतां पुष्णाति। 'हस्तापचेयम्' इति मूर्तपुष्पादिवस्तुसम्भाविसंहतत्वसामान्योपचारादमूर्तस्यापि यशसो हस्तापचेयमित्यभिधानं वक्रत्वमावहति।**

**व्याख्या** - कणिकाशब्दः = 'कणिका' इति शब्दः। मूर्तवस्तुस्तोकार्थाभिधायी = मूर्तद्रव्यस्याल्पाभिधानकारकः। स्तोकत्वसामान्योपचारात् = अल्पत्वसाधारणेनोपचारात् = सादृश्यात्। अमूर्तस्यापि निकारस्य = मानहानेः। स्तोकाभिधानपरत्वेन = अल्पकथनपरत्वेन। प्रयुक्तः = प्रयोगे कृतः। तद्विदाह्लादकारित्वात्-तद्विदाम् = काव्यतत्त्वज्ञानामाह्लादकारित्वात् = आनन्ददायित्वात्। वक्रताम् =

विचित्रताम्। पुष्णाति = पुष्टिं करोति। 'हस्तापचेयम्' इति मूर्तपुष्पादि वस्तुसम्भाविसंहतत्वसामान्योपचारात् = मूर्तपुष्पादिवस्तुषु सम्भावि = प्राप्यः संहतत्वस्य सामान्ये = साधारणबले उपचारात् = साद्दश्यात्। अमूर्तस्यापि यशसः = कीर्त्तेः। 'हस्तापचेयम्' इति अभिधानम् = कथनम्। वक्रत्वम् = विचित्रताम्! आवहति = धारयति।

**वृत्ति - द्रवरूपस्य वस्तुनो वाचकशब्दस्तरङ्गितत्वादिधर्मनिबन्धनः किमपि साद्दश्यमात्रमवलम्ब्य संहतस्यापि वाचकत्वेन प्रयुज्यमानः कविप्रवाहे प्रसिद्धः। यथा - श्वासोत्कम्पतरङ्गिणि स्तनतटे इति॥ ४६॥**

**द्रवरूपस्य वस्तुनो वाचकशब्दोपचारेण वक्रता**

वृत्ति - द्रवरूपस्य = द्रवलक्षणस्य। वस्तुनः = पदार्थस्य। वाचकशब्दः तरङ्गितत्वादिधर्मनिबन्धनः = तरङ्गितत्वादिधर्मप्रतिपादकः। किमपि साद्दश्यमात्रम् = उपचारमात्रम्। अवलम्ब्य = आश्रित्य। संहतस्य = एकत्रितस्यापि। वाचकत्वेन = वाचकतया। प्रयुज्यमानः कविप्रवाहे = कविसमुदाये। प्रसिद्धः = प्रख्यातः।

यथा - श्वासोत्कम्पतरङ्गिणि- श्वासैः = श्वसनैः उत्कम्पेन तरङ्गि = तरङ्गयुक्तम् यत्, तस्मिन् स्तनतटे = पयोधररूपरोधसि इति।

**क्वचिदमूर्तस्यापि द्रवरूपार्थाभिधायी वाचकत्वेन प्रयुज्यते। यथा -**

**एकां कामपि कालविप्रुषममी शौर्योष्मकण्डूव्यय-**
**व्यग्राः स्युश्चिरविस्मृतामरचमूडिम्बाहवा बाहवः॥ ४७॥**

**अन्वयः** - चिरविस्मृतामरचमूडिम्बाहवा अमी बाहवः काम् अपि एकां कालविप्रुषं शौर्योष्मकण्डूव्ययव्यग्राः स्युः।

**व्याख्या** - चिरविस्मृतामरचमूडिम्बाहवा - चिरात् = चिरकालात् विस्मृतानाममराणाम् = सुराणाम् या चमू = सेना, तस्याः डिम्बाहवाः = युद्धवीराः। अमी = एताः। बाहवः = भुजाः। कामपि = विचित्राम्। एकाम् = अद्वितीयाम्। कालविप्रुषम् = समयबिन्दुम्। शौर्योष्मकण्डूव्ययव्यग्राः - शौर्यस्य = पराक्रमरूपस्योष्मायाः =

उष्णतायाः कण्डू तस्याः व्यये = क्षीणे व्यग्राः = व्यापृताः । स्युः = भवेयुः।

**वृत्ति - एतयोस्तरङ्गिणीति विप्रुषमिति च वक्रतामावहतः।**

**वृत्ति - विशेषणवक्रत्वं नाम पदपूर्वार्धवक्रतायाः प्रकारो विद्यते - यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते।**

विशेषणवक्रता

व्याख्या - विशेषणवक्रत्वम् = पूर्वार्धवक्रतायाः पञ्चमभेदं विशेषणवक्रत्वम् नाम। प्रकारः = भेदः विद्यते। यत्र = यस्मिन् स्थाने। विशेषणमाहात्म्यात् एव = विशेषणमहत्त्वादेव । तद्विदाह्लादकारित्व-लक्षणम् - तद्विदाम् = काव्यतत्त्वज्ञानाम् आह्लादकारित्वलक्षणम् = आनन्दकारितारूपम् । वक्रत्वम् = विचित्रताम् । अभिव्यज्यते = प्रकटयति।

**यथा -**

> **दाहोऽम्भः प्रसृतिपचः प्रचयवान् बाष्पः प्रणालोचितः**
> **श्वासाः प्रेङ्खितदीप्रदीपलतिकाः पाण्डिम्नि मग्नं वपुः।**
> **किञ्चान्यत्कथयामि रात्रिमखिलां त्वन्मार्गवातायने**
> **हस्तच्छत्त्रनिरुद्ध चन्द्रमहसस्तस्याः स्थितिर्वर्तते॥ ४८॥**

**अन्वयः** - दाहः अम्भःप्रसृतिपचः, बाष्पः प्रचयवान् प्रणालोचितः, श्वासाः प्रेङ्खितदीप्रदीपलतिकाः, वपुः पाण्डिम्नि मग्नम्, अन्यत् किं च कथयामि, अखिलां रात्रिं स्वन्मार्गवातायने हस्तच्छत्रनिरुद्धचन्द्रमहसः तस्याः स्थितिः वर्तते।

**व्याख्या** - दाहः = विरहानलः। अम्भःप्रसृतिपचः- अम्भसः = जलस्य प्रसृतिं = प्रसारम् पचतीति तत् तथाविधम्। बाष्पः = नयनाम्बु। प्रचयवान् = एकत्रितम्। प्रणालोचितः = प्रणालप्रवाहयोग्यः। श्वासाः प्रेङ्खितदीप्रदीपलतिकाः- प्रेङ्खितदीप्रस्य = प्रज्वलितदीपकस्य या दीपलतिकाः = दीपशिखास्ताः । वपुः = शरीरम् । पाण्डिम्नि = पाण्डुतायाम् मग्नं लीनम्। अन्यत् = अपरम्। किं कथयामि = किं

वर्णयामि। अखिलाम् = सम्पूर्णाम्। रात्रिम् = निशाम्। त्वन्मार्गवातायने = तव मार्गगवाक्षे । हस्तच्छत्रनिरुद्धचन्द्रमहसः- हस्तरूपछत्रे = करच्छत्रोपरिनिरुद्धम् = अवरुद्धम्। चन्द्रमहः = ज्योत्स्ना यया तस्याः। तस्याः नायिकायाः। स्थितिः = दशा। वर्तते = विद्यते।

**अत्र दाहो बाष्पः श्वासा वपुरिति न किञ्चिद्वैचित्र्यमुन्मीलितम्। प्रत्येकं विशेषणमाहात्म्यात्पुनः काचिदेव वक्रताप्रतीतिः।**

**यथा च -**

**व्रीडायोगान्नतवदनया सन्निधाने गुरूणां**
**बद्धोत्कम्पस्तनकलशया मन्युमन्तर्नियम्य।**
**तिष्ठेत्युक्तं किमिव न तया यत्समुत्सृज्य बाष्पं**
**मय्यासक्तश्चकितहरिणीहारिनेत्रत्रिभागः॥ ४९॥**

**अन्वयः** - गुरूणां सन्निधाने व्रीडायोगात् नतवदनया, बद्धोत्कम्पस्तन-कलशया तया मन्युम् अन्तर्नियम्य यत् बाष्पं समुत्सृत्य, चकितहरिणीहारिनेत्रत्रिभागः मयि आसक्तः ( तत् ) किमिव तिष्ठेति न उक्तम्।

**व्याख्या** - गुरूणां = गुरुजनानां, पूज्यानां पित्रादीनाम्। सन्निधाने = निकटे। व्रीडायोगात् = लज्जाकारणात्। नतवदनया = नम्राननया। बद्धोत्कम्पस्तनकलशया = कम्पमानकुचकुम्भया। तया = नायिकया। मन्युम् = शोकम्। अन्तर्नियम्य चेतसि निरुद्ध्य। यत् बाष्पं = अश्रूणि। समुत्सृज्य = विमुच्य । चकितहरिणीहारिनेत्रत्रिभागः = चकिता मृगीवच्चञ्चलचक्षुकोणः । मय्यासक्तः = मयि क्षिप्तः । तत्, किम् इव तिष्ठेति = गति निर्वर्तय इति न उक्तम्? उक्तमेवेति काक्वा व्यज्यते।

**वृत्ति - अत्र चकितहरिणोहारीति क्रियाविशेषणनेत्रत्रिभागासङ्गस्य गुरुसन्निधानविहिताप्रगल्भत्वरमणीयस्य कामपि कमनीयतामावहति चकितहरिणीहारिविलोचनसाम्येन।**

**व्याख्या** - अत्र = अस्मिन् स्थाने। 'चकितहरिणीहारी'ति क्रियाविशेषणस्य नेत्रत्रिभागासङ्गस्य = नयनसदृशकटाक्षस्य। गुरुसन्निधानविहिता- प्रगल्भत्वरमणीयस्य -गुरुसन्निधाने = गुरुजन-निकटे। विहितस्य = कृतस्याप्रगल्भत्वरमणीयस्य = अप्रगल्भत्व-मनोरमस्य। कामपि = विचित्राम् । कमनीयताम् = लावण्यताम्। आवहति = धारयति। चकितहरिणीहारिविलोचनसामान्येन = चञ्चलहरिणीमनोरमनयन- साधारणेन।

**वृत्ति - अयमपरः पदपूर्वार्धवक्रतायाः प्रकारो यदिदं संवृतिवक्रत्वं नाम - यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते।**

संवृतिवक्रता

**व्याख्या** - अयम् = एषः । अपरः = अन्यः । पदपूर्वार्धवक्रतायाः = तन्नामवक्रतायाः । प्रकारः = भेदः । यद् इदम् = एतत् । संवृतिवक्रत्वं नाम = संवृत्ति-वक्रताख्यम् । यत्र यस्मिन् स्थाने । पदार्थस्वरूपम् = पदार्थलक्षणम्। प्रस्तावानुगुण्येन = प्रकरणानुकूलेन। केनापि निकर्षेण = अवनतया। वा = अथवा। उत्कर्षेण = उन्नतया। युक्तम् = संयुक्तम्। व्यक्ततया = प्रकटतया । साक्षात् = प्रत्यक्षम् । अभिधातुम् = कथयितुम्। अशक्यम् = असमर्थम्। संवृत्तिसामर्थ्योपयोगिना-संवृति-सामर्थ्येन उपयोगिना = उपयुक्तेन। शब्देनाभिधीयते = कथ्यते।

**यथा -**

**सोऽयं दम्भधृतवृतः प्रियतमे कर्तुं किमप्युद्यतः ॥ ५० ॥**

**व्याख्या** - प्रियतमे = हे प्रेयसि ! सः = असौ । अयम् = एषः । दम्मधृतवृतः - दम्भेन = एकपत्नीत्वेन। धृतवृतः = कृतसङ्कल्पः । किमपि = किञ्चित्। कर्तुम् = विधातुम्। उद्यतः = तत्परः।

**वृत्ति - अत्र वत्सराजो वासवदत्ताविपत्तिविधुरहृदयस्तत्प्राप्तिप्रलोभन-वशेन पद्मावतीं परिणेतुमीहमानस्तदेवाकरणीयमित्यवगच्छन् तस्य**

**वस्तुनो महापातकस्येवाकीर्तनीयतां ख्यापयति किमपीत्यनेन संवरणसमर्थेन सर्वनामपदेन। यथा च -**

**व्याख्या-** अत्र = अस्मिन् श्लोके। वत्सराजः उदयनः । वासवदत्ता-विपत्तिविधुरहृदयः- वासवदत्तायाः, विपत्तेः = विपदः, विधुरः- आकुलितः हृदयः = चेतो यस्य सः । तत्प्राप्तिप्रलोभनवशेन - तत् = तस्याः वासवदत्ताः प्राप्तिः = उपलब्धिस्तस्याः लोभनवशेन = प्रलोभनेन। पद्मावतीम् = पद्मावतीनायिकाम् । परिणेतुम् = विवाहं कर्तुम्। ईहमानः = इच्छुकः। तदेव = पद्मावतीपरिणयमेव अकरणीयम् - अकार्यम्। इति = एवम्। अवगच्छन् = अभिजानन्। तस्य वस्तुनः = पद्मावतीपरिणयस्य । महापातकस्य = महापापस्येव। अकीर्त्तनीयताम् = निन्दनीयताम् । ख्यापयति = प्रख्यापयति । किमपि इति अनेन = एतेन। संवरणसमर्थेन = संवरणशक्त्या। सर्वनामपदेन।

**यथा च -**

**निद्रानिमीलितदृशो मदमन्थराया**
**नाप्यर्थवन्ति न च यानि निरर्थकानि।**
**अद्यापि मे वरतनोर्मधुराणि तस्या-**
**स्तान्यक्षराणि हृदये किमपि ध्वनन्ति॥ ५१॥**

**अन्वयः** - निद्रानिमीलितदृशः मदमन्थरायाः वरतनोः तस्याः तानि मधुराणि अक्षराणि अद्यापि मे हृदये किमपि ध्वनन्ति यानि नापि अर्थवन्ति न च निरर्थकानि।

**व्याख्या** - निद्रानिमीलितदृशः- निद्राया निमीलितौ = मीलितौ। दृशौ = चक्षुषी यस्यास्तस्याः । मदमन्थरायाः = मदालसायाः । वरतनोः = सुन्दर्याः । तस्याः तानि = उक्तानि । मधुराणि = इष्टानि अक्षराणि । अद्यापि = सम्प्रत्यपि। मे = मम। हृदये = चेतसि। किमपि = किञ्चित्। ध्वनन्ति = ध्वनिं कुर्वन्ति। यानि नापि अर्थवन्ति = नैवार्थयुक्तानि। न च, निरर्थकानि = अर्थहीनानि सन्ति।

**वृत्ति - अत्र किमपीति तदाकर्णनविहितायाश्चित्तचमत्कृतेरनुभवैक गोचरत्वलक्षणमव्यपदेश्यत्वं प्रतिपाद्यते। तानीति तथाविधानुभव-विशिष्टतया स्मर्यमाणानि। नाप्यर्थवन्तीति स्वसंवेद्यत्वेन व्यपदेशा-विषयत्वं प्रकाश्यते। तेषां च न च यानि निरर्थकानीत्यलौकिक चमत्कारकारित्वादपार्थकत्वं निवार्यते। त्रिष्वप्येतेषु विशेणवक्रत्वं प्रतीयते।**

**व्याख्या** - अत्र = अस्मिन् उदाहरणे। 'किमपि' इति तदाकर्णनविहितायाः तत् = तेषां मधुराक्षराणाम् आकर्णने = श्रवणे विहितायाः = कृतायाः । चित्तचमत्कृतेः = मानसचमत्कारस्य । अनुभवैकगोचरत्वलक्षणम्-केवलमनुभवप्राप्तिरूपम्। अव्यपदेश्यत्वम् = अनिर्वचनीयत्वम्। प्रतिपाद्यते = समर्थ्यते। तानीति तथाविधानुभवविशिष्टतया = तादृगनुभववैशिष्ट्येन। स्मर्यमाणानि = स्मरणयोग्यानि। 'नापि अर्थवन्ति' इति स्वसंवेद्यत्वेन = आत्मसंवेद्यतया। व्यपदेशाविषयत्वम् - व्यपदेशस्य = शब्दाभिव्यक्तेः अविषयत्वम् = असमर्थत्वम्। प्रकाश्यते = प्रकाशनं क्रियते। तेषाम् = अक्षराणाम् च, न च यानि, निरर्थकानि = अर्थहीनानि । इति अलौकिकचमत्कारकारित्वात् = अद्भुतचमत्कारकारितया। अपदार्थकत्वम् = अर्थहीनत्वम्। निवार्यते = निषिध्यते। एतेषु = अमीषु। त्रिषु अपि विशेषणवक्रत्वम् - विशेषणवक्रता। प्रतीयते = ज्ञायते।

**वृत्तिवैचित्र्यवक्रता**

**इदमपरं पदपूर्वार्धवक्रतायाः प्रकारान्तरं सम्भवति वृत्तिवैचित्र्यवक्रत्वं नाम- यत्र समासादितवृत्तीनां कासाञ्चिद् विचित्राणामेव कविभिः परिग्रहः क्रियते।**

**व्याख्या** - इदम् = एतत् । अपरम् = अन्यत्, सप्तमम् । पदपूर्वार्धवक्रतायाः = तन्नामवक्रतायाः। प्रकारान्तरम् = भेदापरम्। सम्भवति = भवति। वृत्तिवैचित्र्यवक्रत्वं नाम = वृत्तिवैचित्र्यवक्रताभिधम्। यत्र = यस्मिन् स्थले। समासादितवृत्तीनाम्

= समास-सुबन्ततिङन्तादिवृत्तीनाम् । कासाञ्चित् = कतिपयानाम् । विचित्राणाम् = अद्भुतानाम् एव । कविभिः = कविजनैः । परिग्रहः प्रयोगः । क्रियते = विधीयते ।

**यथा - मध्येऽङ्कुरं पल्लवाः ॥ ५२ ॥**

**व्याख्या** - मध्येऽङ्कुरम् = अङ्कुराणां मध्य इति, तत् । पल्लवाः = किसलयाः ।

**यथा - पाण्डिम्नि मग्नं वपुः ॥ ५३ ॥**

**व्याख्या** - यथा च - पाण्डिम्नि = पाण्डुरतायाम् । वपुः = शरीरम् । मग्नम् = निमग्नम् ।

**यथा वा -**

**सुधाविसरनिष्यन्दसमुल्लासविधायिनि ।**
**हिमधामनि खण्डेऽपि न जनो नोन्मनायते ॥ ५५ ॥**

**व्याख्या-** सुधाविसरनिष्यन्दसमुल्लासविधायिनि - सुधाविसरस्य = अमृतधारायाः निष्यन्देन = प्रवाहेण समुल्लासम् = आनन्दम्, विदधाति = करोति यस्तादृशि । हिमधामनि - चन्द्रमसि । खण्डे = शकले अपि उदितेऽपि । जनः = नरः । न = नाऽस्ति । यः न उन्मनायते = उत्कण्ठितो न भवतीति ।

**वृत्ति - अपरं लिङ्गवैचित्र्यं नाम पदपूर्वार्धवक्रतायाः प्रकारान्तरं दृश्यते - यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय समानाधिकरण्योपनिबन्धः ।**

लिङ्गवैचित्र्यवक्रता

**व्याख्या** - अपरमिति । पदपूर्वार्धवक्रतायाः लिङ्गवैचित्र्यं नाम = लिङ्गवैचित्र्यसंज्ञकम् । अपरम् = अन्यत् अष्टमम् । प्रकारान्तरम् = भेदान्तरम् । दृश्यते = अवलोक्यते । यत्र भिन्नलिङ्गानाम् अपि = विभिन्नलिङ्गानाम् अपि । शब्दानाम् = वाच्यानाम् । वैचित्र्याय = विचित्रतायै । समानाधिकरण्योपनिबन्धः = समानाधिकारितया उपनिबन्धनं क्रियते, तत्र लिङ्गवैवित्र्यवक्रता ।

**यथा -**

**इत्थं जडे जगति को नु बृहत्प्रमाण-**

**कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्॥ ५५॥**

**अन्वयः** - इत्थं जडे जगति बृहत्प्रमाणकर्णः करी कः नु ध्वनितस्य पात्रं ननु भवेत्।

**व्याख्या** - इत्थम् = अनेन प्रकारेण। जडे जगति = जडसंसारे। बृहत्प्रमाणकर्णः = विशालप्रमाणश्रवणः। करी = हस्ती। कः नु = निश्चयेन। ध्वनितस्य = ध्वनिश्रवणस्य। पात्रम् = अर्हः। ननु भवेत्।

दाराः इति पदेन लिङ्गवैचित्र्यवक्रता

**यथा च - मैथिली तस्य दाराः। इति॥ ५६॥**

**व्याख्या** - मैथिली = मिथिलेशनन्दनी सीता। तस्य = रामस्य। दाराः = पत्नी।

**वृत्ति - अन्यदपि लिङ्गवैचित्र्यवक्रत्वम् - यत्रानेकलिङ्गसम्भवेऽपि सौकुमार्यात् कविभिः स्त्रीलिङ्गमेव प्रयुज्यते, 'नामैव स्त्रीति पेशलम्' (२।२२) इति कृत्वा।**

**व्याख्या** - अन्यत् = अपरम् अपि। लिङ्गवैचित्र्यवक्रत्वम् = लिङ्गवैचित्र्यवक्रतायाः उदाहरणम्। एत्र अनेकलिङ्गसम्भवेऽपि = बहुलिङ्गजातेऽपि। सौकुमार्यात् = सुकुमारतया कविभिः सूरिभिः। स्त्रीलिङ्गमेव प्रयुज्यते = प्रयोगः क्रियते। 'नामैव स्त्रीति पेशलम्' इति कृत्वा = विधाय।

**यथा -**

**एतां पश्य पुरस्तटीम् इति॥ ५७॥**

**व्याख्या** - एताम् = इमाम्। तटीम् = तटभूमिम्। पुरः = समक्षम्। पश्य = अवलोकय। इति।

**वृत्ति -पदपूर्वार्धस्य धातोः क्रियार्थवैचित्र्यवक्रत्वं नाम वक्रत्वप्रकारान्तरं विद्यते – यत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन वैदग्ध्यभङ्गीभणिति-**

**रमणीयान् प्रयोगान् निबध्नन्ति कवयः । तत्र क्रियावैचित्र्यं बहुविधं विच्छित्तिविततव्यवहारं दृश्यते।**

तिङन्तपूर्वार्धवक्रता

**व्याख्या** - पदपूर्वार्धस्य पदानाम् = तिङन्तानाम् पूर्वार्धस्य धातोः । क्रियावैचित्र्यवक्रत्वं नाम = क्रियावैचित्र्यवक्रतासंज्ञकम् । वक्रत्व-प्रकारान्तरम् = अन्यत्प्रकारम् । विद्यते = वर्तते । यत्र = यस्मिन्नुदा-हरणे। क्रियावैचित्र्यप्रतिपादनपरत्वेन = क्रियावैचित्र्यसमर्थनेन वैदग्ध्यभङ्गीभणितिरमणीयान् = चातुर्यपूर्णवर्णनमनोरमान्। प्रयोगान्। कवयः = सूरयः। निबघ्नन्ति = रचयन्ति । तत्र क्रियावैचित्र्यम् = क्रियापदेषु विचित्रता। बहुविधम् = बहुप्रकारम्। विच्छित्तिवितत-व्यवहारम् -विच्छित्त्या विततव्यवहारम् = विस्तृतप्रयोगः । दृश्यते = अवलोक्यते।

यथा -

**रइके लिहिअणिअंसणकर किसलअरुद्धणअणजुअलस्स।**
**रुद्दस्स तइअणअणं पव्वइपरिचम्बिअं जअइ॥ ५८॥**
**रतिकेलिहृतनिवसनविसनकरकिसलयरुद्धनयनयुगुलस्य।**
**रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति॥**

**अन्वयः** - रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य रुद्रस्य पार्वतीपरिचुम्बितं तृतीयनयनं जयति।

**व्याख्या** - रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य-- रतिकेली = रतिक्रीडायाम्। हृते निवसने = निर्वस्त्रे सति । करकिसलयाभ्याम् = पाणिपल्लवाभ्याम्, रुद्धे = अवरुद्धे नयनयुगले = नेत्रयुग्मे येन स, तस्य। रुद्रस्य = शिवस्य । पार्वतीपरिचुम्बितम् - पार्वत्या = भवान्या, परिचुम्बितम् = सर्वतश्चुम्बितम्। तृतीयनयनम् = भालनेत्रम्। जयति = सर्वोत्कृष्टं भवति।

**वृत्ति - अत्र समानेऽपि हि स्थगनप्रयोजने साध्ये तुल्ये च लोचनत्वे, देव्याः परिचुम्बनेन यस्य निरोधः सम्पाद्यते तद्भगवतस्तृतीयं नयनं**

**जयति सर्वोत्कर्षेण वर्तत इति वाक्यार्थः। अत्र जयतीति क्रियापदस्य किमपि सहृदयहृदयसंवेद्यं वैचित्र्यं परिस्फुरदेव लक्ष्यते। यथा-**

जयति इति क्रियापदेन वैचित्र्यं परिफुरति

**व्याख्या-** अत्र = अस्मिन् श्लोके। समानेऽपि = समानदशायामपि। स्थगनप्रयोजने साध्ये = साध्यभूते। तुल्ये = समाने च लोचनत्वे = नेत्रत्वे। देव्याः = पार्वत्याः परिचुम्बनेन = सर्वतश्चुम्बनेन। यस्य = तृतीयनेत्रस्य निरोधः सम्पाद्यते = क्रियते। तद् भगवतः रुद्रस्य तृतीयं नयनम् - तृतीयं = भालगतम्। नयनम् = नेत्रम्। जयति = सर्वोत्कर्षेण वर्तत इति वाक्यार्थः = अत्र जयतीति क्रियापदस्य किमप सहृदयहृदय-संवेद्यम् = सज्जनहृदयानुभाव्यम्। वैचित्र्यम् = विचित्रता। परिस्फुरदेव = परिस्फुरदेव। लक्ष्यते = दृश्यते।

**यथा-**

**स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः।**
**त्रायन्तां वो मधुरिपोः प्रसन्नातिच्छिदो नखाः॥ ५९॥**

**अन्वयः** - स्वेच्छाकेसरिणः मधुरिपोः स्वच्छस्वच्छायायासितेन्दवः प्रपन्नाविच्छिदः नखाः वः त्रायन्ताम्।

**व्याख्या** - स्वेच्छाकेसरिणः– स्वेच्छया = निजेच्छया, केसरिणा = सिंहस्य नृसिंहरूपस्य। मधुरिपोः = मधुराक्षसशत्रोः भगवतः विष्णोः। स्वच्छस्वच्छायायासितेन्दवः - स्वच्छया = निर्मलया, स्वच्छायया = स्वकीयकान्त्या, आयासितः = पीडितः इन्दुः = चन्द्रमा, यैः ते प्रपन्नाविच्छिदः - प्रपन्नार्तिनः = जनदुःखान् छिन्दन्ति = विदारयन्ति इति तथाविधाः नखाः। वः = युष्मान्। त्रायन्ताम् = रक्षन्ताम्।

नखानां छेदनव्यापार-व्यतिरेकि प्रपन्नार्त्ति-छेदनलक्षणं कृत्वा तिङन्तपूर्वार्धवक्रता

**वृत्ति - अत्र नखानां सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि किमप्यपूर्वमेव प्रपन्नातिच्छेदनलक्षणं क्रियावैचित्र्यमुपनिबद्धम्।**

व्याख्या - अत्र = अस्मिन् श्लोके। नखानाम् = करजानाम्। सकललोकप्रसिद्धच्छेदनव्यापारव्यतिरेकि - सकललोके = सम्पूर्ण संसारे, प्रसिद्धम् = प्रख्यातम्, छेदनव्यापाराद् = विपाटनकार्याद्,

व्यतिरेकि = भिन्नम्। किमपि = अद्भुतम्। अपूर्वम् = विचित्रम् एव। प्रपन्नार्तिच्छेदनलक्षणम् = दुःखितदुःखविनाशनरूपम्। क्रियावैचित्र्यम् उपनिबद्धम् = वर्णितम्।

**यथा च -**

**स दहतु दुरितं शाम्भवो वः शराग्निः ॥ ६० ॥**

**व्याख्या** - सः = असौ। शाम्भवः - शम्भोरयमिति = शिवस्य। शराग्निः = बाणवह्निः। वः = युष्माकम्। दुरितम् = पापम्। दहतु = ज्वलयतु।

**अत्र च पूर्ववदेव क्रियावैचित्र्यप्रतीतिः।**

**यथा च -**

क्रियावैचित्र्यवक्रता

**कण्णुप्पलदलमिलिअलोअर्णोह हेलालोलणमाणिअणअर्णोह।**
**लीलइ लीलावईहि णिरुद्धओ सिढिलिअचाओ जअइ मअरद्धओ ॥६१ ॥**

**कर्णोत्पलदलमिलितलोचनैर्हेलालोलनमानितनयनाभिः।**
**लीलयालीलावतीभिर्निरुद्धः शिथिलीकृतचापो जयति मकरध्वजः॥**

**अन्वयः** - लीलया हेलालोलनमानितनयनाभिः, कर्णोत्पलदलमिलित-लोचनैः लीलावतीभिः निरुद्धः शिथिलीकृतचापः मकरध्वजः जयति।

**व्याख्या** - लीलया = क्रीडया। हेलालोलनमानितनयनाभिः-- हेलालोलनेन = क्रीडाचपलतया मानितानि = नमितानि नयनानि = नेत्राणि यासां यास्ताभिः। कर्णोत्पलदलमिलितलोचनैः - कर्णेषु = श्रोत्रेषु उत्पलदलैः कमलपत्रैः मिलितानि = संयुक्तानि यानि लोचनानि = नयनानि, तैः। लीलावतीभिः = विलासवतीभिः। निरुद्धः = अवरुद्धः। शिथिलीकृतचापः - शिथिलीकृतं = श्लथीकृतम् चापम् = धनुर्येन सः। मकरध्वजः = कामदेवः। जयति = सर्वोत्कृष्टो भवति।

**वृत्ति - अत्र लोचनैर्लीलया लीलावतीभिर्निरुद्धः स्वव्यापारपराङ्मुखी-कृतः सन् शिथिलीकृतचापः कन्दर्पो जयति सर्वोत्कर्षेण वर्तत इति किमुच्यते, यतस्तास्तथाविधविजयावाप्तौ सत्यां जयन्तीति वक्तव्यम्।**

**व्याख्या -** अत्र = अस्मिन् उदाहरणे । लोचनैः = नेत्रैः । लीलया = क्रीडया। लीलावतीभिः = विलासिनीभिः। निरुद्धः = स्वव्यापारपराङ्मुखीकृतः सन्। शिथिलीकृतचापः कन्दर्पो । जयति = सर्वोत्कर्षेण वर्त्तत इति किमुच्यते यतस्तास्तथाविधविजयावाप्तौ सत्यां जयन्तीति वक्तव्यम्।

**वृत्ति - तदयमत्राभिप्रायः - यत्तल्लोचनविलासानामेवंविधं जैत्रताप्रौढ-भावं पर्यालोच्य चेतनत्वेन स स्वचापारोपणायासमुपसंहृतवान् । यतस्तेनैव त्रिभुवनविजयावाप्तिः परिसमाप्यते। ममेति मन्यमानस्य तस्य सहायत्वोत्कर्षातिशयो जयतीति क्रियापदेन कर्तृतायाः कारणत्वेन कवेश्चेतसि परिस्फुरितः। तेन किमपि क्रियावैचित्र्यमत्र तद्विदाह्लादकारि प्रतीयते।**

जयतीति क्रियापदेन कर्तृतायाः कारणत्वेन क्रियावैचित्र्यवक्रता

**व्याख्या** - तत् = अतः। अयम् = एषः। अत्र अस्मिन् स्थाने। अभिप्रायः = आशयः। यत् = हि। लोचनविलासानाम् = नयनविलासानाम्। एवं-विधम् = एतत्प्रकारम् । जैत्रताप्रौढभावम् = विजयताप्रौढभावम् । पर्यालोच्य = विविच्य । चेतनत्वेन = चेतनतथा सः असौ । मदनः स्वचापारोपणाय स्वस्य = निजस्य चापस्य = धनुषः आरोपणाय -आरोपणनिमित्तम्। असमुपसंहृतवान् = निरुद्धवान्। यतः = यस्मात्। तेनैव त्रिभुवनविजयावाप्तिः त्रिभुवने त्रिलोके विजयस्य = जयस्यावाप्तिः = सम्प्राप्तिः । परिसमाप्यते- परितः = सर्वतः समाप्यते। 'मम' इति मन्यमानस्य = स्वीकार्यमाणस्य तस्य सहायत्वोत्कर्षा-तिशयः- सहायत्वस्य = सहायतायाः उत्कर्षातिशयः = महदुत्कर्षः । जयति इति क्रियापदेन कर्तृतायाः = कर्तृत्वस्य। कारणत्वेन = हेतुत्वेन। कवेः = सूरेः । चेतसि = मनसि परिस्फुरितः = परिस्फुटितः । तेन = तर्हि। किमपि = किञ्चित् क्रियावैचित्र्यम् = क्रियावक्रत्त्वम् । अत्र तद्विदाम् = काव्यमर्मज्ञानाम् आह्लादकारि = आनन्ददायकम्। प्रतीयते = अनुभूयते।

**यथा च-**

**तान्यक्षराणि हृदये किमपि ध्वनन्ति ॥ ६२ ॥**

**व्याख्या -** तानि = तथाविधानि अक्षराणि। हृदये = चेतसि। किमपि = किञ्चिदनिर्वचनीयम्। ध्वनन्ति = ध्वनिं कुर्वन्ति।

**अत्र जल्पन्ति वदन्तीत्यादि न प्रयुक्तम्, यस्मात्तानि कयापि विच्छित्त्या किमप्यनाख्येयं समर्पयन्तीति कवेरभिप्रेतम्।**

**व्याख्या -** अत्र = अस्मिन् श्लोके। जल्पन्ति वदन्ति इत्यादि न प्रयुक्तम्। यस्मात् = यतः। तानि = अक्षराणि। कयापि = अपूर्वया। विच्छित्त्या = विचित्रतया। किमपि अनाख्येयम् = अवर्णनीयम्। कवेः = सूरेः। अभिप्रेतम् = अभीष्टम् इति समर्पयन्ति = अर्पयन्ति।

## Summarised Overview

कुन्तकाचार्यस्य वक्रोक्तिजीविते द्वितीयोन्मेषे कविव्यापारवक्रतायाः द्वितीयो भेदः पदपूर्वार्धवक्रता - अर्थात् सुबन्तस्य तिङन्तस्य वा पदस्य यः पूर्वार्द्धः उत प्रातिपादिकलक्षणं धातुलक्षणं वा विद्यते तस्य वक्रता वक्रभावो वा रचनावैचित्र्यं वा भवति। तत्राप्यनेके भेदाः सम्भवन्ति।

तेषु प्रकारेपु- "यत्र रूढिशब्दस्यैव प्रस्तावसमुचितत्वेन वाच्यप्रसिद्धधर्मान्तराध्यारोपगर्भत्वेन निबन्धः स पदपूर्वार्धवक्रतायाः प्रथमः प्रकारः। तस्योदाहरणञ्च यथा - 'रामोऽस्मि सर्वं सहे'। द्वितीयो भेदः, यथा- 'यत्र संज्ञा शब्दस्य वाच्यप्रसिद्धधर्मस्य लोकोत्तरातिशयाध्यारोपं गर्भीकृत्योपनिबन्धनः।' तदुदाहरणञ्च यथा- 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा- 'इत्यादौ, अत्र रामशब्दो लोकोत्तरशौर्यादिधर्मातिशयाध्यारोपपरत्वेनोपात्तो वक्रतां प्रथयति।

पदपूर्वार्धवक्रतायाः तृतीयो भेदः पर्यायवक्रत्वम्- 'यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते। उदाहरणञ्च- 'वामं कज्जलवद्विलोचनमुरो रोहद्विसारिस्तनमित्यादौ।' अस्मिन् पद्ये- 'स्मररिपोः' इति पर्यायः कामपि वक्रतामुन्मीलयति। पदपूर्वार्धवक्रतायाश्चतुर्थो भेदः उपचारवकता - यत्रामूर्तस्य वस्तुनो मूर्तद्रव्याभिधायिना शब्देनाभिधानमुपचारात्। यथा- 'हस्तापचेयं यशः'। विशेषणवक्रत्वं पञ्चमो भेदः। तच्च- 'यत्र विशेषणमाहाम्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते'। अत्रोदाहरणं विद्यते- 'दाहोऽम्भः प्रसृतिं पचः प्रचयवान् बाष्पः प्रणालोचितः'

इत्यादि पद्ये । अपरञ्च-संवृतिवक्रत्वं नाम षष्ठो भेदः। तद्यथा- "यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा युक्तं व्यक्ततया साक्षादभिधातुमशक्यं संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते" । उदाहरणञ्चास्य- 'सोऽयं दम्भधृतव्रतः प्रियतमे कर्तुं किमप्युद्यः।'

एवञ्च 'वृत्तिवैचित्र्यवक्रता' नामको सप्तमो भेदः । तद्यथा- 'यत्र समासादितवृत्तीनां कासाश्चिद् विचित्राणामेव कविभिः परिग्रहः क्रियते' । यथा- 'मध्येऽङ्कुर पल्लवाः' 'पाण्डिम्नि मग्नं वपुः इत्यादौ' । अपरश्च लिङ्गवैचित्र्यं नाम अष्टमो भेदः। यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय समानाधिकरण्योपनिबन्धः । उदाहरणञ्च - 'इत्थं जडे जगति को नु बृहत्प्रमाण, कर्णः करी ननु भवेद् ध्वनितस्य पात्रम्' 'मैथिली तस्य दाराः' इत्यादौ । एवमेवान्यत् लिङ्गवैचित्र्यवक्रत्वं भवति । एतदुदाहरणं- 'एतां पश्य पुरस्तटीमित्यादौ । पदपूर्वार्धवक्रतायाः अपरो भेदः अस्ति तिङन्तपूर्वार्धवक्रता। पुनः एकैवाऽस्ति किन्तु तस्मिन् पञ्च उदाहरणानि काव्यविशेषलक्षणे वक्रोक्तेः प्रदत्तानि सन्ति। एतेन प्रतीयते यदस्या अपि वक्रतायाः अनेके प्रकाराः सन्ति। तानि माहात्म्यं प्रकारश्च उदाहरणानि सन्ति - १. रतिकेलिहृतनिवसन.... २. स्वेच्छाकेसरिणः स्वच्छ ...... ३. स दहतु दुरितं शाम्भवो..... ४. कर्णोत्पलदलमिलित..... तान्यक्षराणि हृदये ..... एतस्याः पदपूर्वार्धवक्रतायाः नवभेदानां लक्षणोदाहरणपूर्वकं विवेचनं विस्तरेण अस्मिन् एकके कृतमस्ति।

## Assignments

1. अध्यारोपगर्भत्वेन इत्यस्य कोऽर्थः?
2. संज्ञावैचित्र्यवक्रता का?
3. किं नाम पदपूर्वार्धवक्रता? तस्याः भेदाः के?
4. विशेषणवक्रतायाः एकमुदाहरणं लिखत।
5. रूढिवक्रतासंज्ञावक्रतयोः भेदः कः?
6. पर्यायवक्रतायाः एकमुदाहरणं विलिख्य व्याख्यात।
7. उपचारवक्रता इत्यत्र उपचारपदेन किं प्रयोजनम्?
8. क्रियावैचित्र्यवक्रतायाः त्रीणि उदाहरणानि विलिख्य विशदयत।
9. पदपूर्वार्धवक्रतायाः लक्षणं तस्य प्रकाराः कति? ताः सोदाहरणं विवेचयत।

## Suggested Readings

1. *Vakroktijivitam* of Kuntaka, (ed) K.Krishnamurthy, Karnataka University, Dharwad, 1977
2. श्रीमद्राजानककन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या डां. प्रज्ञा पाण्डेय (दीक्षित), चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020

## References

1. श्रीमद्राजानककन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या श्रीपरमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022
2. *Vakroktijivitam* Mal Trans, Chattanatt Achutanunni, Vallathol Vidyapeetham Edappal, 2009

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

UNIT 3

# प्रत्ययाश्रयवक्रता, वाक्यवक्रता

## Learning Outcomes

- प्रत्ययाश्रयवक्रतायाः वैशिष्ट्यम् अवगच्छति।
- वाक्यवक्रतायाः लक्षणमुदाहरणञ्च जानाति।
- प्रत्ययाश्रयवक्रतायाः भेदान् अवगच्छति।

## Background

कुन्तकाचार्यस्य वक्रोक्तिजीविते प्रथमोन्मेषे वक्रतायाः महात्म्यं तस्याः षट् भेदान् प्रतिपादयति। तेषु भेदेषु वर्णविन्यासवक्रतायाः विषये पदपूर्वार्धवक्रतायाः नवभेदानां विषयं च विस्तरेण वर्णितम्। वैयाकरणानां मतेऽपि सुपां अनेके अर्थाः भवन्ति। कुन्तकाचार्येण प्रथमं पदस्य भेदद्वयं विहितं नाम-धातु-रूपं पूर्वार्धम्, अस्य नवभिः प्रकारैः वक्रतायाः विषये विवेचनं करोति। इदानीं पदस्य उत्तरार्धः यः सुप्तिङ्गत्ययरूपः द्वितीयः भेदः। तस्यामत्र अनेकैः प्रकारैः वर्णनं क्रियते। अस्मिन् एकके प्रत्ययश्रयवक्रता, संख्यावैचित्र्यवक्रता, कारकवैचित्र्यवक्रता, पुरुषवैचित्र्यवक्रता, वाक्यवक्रता इत्यादीन् विषयान् अधिकृत्य चर्चां कुर्मः।

## Keywords

संख्यावैचित्र्यवक्रता, वचनं, कारकवक्रता, पुरुषवक्रता, दाराः, चन्द्रहासः लज्जते, अस्मद्भायविपर्ययात्, अयं जनः, वाक्यवक्रता

# Discussion

### 4.3.1 प्रत्ययाश्रयवक्रता

प्रत्ययाश्रयवक्रतायाः भेदाः

पदवक्रतायाः प्रथमो भेदः पदपूर्वार्धवक्रता अस्ति, द्वितीयश्च भेदः पदोत्तरार्धवक्रता अस्ति। तत् पश्यामः।

**वृत्ति - वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रय इति। वक्रभावस्यान्योऽपि प्रभेदो विद्यते। कीदृशः - प्रत्ययाश्रयः। प्रत्ययः सुप्तिङ् च यस्याश्रयः स्थानं स तथोक्तः। तस्यापि बहवः प्रकाराः सम्भवन्ति संख्यावैचित्र्यविहितः कारकवैचित्र्यविहितः, पुरुषवैचित्र्यविहितश्च। तत्र, संख्यावैचित्र्यविहितः - यस्मिन् वचनवैचित्र्यं काव्यबन्धशोभायै निबध्यते।**

**व्याख्या** - वक्रतायाः परः = अन्यः। प्रत्यायाश्रयः = प्रत्ययाश्रय - वक्रताभिधः प्रकारः = भेदः इति। कीदृशः प्रत्ययाश्रयः। प्रत्ययः सुप् = सुबन्तः तिङ् = तिङन्तश्च। यस्याश्रयः स्थानं सः = असौ तथोक्तः = पूर्वोक्तः। तस्यापि = प्रत्ययाश्रयस्यापि। बहवः अनेकाः, प्रकाराः भेदाः, सम्भवन्ति भवन्ति। संख्यावैचित्र्यविहतः - संख्यायाः वैचित्र्येण विचित्रतया विहितः = सञ्जातः। कारकवैचित्र्यविहितः -कारकस्य विचित्रतया सञ्जातः। पुरुषवैचित्र्यविहितः = पुरुषस्य विचित्रतया सञ्जातश्च। तत्र संख्यावैचित्र्यविहितः = तदभिधः। यस्मिन् = यत्र। वचनवैचित्र्यम् - वचनानाम् = एकद्विबहुवचनानाम्। वैचित्र्यम् = विचित्रता। काव्यबन्धशोभायै- काव्यबन्धस्य = रचनायाः। शोभायै = श्रियै। निबध्यते निबन्धनं क्रियते।

दाराः इति बहुवचनशब्देन अत्र संख्यवैचित्र्यवक्रता प्रतीयते

**यथा-**

**मैथिली तस्य दाराः। इति॥ ६३॥**

व्याख्या - मैथिली = मिथिलानन्दिनी। तस्य रामस्य। दाराः = पत्नी। इति।

**यथा च -**

**फुल्लेन्दीवरकानननानि नयने पाणी सरोजाकरः॥ ६४॥**

व्याख्या- (तस्याः ) नयने = नेत्रे। फुल्लेन्दीवरकाननानि- फुल्लनाम् = विकसितानाम्, इन्दीवराणाम् = नीलकमलानाम्, काननानि = वनानि सन्ति। पाणी = करौ च सरोजाकराः - सरोजानाम् = कमलानाम्, आकराः = सागराः सन्ति।

अत्र द्विवचनबहुवचयोः समानमधिकरणेन वक्रता प्रतीयते

**वृत्ति - अत्र द्विवचनबहुवचनयोः समानाधिकरण्यमतीव चमत्कार-कारि।**

व्याख्या - अत्र = अस्मिन् श्लोके। द्विवचनबहुवचनयोः = द्विवचनस्य बहुवचनस्य च। समानाधिकरण्यम् = समानविभक्तौ प्रयोगः। अतीव चमत्कारि = अत्यन्तं चमत्कारोत्पादकम्।

कारकवैचित्र्यवक्रता

**वृत्ति- कारकवैचित्र्यविहितः - यत्राचेतनस्यापि पदार्थस्य चेतनत्वाध्यारोपेण चेतनस्यैव क्रियासमावेशलक्षणं रसादिपरिपोषणार्थं कर्तृत्वादिकारकं निबध्यते।**

**व्याख्या -** कारकवैचित्र्यविहितः = कारकाणां विचित्रतयोत्पन्नः भेदः। यत्र = यस्मिन् स्थाने। अचेतनस्य अपि पदार्थस्य = अचेतनवस्तुनः अपि। चेतनत्वाध्यारोपणेन = चेतनायामध्यारोपणतया। चेतनस्य एव क्रियासमावेशलक्षणम् = क्रियाणां समावेशक्षमतारूपम्। रसादिपरिपो-षणार्थम् = रसादीनाम् परिपुष्ट्यर्थम्। कर्तृत्वादिकारकं निबध्यते = निबन्धनं क्रियत इति।

**यथा-**

**स्तनद्वन्द्वं मन्दं स्नपयति बलाद्बाष्पनिवहो**
**हठादन्तःकण्ठं लुठति सरसः पञ्चमरवः।**
**शरज्ज्योत्स्नापाण्डुः पतति च कपोलः करतले**
**न जानीमस्तस्याः क इव हि विकारव्यतिकरः॥ ६५॥**

**अन्वयः -** स्तनद्वन्द्वं बलात् बाष्पनिवहः मन्दं स्नपयति सरसः पञ्चमरवः हठात् अन्तः कण्ठं लुठति शरज्ज्योत्स्नापाण्डुः कपोलः करतले च पतति। न जानीमः तस्याः विकारव्यतिकरः कः इव।

**व्याख्या** - स्तनद्वन्द्वम् = पयोधरयुगलम्। बलात् बलपूर्वकम्। बाष्पनिवहः = अश्रुसमूहः। मन्दम् = शनैः। स्नपयति = स्नानं कारयति। सरसः = मधुरः पञ्चमरवः पञ्चमस्वरः। हठात् = प्रसह्य। अन्तः कण्ठम्

= कण्ठान्तरे । लुठति – लुण्ठनं करोति शरज्ज्योत्स्नापाण्डुः - शरज्ज्योत्स्नया = शारदीचन्द्रिकया पाण्डुः = पीतवर्णः । कपोलः= गण्डस्थलम् । करतले = पाणितले च । पतति = स्खलति । न जानीम. = वयं न विद्मः । तस्याः = नायिकायाः । विकारव्यतिकरः विकाराणाम-वस्था । कः इव = कीदृशः ।

बाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कर्तृत्वं निबद्ध्यते इत्यनेन वक्रता प्रतीयेते

**वृत्ति -अत्र बाष्पनिवहादीनामचेतनानामपि चेतनत्वाध्यारोपेण कविना कर्तृत्वमुपनिबद्धम् - यत्तस्या विवशायाः सत्यास्तेषामेवं विधो व्यवहारः, सा पुनः स्वयं किञ्चिदप्याचरितुं समर्थेत्यभिप्रायः। अन्यच्च कपोलादीनां तदवयवानामेतदवस्थत्वं प्रत्यक्षतयास्मदादिगोचरतामापद्यते, तस्याः पुनर्योऽसावन्तर्विकारव्यतिकरस्तं तदनुभवैकविषयत्वाद्वयं न जानीमः।**

**व्याख्या-** अत्र = अस्मिन् श्लोके । बाष्पनिवहादीनाम् = अश्रुसमूहादीनाम्। अचेतनानाम् अपि = अचेतनपदार्थानामपि। चेतनत्वाध्यारोपणेन = चेतनायाः अध्यारोपणेन। कविना कतृत्वम् = कर्तृताम्। उपनिबद्धम् = वर्णितम्। यत् तस्या = सुन्दर्याः। विवशायाः = पराधीनायाः सत्याः। तेषामेवंविधः = ईदृशः। व्यवहारः अस्ति। सा = रमणी । पुनः स्वयम् = आत्मना । न किञ्चित् = न किमपि। आचरितुम् = व्यवहारं कर्त्तुं समर्था = सबला इति । अभिप्रायः = आशयः । अन्यच्च = अपरश्च ।। कपोलादीनाम् = गण्डस्थलादीनाम्। तदवयवानाम् = तस्याः अङ्गानाम् । एतत् = इदम् । अवस्थत्वम् = अवस्था । प्रत्यक्षतया = स्पष्टतया । अस्मदादिगोचरताम् = अस्माकं दृष्टिपथम्। आपद्यते = प्राप्यते। तस्याः = रमण्याः। पुनः यः असौ = सः। अन्तर्विकारव्यतिकरः = आन्तरिकविकारावस्था। तम् = अमुम्। तदनुभवैकविषयत्वात् = तस्यैकमात्रानुभवविषयात् वयं न जानीमः = वयं न विद्मः।

**यथा च -**

**चापाचार्यस्त्रिपुरविजयी कार्तिकेयो विजेयः**
**शस्त्रव्यस्तः सदनमुदधिर्भूरियं हन्तकारः।**
**अस्त्येवैतत् किमु कृतवता रेणुकाकण्ठबाधां**
**बद्धस्पर्धस्तव परशुना लज्जते चन्द्रहासः॥ ६६॥**

**अन्वयः** - त्रिपुरविजयी चापाचार्यः कार्तिकेयः विजेयः, शस्त्रव्यस्तः उदधिः सदनम् इयं भूः हन्तकारः। एतत् अस्ति एव। रेणुकाकण्ठबाधां किमु कृतवता तव परशुना बद्धस्पर्धः चन्द्रहासः लज्जते।

चन्द्रहासः लज्जते इति पदेन कारकवैचित्र्य - वक्रता प्रतीयते

**व्याख्या** - त्रिपुरविजयी = त्रिपुरासुरजया, शङ्करः। चापाचार्यः- चापस्य = धनुर्विद्यायाः। गुरुः = शिक्षकः अस्ति। कार्तिकेयः = स्वामि-कार्तिकेयः । विजेयः = भवता जेयः अस्ति । शस्त्रव्यस्तः = शस्त्रैः व्यस्तः। उदधिः = सागरः। सदनम् = निवासस्थानम्। इयम् = एषा भूः = पृथ्वी। हन्तकारः। एतत् = इदम् अस्त्येव। रेणुका- कण्ठबाधाम्- -रेणुकायाः = स्वमातुः । कण्ठबाधाम् = गलपीडनम् । कृतवता = विदधता। किमु तव = ते परशुरामस्य। परशुना = कुठारेण। बद्धस्पर्धा = कृतेर्ष्यः। चन्द्रहासः = खड्गः। लज्जते = लज्जां करोति।

**वृत्ति - अत्र चन्द्रहासो लज्जत इति पूर्ववत् कारकवैचित्र्यप्रतीतिः। पुरुषवैचित्र्यविहितं वक्रत्वं विद्यते - यत्र प्रत्यक्तापरभावविपर्यासं प्रयुञ्जते कवयः काव्यवैचित्र्यार्थं युष्मद्यस्मदि वा प्रयोक्तव्ये प्रातिपदिकमात्रं निबध्नन्ति।**

पुरुषवैचित्र्यवक्रता

**व्याख्या** - अत्र = अस्मिन् श्लोके। चन्द्रहासः = खड्गः। लज्जते = लज्जां करोति। इति पूर्ववत् कारकवैचित्र्यप्रतीतिः = कारकाणां विचित्रता-प्रतीतिः। पुरुषवैचित्र्यविहितम् = पुरुषविचित्रताकृतम् । वक्रत्वम् = वक्रता। विद्यते = वर्तते। यत्र प्रत्यक्तापरभावविपर्यासम् = अपर-भावस्य विपर्यासम् परित्यक्तम्। प्रयुञ्जते = प्रस्तूयते। कवयः = सूरयः। काव्यवैचित्र्यार्थम् - काव्ये प्रबन्धे वैचित्र्यार्थम् = विचित्रतानिमित्तम्। युष्मदि अस्मदि वा = युष्मच्छब्देऽस्मच्छब्दे वा । प्रयोक्तव्ये = प्रयोगयोग्ये। प्रातिपदिकमात्रम् = केवलं प्रातिपदिकम्। निबध्नन्ति = निबन्धनं कुर्वन्ति।

**यथा**

**अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तम्॥ ६७॥**

**अन्वयः**-- यदि अस्मद्भाग्यविपर्ययाद् देवः तं परं न जानाति।

**व्याख्या** - यदि = चेत्। अस्मद्भाग्यविपयर्यात् = अस्मद्भाग्यवैपरीत्यात्। देवः = भवान्। तम् = रामम्। परम् = महिमामयम्। न जानाति = नैव वेत्ति।

**अत्र 'त्वं न जानासीति' वक्तव्ये वैचित्र्याय देवो न जानातीत्युक्तम्।**

**व्याख्या** - अत्र = अस्मिन् उदाहरणे। 'त्वं न जानासि' इति = एवंमध्य - मपुरुषकथने। वैचित्र्याय = विचित्रतायै 'देवो न जानाति' इति उत्तमपुरुषमेवोक्तम्।

प्रातिपदिकमात्रप्रयोगे पुरुषवैचित्र्यवक्रता प्रतीयते

**एवं युष्मदादिविपर्यासः क्रियापदं विना प्रातिपदिकमात्रेऽपि दृश्यते।**

**व्याख्या** - एवम् = इत्थम्। युष्मदादिविपर्यासः = युष्मत्प्रभृतिविपरीतः प्रयोगः। क्रियापदं विना = क्रियापदस्य प्रयोगेण विना। प्रातिपदिकमात्रम् = केवले प्रातिपदिकप्रयोगेऽपि। दृश्यते = अवलोक्यते।

**अयं जनः प्रष्टुमनास्तपोधने न चेद्रहस्यं प्रतिवक्तुमर्हसि॥ ६८॥**

**अन्वयः** - तपोधने ! अयं जनः पृष्टुमनाः। चेत् रहस्यं न प्रतिवक्तुम् अर्हसि।

अयं जन इति प्रयोगे पुरुषवैचित्र्यवक्रता प्रतीयते

**व्याख्या** - हे तपोधने – तप एव धनं यस्यास्तत्सम्बुद्धौ = अयि तपस्विनि! अयं जनः = एषः पुरुषः (अहम्)। पृष्टुमनाः = पृष्टुकाम अस्ति। चेत् = यदि। रहस्यं = गोपनीयं न स्यात्। प्रतिवक्तुम् = निःसंकोचम् कथयितुम्। अर्हसि = योग्याऽसि।

**अत्राह प्रष्टुकाम इति वक्तव्ये ताटस्थ्यप्रतीत्यर्थमय जन इत्युक्तम्।**

**व्याख्या** - अत्र = - अस्मिन् श्लोके। अहम् पृष्टुमनाः = प्रष्टुकामः। इति = एवं। वक्तव्ये = कथनीये। ताटस्थ्यप्रतीत्यर्थम् = तटस्थताप्रतीतिनिमित्तम्। अयं जनः = एषः पुरुषः (अहम्) इति उक्तम् - कथितम्।

प्रातिपदिकमात्र प्रयोगे पुरुषवैचित्र्यवक्रता प्रतीयते

**यथा वा -**

**सोऽयं दम्भधृतव्रतः इति॥ ६९॥**

**व्याख्या** - सः = असौ। अयम् = एषः। दम्भधृतव्रतः = एकपत्नीत्वदम्भव्रतधारी।

अत्र सोऽहमिति वक्तव्ये पूर्ववद् 'अयम्' इति वैचित्र्यप्रतीतिः।

**व्याख्या** - अत्र सः = एषः अहम्। इति वक्तव्ये = कथनीये पूर्ववत् 'अयम्' इति = एवम् वैचित्र्यप्रतीतिः अस्ति।

**वृत्ति - एते च मुख्यतया वक्रताप्रकाराः कतिचिन्निदर्शनार्थं प्रदर्शिताः। शिष्टाश्च सहस्रशः सम्भवन्तीति महाकविप्रवाहे सहृदयैः स्वयमेवोत्प्रेक्षणीयाः।**

### 4.3.2 वाक्यवक्रता

**एवं वाक्यावयवानां पदानां प्रत्येकं वर्णाद्यवयवद्वारेण यथासम्भवं वक्रभावं व्याख्यायेदानीं पदसमुदायभूतस्य वाक्यस्य वक्रता व्याख्यायते-**

> **वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।**
> **यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति ।।॥ २० ॥**

**अन्वयः** - वाक्यस्य वक्रभावः अन्यः यः सहस्रधा भिद्यते । यत्र अलङ्कारवर्गः असौ सर्वः अपि अन्तर्भविष्यति।

**व्याख्या** - वाक्यस्य = पदसमुदायभूतस्य वाक्यस्य । वक्रभावः = वक्रत्वम्। अन्यः = अपरः अस्ति। यः सहस्रधा = सहस्रभेदैः। भिद्यते = भेदयुक्तम् क्रियते। यत्र = यस्मिन् स्थाने। अलङ्कारवर्गः = अलङ्कारसमुदायः। असौ = सः। सर्वः = सम्पूर्णः अपि अन्तर्भविष्यति = अन्तरत्वं यास्यति।

आख्यातं साव्ययकारकविशेषणं वाक्यम्

**वाक्यस्य वक्रभावोऽन्यः। वाक्यस्य पदसमुदायभूतस्य। आख्यातं साव्ययकारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोकादेर्वक्रभावो भङ्गीभणितिवैचित्र्यम् अन्यः पूर्वोक्तवक्रताव्यतिरेकी समुदायवैचित्र्यनिबन्धनः कोऽपि सम्भवति।**

**व्याख्या** - वाक्यस्य = पदसमुदायभूतस्य। वक्रभावः अन्यः। आख्यातं साव्ययकारकविशेषणं वाक्यम् = अव्ययैः कारकैः विशेषणैश्च युक्तम् वाक्यम् इति । यस्य प्रतीतिः । तस्य श्लोकादेः वक्रभावः = भङ्गीभणितिवैचित्र्यम्। अन्यः = पूर्वोक्तवक्रताव्यतिरेकी। समुदायवैचित्र्यनिबन्धनः = समुदायविचित्रतासम्पादकः कोऽपि सम्भवति।

यथा–

**उपस्थितां पूर्वमपास्य लक्ष्मीं वनं मया सार्धमसि प्रपन्नः।**
**त्वामाश्रयं प्राप्य तथा नु कोपात्सोढाऽस्मि न त्वद्भवने वसन्ती॥ ७०॥**

**अन्वयः** - पूर्वम् उपस्थितां लक्ष्मीम् अपास्य मया सार्धं वनं प्रपन्नः असि। त्वाम् आश्रयं प्राप्य त्वद् भवने वसन्ती तया नु कोपात् न सोढा अस्मि।

**व्याख्या** - पूर्वम् = वनगमनकाले। उपस्थिताम् = विद्यमानाम्। लक्ष्मीम् = राज्यलक्ष्मीम्। अपास्य = परित्यज्य। मया सार्धम् = सीतया सह। वनम् = अरण्यम्। प्रपन्नः असि=कृतप्रस्थानोऽसि। त्वाम् = भवन्तम्। आश्रयम् = आश्रयस्थानम्। प्राप्य = लब्ध्वा। त्वद्भवने = तव गेहे। वसन्ती = निवसन्ती। तया = राजलक्ष्म्या। कोपात् = क्रोधात्। न सोढा अस्मि = नैव सोढुं योग्याऽस्मि।

श्लोकादेर्वक्रभावो-भङ्गोभणितिवैचित्र्यम्

**एतत्सा तया तथाविधकरुणाकान्तान्तःकरणया वल्लभं प्रति सन्दिश्यते-यदुपस्थितां सेवासमापन्नां लक्ष्मीमपास्य श्रियं परित्यज्य पूर्वं यस्त्वं मया सार्धं वनं प्रपन्नो विपिनं प्रयातस्तस्य तव स्वप्नेऽप्येतन्न सम्भाव्यते। तया पुनस्तस्मादेव कोपात् स्त्रीस्वभावसमुचितसपत्नी-विद्वेषात्त्वद्गृहे वसन्ती न सोढाऽस्मि। तदिदमुक्तं भवति-यत्तस्मिन् विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादस्पदतामध्यारोप्य यदिदानीं साम्राज्ये निष्कारणपरित्यागतिरस्कारपात्रतां नीतास्मीत्ये-तदुचितमनुचितं वा विदितव्यवहारपरम्परेण भवता स्वयमेव विचार्यतामिति।**

**व्याख्या** - एतत् = इदम्। सा = असौ। तया = सीतया। तथाविधकरुणाक्रान्तान्तःकरणया - तादृशकरुणाक्रान्तहृदयया। वल्लभं प्रति प्रियतमं रामं प्रति। सन्दिश्यते = सन्देशो प्रेष्यते। यद् हि। उपस्थिताम्, सेवासमापन्नाम्। लक्ष्मीम् = राज्यलक्ष्मीं श्रियं वा। परित्यज्य = त्यक्त्वा। पूर्वम् = प्राक्। यः त्वम् = भवान्। मया सार्धम् = मया सह। वनं प्रपन्नः = विपिनं प्रयातस्तस्य तव = ते स्वप्नेऽपि एतत् = इदं न सम्भाव्यते। तया = राजलक्ष्म्या पुनः। तस्मादेव कोपात् = क्रोधात् स्त्रीस्वभावसमुचितसपत्नीविद्वेषात् त्वद्गृहे तव भवने। वसन्ती-

वासं कुर्वन्ती न सोढाऽस्मि । तत् = तर्हि । इदम् = एतत् उक्तम् = कथितम् भवति। यत् तस्मिन् विधुरदशाविसंष्ठुलेऽपि समये तथाविधप्रसादास्पदताम् अध्यारोप्य = अध्यारोपणं कृत्वा यत् इदानीम् = साम्प्रतम् साम्राज्ये = राजसिंहासने । निष्कारणपरित्यागतिरस्कार-पात्रताम् = अकारणत्यागतिरस्कारपात्रताम् । नीता = प्रापिताऽस्मि इत्येतत्। उचितम् = उपयुक्तम्। अनुचितम् = अनुपयुक्तं वा। विदितव्यवहारपरम्परेण = ज्ञातव्यवहारपरम्परेण। भवता = रामेण स्वयमेव = आत्मनैव। विचार्यताम् = विचारः क्रियतामिति

वाक्यस्य वक्रभावो बहुप्रकारः

**वृत्ति - स च वक्रभावस्तथाविधो यः सहस्रधा भिद्यते बहुप्रकारं भेदमासादयति। सहस्रशब्दोऽत्र संख्याभूयस्त्वमात्रवाची, न नियतार्थवृत्तिः, यथा - सहस्रदलमिति। यस्मात् कविप्रतिभानामान-न्त्यान्नियतत्वं न सम्भवति। योऽसौ वाक्यस्य वक्रभावो बहुप्रकारः, न जानीमस्तं कीदृशमित्याह - यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति। यत्र यस्मिन्नसावलङ्कारवर्गः कविप्रवाहप्रसिद्धप्रतीतिरुपमादिरलङ्करण-कलापः सर्वः सकलोऽप्यन्तर्भविष्यति अन्तर्भावं व्रजिष्यति, पृथक्त्वेन नावस्थाप्यते । तत्प्रकारभेदत्वेनैव व्यपदेशमासादयिष्यतीत्यर्थः । स चालङ्कारवर्गः स्वलक्षणावसरे प्रतिपदमुदाहरिष्यते।**

**व्याख्या-** स च = असौ च वक्रता। तथाविधः = तादृशः। यः सहस्रधा = सहस्रशः। भिद्यते = भेदयुक्ता भवति। वा बहुप्रकारं भेदम् आसादयति = प्रापयति। अत्र - अस्मिन् स्थाने। सहस्रशब्दः संख्याभूयस्त्वमात्र-वाचि = संख्याबाहुल्यवाचकमात्रम्। न नियतार्थवृत्तिः = निश्चितार्थ-वृत्तिः नास्ति। यथा - सहस्रदलम् = सहस्रमर्थात् बहुसंख्यकानि-दलानि यस्मिन्। तत् = कमलम् इति। यस्मात् = यतः। कविप्रतिभा-नाम् = कविबुद्धीनाम्। आनन्त्यात् = असीमितत्वात्। नियतत्वम् = निश्चयत्वम्। न सम्भवति। यः असौ वाक्यस्य वक्तभावः = वैचित्र्यम्। बहुप्रकारः = बहुविधः। न जानीमः = नैव विद्मः। तम् = तत्प्रकारम्। कीदृशम् = कीदृग्विधम्। इति आह = प्राह। यत्र असौ = अलङ्कारवर्गः = अलङ्कारसमूहः । सर्वः अपि = सम्पूर्णोऽपि । अन्तर्भविष्यति =

अन्तर्भूतत्वमेष्यति। यत्र यस्मिन्नसौ अलङ्कारवर्गः। कविप्रवाहप्रसिद्ध-प्रतीतिः- कविप्रवाहे = काव्यत्वे, प्रसिद्धा = प्रख्याता प्रतीतिर्यस्य तथाविधः। उपमाद्यलङ्करणकलापः = उपमाप्रभृत्यलङ्कारसमूहः। सर्वं = सकलः अप्यन्तर्भविष्यति = अन्तर्भावं व्रजिष्यति, पृथक्त्वेन नावस्थाप्यते। तत्प्रकारभेदत्वेन = तथाविविधभागत्वेन एव। व्यपदेशमासादयिष्यतीत्यर्थः। स चालङ्कारवर्गः = अलङ्कारसमूहः। स्वलक्षणावसरे = तल्लक्षणवर्णनकाले। प्रतिपदम् = प्रत्येकपदम् उदाहरिष्यते।

## Summarised Overview

कुन्तकस्य वक्रोक्तिजीविते प्रथमोन्मेषे वक्रतायाः अष्टौ भेदाः सन्ति। तेषु अन्तभूतायाः प्रत्ययाश्रयवक्रतायाः बहवो भेदाः सन्ति। तथापि अत्र संक्षेपेण सुप्रत्ययवक्रतायाः विषये वचनवक्रतायाः (संख्यावक्रता) कारकवक्रतायाश्च विषये वर्णितम्। यत्र एकस्मिन्नेव वाक्ये समानाधिकारण्येन भिन्नयोः भिन्नयोः वचनात्मकयोः पदयोः प्रयोगः क्रियते, यथा-मैथिली तस्य दाराः, नयने कमलवनानि पाणी सरोजाकराः इत्यादिः। तत्र वचनवक्रताया उदाहरणं भवति एतेषु उदाहरणेषु क्रमेण मैथिली तस्य दाराः इति एकवचनबहुवचनपदयोः उद्देश्यविधेयभावेन एकस्मिन्नेव वाक्ये कथनम्। तथैव नयने कमलवनानि, पाणी सरोजाकराः इत्यनयोः द्वयोः वाक्ययोः नयने कमलवनानीत्यनयोः, पाणीसरोजाकराः इत्यनयोश्च द्विवचनबहुवचनयोश्च प्रयोगाः वचनवक्रतायाः उदाहरणानि सन्ति। अनेन प्रयोगेण काव्ये सहृदयाः कमपि विशेषमेवानन्दमनुभवन्ति। इमानि उदाहरणानि वचनवक्रतायां सुप्रत्ययसम्बन्धीनि सन्ति। तथेव तिङ्प्रत्ययसम्बन्धीन्यपि उदाहरणानि आचार्येण उपस्थापितानि। यथा अस्मद्भाग्यविपर्यादित्यादि, अयं जनः प्रष्टुमनाः, सोऽयं दम्भधृतव्रतः इत्यादि च। एतेषु उदाहरणेषु क्रमेण त्वं न जानासि इति वक्तव्ये प्रथमपुरुषस्य देवो न जानाति तम् इति, तथैव अयं जनः, सोऽयं दम्भधृतव्रतः इत्यनयोः वाक्ययोः उत्तमपुरुषस्यैकवचनस्य प्रयोगविषये प्रथमपुरुषस्य प्रयोगः पुरुषवैचित्र्यवक्रतायाः उदाहरणमस्ति। अनेन प्रयोगेण सहृदयहृदयचमत्कारिता सम्पद्यते इति।

वाक्यवक्रतायामपि एकमुदाहरणं दत्तमाचार्येण। यत्र सम्पूर्णमेव वाक्यं तात्पर्यविषयीभूतमर्थं प्रतिपादयति। यथा- उपस्थितां पूर्वमपास्य लक्ष्मीमिति रघुवंशीये पद्ये सम्पूर्णस्य वाक्यस्यार्थावबोधे

सत्येव अभिलषितार्थप्रतीतिः भवति सेव चाह्लादकारितां सम्पादयति। अत्र यद्यपि वर्णपदयोः वक्रतयोः सत्योः वाक्यवक्रतायाः पुनरुक्ततेव इति पूर्वपक्षः उपस्थाप्यते। परमत्राचार्येण समाहितं यद् वाक्यवक्रतायां सर्वोऽपि उपमाद्यलङ्कारवर्गः समाहितो भवति। अतो वाक्यवक्रता पदवक्रतातो नितरामेव भिन्ना।

## Assignments

1. वचनवक्रतायाः स्वरूपं किम्?
2. किं नाम कारकवक्रता?
3. पुरुषवक्रतायाः एकमुदाहरणं लिखत।
4. कुन्तकमतानुसारेण किं नाम वाक्यम्?
5. अस्मद्भाग्यविपर्ययात् देवः तं परं न जानाति - अत्र का वक्रता?
6. सहस्रशब्दस्य कः अर्थः?
7. अलङ्काराणां अन्तर्भावः कस्यां वक्रतायां भवति?
8. कुन्तकमतानुसारं प्रत्ययाश्रयवक्रतां लक्षणोदाहरणपूर्वकं विवेचयत।
9. कुन्तकमतानुसारं वाक्यवक्रतां निरूपयत।

## Suggested Readings


1. *Vakroktijivitam* of Kuntaka, (ed) K.Krishnamurthy, Karnataka University, Dharwad, 1977
2. श्रीमद्राजानककुन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या डां. प्रज्ञा पाण्डेय (दीक्षित), चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020


## References


1. श्रीमद्राजानककुन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या श्रीपरमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022

2. *Vakroktijivitam* Mal Trans, Chattanatt Achutanunni, Vallathol Vidyapeetham Edappal, 2009

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

# UNIT 4

# प्रकरणवक्रता प्रबन्धवक्रता च

## Learning Outcomes

- कुन्तकस्य साहित्यस्य महत्वं अवगच्छति।
- प्रकरणवक्रतायाः वैशिष्ट्यं जानाति।
- प्रकरणवक्रतायाः लक्षणं उदाहरणञ्च जानाति।
- प्रबन्धवक्रतामभिजानाति।

## Background

अस्माभिः अधीते एकके वक्रोक्तिजीविते वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, प्रत्ययश्रयवक्रता, वाक्यवक्रता इत्यादिवक्रतादीनां निरूपणं कृतम्। इदानीं वक्रतायाः भेदेषु प्रकरणवक्रता पञ्चमः, प्रबन्धवक्रता च षष्ठः भेदोऽस्ति। किन्तु अनयोः परस्परं कश्चन मूलः भेदो न प्रतीयते। उभयोः प्रकरणप्रबन्धयोरियं वक्रता सहजाहार्यसौकुमार्यरूपेण भवति। अत्र सहजेत्यस्याभिप्रायः स्वाभाविकवक्रतया आहार्य इत्यस्य च व्युत्पत्या अर्जितया वक्रतया च सूचयति। सौकुमार्यञ्च रमणीयवक्रतायाः द्योतकमिति। अस्मिन् एकके तत् कथमिति प्रतिपादयति। तत् पश्यामः।

## Keywords

सहजाहार्यसौकुमार्यमनोहरः, नाटकादौ, आह्लादकारित्वमेव, आख्यातम्, ताटस्थ्यम्, सौकुमार्यम्, सन्निधाने, मार्गणमार्गणम्, शिलीमुखः, व्यसनार्णवः

# Discussion

### 4.4.1 प्रकरणवक्रता

*एवं वाक्यवक्रतां व्याख्याय वाक्यसमूहरूपस्य प्रकरणस्य तत्समुदायात्मकस्य च प्रबन्धस्य वक्रतां व्याख्यायते।*

**वक्रभावः प्रकरणे प्रबन्धे वास्ति यादृशः।**
**उच्यते सहजाहार्यसौकुमार्यमनोहरः॥ २१॥**

**अन्वयः** - प्रबन्धे प्रकरणे वा सहजाहार्यसौकुमार्यमनोहरः यादृशः वक्रभावः अस्ति (सः) उच्यते।

**प्रबन्धे प्रकरणे च सहजार्यसौकुमार्यम -नोहरवक्रताभावं वर्तते**

**व्याख्या** - प्रबन्धे = काव्ये। प्रकरणे वा। सहजाहार्यसौकुमार्यमनोहरः- सहजेन = स्वाभाविकया। आहार्यः उत्पादितः, सौकुमार्येण = कोमलतया, मनोहरः = मनोरमश्च। यादृशः = यादृग्विधः वक्रभावः = वक्रत्वम् अस्ति सः वक्रभावः उच्यते = वर्ण्यते।

**वृत्ति - वक्रभावो विन्यासवैचित्र्यं प्रबन्धैकदेशभूते प्रकरणे यादृशोऽस्ति यादृग् विद्यते वा नाटकादौ सोऽत्युच्यते कथ्यते। कीदृशः सहजाहार्यसौकुमार्यमनोहरः सहजं स्वाभाविकमाहार्यं व्युत्पत्त्युपार्जितं यत्सौकुमार्यं रामणीयकं तेन मनोहरो हृदयहारी यः स तथोक्तः।**

**व्याख्या** - वक्रभावः = विन्यासवैचित्र्यम्। प्रबन्धकदेशभूते- प्रबन्धस्य = काव्यस्य, एकदेशभूते एकभागे, नाटकादौ। प्रकरणे वा यादृगस्ति यादृग् विद्यते प्रबन्धे वा नाटकादौ। सः अत्युच्यते कथ्यते। कीदृशः सहजाहार्यसौकुमार्यमनोहरः - सहजम् = स्वाभाविकम्। आहार्यम् = व्युत्पत्त्युपार्जितम्। यत्सौकुमार्यम् = रामणीयकम्। तेन मनोहरः = हृदयहारी यः सः तथोक्तः।

**वृत्ति - तत्र प्रकरणे वक्रभावो यथा- रामायणे मारीचमायामयमाणिक्य-मृगानुसारिणो रामस्य करुणाक्रन्दकर्णनकान्तरान्तःकरणया जनक -**

**राजपुत्र्या तत्प्राणपरित्राणाय स्वजीवितपरिरक्षानिरपेक्षया लक्ष्मणो निर्भर्त्स्य प्रेषितः।**

**व्याख्या-** तत्र प्रकरणे = तन्नाटकादौ। वक्रभावः वक्रत्वम्। यथा- रामायणे = वाल्मीकिरामायणे। मारीचमायामयमाणिक्यमृगानुसारिणः - मारीचस्य = मारीचराक्षसरूपस्य। मायामयस्य = मायायुक्तस्य। माणिक्यमृगस्य स्वर्णमृगस्यानुसारिणः = अनुसरणं कृतवतः। रामस्य रामचन्द्रस्य। करुणाक्रन्दकर्णनकान्तरान्तःकरणया - करुणाक्रन्दम् = करुणार्त्तनादम्। कर्णनेन श्रवणेन। कान्तरम् = अधीरम् अन्तःकरणं यस्यास्तथाविषाया। जनकराजपुत्र्याः = सीतया। तत्प्राणपरित्राणाय - तस्य = रामस्य। प्राणपरित्राणाय = जीवनरक्षायै। स्वजीवितपरिरक्षा-निरपेक्षया स्वजीवितस्य = आत्मप्राणस्य परिरक्षायाः = परित्राणस्य निरपेक्षया = अनपेक्षया। लक्ष्मणः = सैमित्रिः। निर्भर्त्स्य विनिन्द्य। प्रेषितः = प्रहितः।

प्रकरणे मूलकथायां परिवर्तनेन कल्पनया वा या रमणीयता आयाति सा प्रकरणवक्रता

**वृत्ति - तदेतदत्यन्तमनौचित्ययुक्तम्, यस्मादनुचरसन्निधाने प्रधानस्य तथाविधव्यपारकरणमसम्भावनीयम्। तस्य च सर्वातिशयचरित-युक्तत्वेन वर्ण्यमानस्य तेन कनीयसा प्राणपरित्राणसम्भावनेत्येत-दत्यन्तमसमीचीनमिति पर्यालोच्य उदात्तराघवे कविना वैदग्ध्यवशेन मारीचमृगमारणाय प्रयातस्य परित्राणार्थं लक्ष्मणस्य सीतया कातरत्वेन रामः प्रेरितः इत्युपनिबद्धम्। अत्र च तद्विदाह्लादकारित्वमेव वक्रत्वम्। यथा च-**

**व्याख्या** - तत्= तस्मात्। एतत् इदम्। अत्यन्तमनौचित्यम् = अत्यन्तमनुपयुक्तम्। उक्तम् = कथितम्। यस्मात् = यतः। अनुचर-सन्निधाने = सेवकसन्निकटे। प्रधानस्य = प्रमुखस्य। तथाविधव्यापार-करणम् = तत्प्रकारकं कार्यसम्पादनम्। असम्भावनीयम् =असम्भवम्। तस्य रामस्य च। सर्वातिशयचरितयुक्तत्वेन सर्वाधिकोत्तमचरित्र-संयुक्ततया। वर्ण्यमानस्य = कथनीयस्य। तेन कनीयसा = कनिष्ठेन लक्ष्मणेन। प्राणपरित्राणसम्भावना इति एतत् = इदम्। अत्यन्तमसमी-

चीनम् अत्यन्तमसुन्दरम्। इति पर्यालोच्य = एवं विविच्य। उदात्तराघवे उदात्तराघवनामनाटके। कविना = सूरिणा। वैदग्ध्यवशेन = कुशलता युक्तेन। मारीचमृगमारणाय = मारीचरूपहरिणवधाय। प्रयातस्य = प्रस्थितस्य। परित्राणार्थम् = रक्षार्थम्। लक्ष्मणस्य = सुमित्रानन्दनस्य। सीतया = जनकनन्दिन्या। कातरत्वेन = कातरतया। रामः = रामचन्द्रः। प्रेषितः = प्रहितः इति। उपनिबद्धम् = इति रचितम्। अत्र च तद्विदाह्लादकारित्वमेव - तद्विदाम् = काव्यमर्मज्ञानाम्। आह्लादकारित्वमेव = आनन्ददायकत्वमेव। वक्रत्वं = वक्रभावः।

अत्र आह्लादकारित्वमेव वक्रताभावः

**यथा च**

**किरातपुरुषोक्तिषु वाच्यत्वेन स्वमार्गणमार्गणमात्रमेवोपक्रान्तम्। वस्तुतः पुनरर्जुनेन सह तात्पर्यार्थलोचनया विग्रहोवाक्यार्थतामुपनीतः।**

**व्याख्या** - किरातार्जुनीये = किरातार्जुनीयमहाकाव्ये। किरातपुरुषोक्तिषु -किरातवेषधारिणः शिवस्य उक्तिषु कथनेषु। वाच्यत्वेन = वाच्यतया। स्वमार्गण-मार्गणमात्रम् एव = निजबाणान्वेषणमेव। उपाक्रान्तम् = उपनिबद्धम्। वस्तुतः = यथार्थतः। पुनः अर्जुनेन = सव्यसाचिना। सह = साकम्। तात्पर्यार्थलोचनया = तात्पर्यार्थविचारणेन। विग्रहः = युद्धम्। वाक्यार्थताम् = वाक्यार्थरूपम्। उपनीतः = उपन्यस्तः।

**तथा च तत्रैवोच्यते-**

**प्रयुज्य सामाचरितं विलोभनं**
**भयं विभेदाय धियः प्रदर्शितम्।**
**तथाभियुक्तं च शिलीमुखार्थिना**
**यथेतरन्याय्यमिवावभासते॥ ७१॥**

**अन्वयः**- सामाचरितं विलोभनं प्रयुज्य भयं विभेदाय धियः प्रदर्शितम्। शिलीमुखार्थिना तथाभियुक्तं च यथा इतरन्याय्यम् इव अवभासते।

**व्याख्या** - तथा च तत्र = किरातार्जुनीये महाकाव्ये एव। उच्यते =

कथ्यते- सामाचरितम् = सामनीतिस्तस्याचरितम् = आचरणम्। प्रयुज्य = प्रयोगं कृत्वा। धियः = बुद्धेः। विभेदाय = भेदनिमित्तम्। विलोभनम् लोभम्। भयम् = भीतिः। प्रदर्शितम् = दर्शितम्। तथा च शिलीमुखर्थिना = बाणान्वेषणार्थिना त्वया। यथा इतरन्याय्यम् अन्यायपूर्णम् इव। अभियुक्तम् = सर्वथा युक्तम् यथा। अवभासते = प्रतीयते।

### 4.4.2 प्रबन्धवक्रता

**प्रबन्धे वक्रभावा यथा- कुत्रचिन्महाकविविरचिते रामकथोपनिबन्धे नाटकादौ पञ्चविधवक्रतासामग्रीसमुदायसुन्दरं सहृदयहृदयहारि महापुरुषवर्णनमुपक्रमे प्रतिभासते परमार्थतस्तु विधिनिषेधात्मक-धर्मोपदेशः पर्यवस्यति, रामवद्वर्तितव्यं न रावणवदिति। यथा च, तापसवत्सराजे कुसुमसुकुमारचेतसः सरसविनोदैकरसिकस्य नायकस्य चरितवर्णनमुपक्रान्तम्। वस्तुतस्तु व्यसनार्णवे निमज्जन्निजो राजा तथाविधनयव्यवहारनिपुणैरमात्यैस्तैस्तैरुपायैरुत्तारणीय इत्युपदिष्टम्। एतच्च स्वलक्षणव्याख्यानावसरे व्यक्ततामायास्यति।**

प्रायोण समासां पूर्वोक्तानां पञ्चविधानां वक्रतानां सम्मिश्रिणरूपाऽस्ति

**व्याख्या** - प्रबन्धे वक्रभावाः वक्रत्वम् यथा- कुत्रचित् = क्वापि। महाकविरचिते = महाकविविरचिते। रामकथोपनिबन्धे रामकथायाः रामचरितस्य उपनिबन्धे = रचनायाम्। नाटकादौ = रूपकादौ। पञ्चविधवक्रतासामग्रीसमुदायसुन्दरम् = पञ्च प्रकारवक्रतायाः सामग्री, तस्याः समुदायेन समूहेन। सुन्दरम् मनोरमम्। सहृदय-हृदयहारि – सहृदयानाम् = सत्पुरुषाणाम्। हृदयहारि = आह्लादकारि। महापुरुषवर्णनमुपक्रमे महापुरुषाणाम् = महीयसाम्, वर्णनस्य विवेचनस्य। उपक्रमे = प्रसङ्गे। प्रतिभासते = प्रतीयते। परमार्थतस्तु विधिनिषेधात्मकधर्मोपदेशः - विधिनिषेधात्मकः = विधिनिषेध- रूपः। धर्मोपदेशः = धर्मदीक्षा। पर्यवस्यति = पर्यवसानं यास्यति। रामवद्वर्तितव्यम् = रामसदृशस्थातव्यम्। रावणवद् = रावणसदृशं नैव वर्तितव्यम् इति। यथा च तापसवत्सराजे = तापसवत्सराजनामनाटके।

कुसुमसुकुमारचेतसः कुसुमवत् पुष्प-सदृशं सुकुमारम् = सुकोमलम्। चेतो मनः यस्य तस्य। सरसविनोदैकरसिकस्य = रसपूर्णविनोदस्यैकमात्रं रसिकस्य। नायकस्य = प्रधानपात्रस्य । चरितवर्णनम् = वृत्तवर्णनम् उपक्रान्तम् = प्रारब्धम् । वस्तुतस्तु = यथार्थस्तु । व्यसनार्णवे -व्यसनम् एवार्णवः, तस्मिन् = विपत्तिसागरे। निमज्जन् = मज्जन् । निजः = स्वः। राजा = नृपतिः । तथाविधनय-व्यापारनिपुणैः- तथाविधैः = तादृशैः। नयव्यापारनिपुणैः- न्याय-व्यापारदक्षैः। अमात्यैः = मन्त्रिभिः। तैस्तैरुपायैः = तत्तदुपायैः। उत्तारणीयः = उद्धरणीयः। इति = एवम्। उपदिष्टम् = शास्त्रम्। एतच्च इदञ्च स्वलक्षणव्याख्यानावसरे- स्वलक्षणस्य = अत्मरूपस्य । व्याख्यानावसरे = वर्णनकाले। व्यक्तताम् = स्पष्टताम्। आयास्यति = प्रयास्यति।

**एवं कविव्यापारवक्रत्वषट्कमुद्देशमात्रेण व्याख्यातम्। विस्तरेण तु स्वलक्षणावसरे व्याख्यास्यते।**

**व्याख्या** - एवम् = इत्थम्। कविव्यापारवक्रत्वषट्कम् = कविव्यापारवक्रतायाः भेदषट्कम्, वर्ण्यं = विन्यासवक्रतादिकम् । उद्देशमात्रेण = केवलं संकीर्तनेन। व्याख्यातम् = विवेचितम्। विस्तरेण तु = विस्ताररूपेण तु। स्वलक्षणावसरे - आत्म-लक्षणनिरूपणकाले। व्याख्यास्यते = विवक्ष्यते।

## Summarised Overview

वक्रोक्तिजीविते प्रकरणवक्रतायां प्रकरणानुसारेण चमत्कारिता सम्पद्यते। अस्याः वक्रतायाः उदाहरणं रामायणीयमारीचप्रसङ्गस्य उदात्तराघवे परिवर्त्य वर्णनस्य उद्धरणं प्रतिपादितम्।

प्रबन्धवक्रतायां प्रायेण पूर्वोक्तानां पञ्चानां वक्रतानां समावेशो भवति । इयं वक्रता महाकाव्यादेः नाटकादेश्च सम्पूर्णा तात्पर्यरूपा भवति। यथा रामायणस्य अध्ययनेन "रामादिवद्वर्तितव्यं न

रावणादिवदित्यादि" तात्पर्यं प्रतिफलति एव। आचार्यस्य कुन्तकस्य विश्लेषणशक्तिश्च श्लाघनीया वर्तते। तेषामयं ग्रन्थः अलङ्कारशास्त्रस्य मौलिकविचाराणामायतनभाण्डागारः वर्तते । केचन आचार्यास्तु रुद्रटप्रदर्शितां नीतिं स्वीकृत्य वक्रोक्तिं सामान्यशब्दालङ्कारमात्रमेवानमन्ति स्म।

इत्थं वक्रोक्तेः महनीयां भावनां बीजरूपेणोपस्थापनस्य श्रेयः आचार्य भामहमस्ति । तद्बीजं चोदात्तरूपेणाङ्कुरणस्य पल्लवनस्य च कुन्तकमेवास्ति।

## Assignments

1. प्रबन्धवक्रतायाः उदाहरणं लिखत।
2. प्रकरणवक्रतायाः उदाहरणं लिखत।
3. उद्देशमात्रेण इत्यस्य कोऽर्थः?
4. कुन्तकमतानुसारं प्रबन्धवक्रतां विचारयत।
5. कुन्तकमतानुसारं प्रकरणवक्रतां निरूपयत।

## Suggested Readings


1. *Vakroktijivitam* of Kuntaka, (ed) K.Krishnamurthy, Karnataka University, Dharwad, 1977
2. श्रीमद्राजानककुन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या डां. प्रज्ञा पाण्डेय (दीक्षित), चौखम्बा कृष्णदास् अकादमी, वाराणसी, 2020


## References


1. श्रीमद्राजानकुकन्तकविरचितं वक्रोक्तिजीवितम्, व्याख्या श्रीपरमेश्वरदीन पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2022

2. *Vakroktijivitam* Mal Trans, Chattanatt Achutanunni, Vallathol Vidyapeetham Edappal, 2009

**Space for Learner Engagement for Objective Questions**

Learners are encouraged to develop objective questions based on the content in the paragraph as a sign of their comprehension of the content. The Learners may reflect on the recap bullets and relate their understanding with the narrative in order to frame objective questions from the given text. The University expects that 1 - 2 questions are developed for each paragraph. The space given below can be used for listing the questions.

SGOU

Model Question Paper (SET – A)

# SREENARAYANAGURU OPEN UNIVERSITY

**Reg. No....................** **QP CODE..................**

**Name........................**

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE COURSE - 11 - M23SN11DC - काव्यशास्त्रम् 2**

**(CBCS- PG)**

**2023 Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपि उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## SECTION - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x 2=10)**

**(Answer any five Questions in a Paragraph)**

1. काव्यादर्शे वर्तमानाः दश गुणाः के ?
2. आनन्दवर्धनस्य कृतीः काः।
3. डानियल् एच्.एच्. इग्रल्स् आनन्दवर्धनं केन रूपेण वर्णयति?
4. स्वच्छस्वच्छायायासितेन्दवः इति पदे वस्तुध्वनिः कथं व्यज्यते?
5. ध्वनिविरोधिनां त्रयः विकल्पाः के?
6. संज्ञावैचित्र्यवक्रता का ?
7. किं नाम साहित्यम्?
8. कानि पञ्च प्रातिपदिकानि?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page)**

9. रससिद्धान्ते भरतस्य योगदानं स्पष्टं कुरुत।
10. 'लोचनम्' नामकस्य ग्रन्थस्य रचयिता कः? तस्य महत्त्वं च संक्षेपेण लिखत।

11. नाट्यशास्त्रस्य विषयवैविध्यं वर्णयत ।

12. काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥ इति कारिकां व्याख्यात ।

13. वाल्मीकिकाव्ये 'प्रतीयमानस्य' स्वरूपं कथं दृश्यते?

14. अप्रस्तुतप्रशंसायां ध्वनेरन्तर्भूतत्वं कथं भवति ?

15. वक्रोक्तेः लक्षणं व्याख्यात ।

16. काव्यप्रयोजनानि विशदयत ।

17. पर्यायवक्रतायाः एकमुदाहरणं विलिख्य व्याख्यात ।

18. उपचारवक्रता इत्यत्र उपचारपदेन किं प्रयोजनम् ?

## SECTION – C

**(तृतीयो भागः)**

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत ।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. साहित्ये आनन्दवर्धनस्य ध्वनिसिद्धान्तस्य महत्वं विवृणुत ।

20. काव्यस्यात्मा ध्वनिरित्यत्र प्रतिपक्षरूपाणाम् अभाववादीनां मतं विशदयत ।

21. ध्वन्यालोकानुसारं अत्यन्ततिरस्कृतवाच्यध्वनेः उदाहरणद्वयं निरूपयत ।

22. कुन्तकमतानुसारं प्रकरणवक्रतां समर्थयत ।

Model Question Paper (SET – B)

# SREENARAYANAGURU OPEN UNIVERSITY

Reg. No.................. QP CODE........................

Name.......................

**THIRD SEMESTER M.A. SANSKRIT LANGUAGE AND LITERATURE EXAMINATIONS**

**DISCIPLINE COURSE - 11 - M23SN11DC - काव्यशास्त्रम् 2**

**(CBCS- PG)**

**2023 Admission Onwards**

Time: 3 Hours Max Marks: 70

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

## Section - A
## (प्रथमो भागः)

**I. एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।** **(5 x2=10)**

**(Answer any five Questions in a paragraph)**

1. भामहस्य काव्यदृष्टिः कीदृशी ?
2. ध्वन्यालोकस्य द्वे व्याख्ये के ?
3. प्रतीयमानार्थस्य त्रयः मुख्याः प्रकाराः सन्ति-के?
4. प्रतिभायाः स्वरूपं किम्?
5. 'ध्वनिः' इत्यस्य लक्षणं किम् ?
6. किं नाम वक्रोक्तिः ?
7. विशेषणवक्रतायाः एकमुदाहरणं लिखत।
8. किं नाम पदपूर्वार्धवक्रता ?

## SECTION - B
## (द्वितीयो भागः)

**II. एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।** **(6 x 5=30)**

**(Answer any six Questions in a page )**

9. दण्डिनः काव्ये गुणानां प्राधान्यं प्रतिपादयति। स्पष्टं कुरुत।
10. आनन्दवर्धनः ध्वनिसम्प्रदायस्य प्रवर्तकः आसीत्। स्पष्टयत।

11. अलक्षणीयतावादस्य खण्डनं कृत्वा ध्वनिलक्षणं प्रतिपादयत।

12. आनन्दवर्धनः मङ्गलश्लोकेन ध्वनित्रयं कथं निरूपयति?

13. प्रतीयमानस्य वाच्यात् विभिन्नत्वं कथं प्रतिपाद्यते? विवेचयत।

14. 'भाक्तमाहुस्तमन्ये' इति पक्षं निषिध्य ध्वनिलक्षणाया अविषयः इति सम्यक् प्रतिपादयत।

15. क्रियावैचित्र्यवक्रतायाः एकमुदाहरणं विलिख्य विशदयत।

16. मैथिली तस्य दाराः - अत्र वक्रता का? विशदयत।

17. कुन्तकाभिमतं काव्यस्वरूपं निर्दिशत।

18. सहितौ इति पदं कुन्तकमतानुसारं व्याख्यात।

## SECTION - C
**(तृतीयो भागः)**

**III. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x15=30)**

**(Write an essay on any two of the following)**

19. संस्कृतसाहित्यशास्त्रे काव्यलक्षणविषये आलङ्कारिकमतानां भेदं विशदयत।

20. समासोक्ति-आक्षेप-अनुक्तनिमित्तविशेषोक्ति-पर्यायोक्ति-सङ्करादिषु ध्वनेः कथं नान्तर्भावः इति स्पष्टं निरूपयत।

21. कुन्तकमतानुसारं वाक्यवक्रतां समर्थयत।

22. रसवदलङ्कारात् असंलक्ष्यध्वनेः भेदं निरूपयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres

### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

DON'T LET IT BE TOO LATE

# SAY NO TO DRUGS

**LOVE YOURSELF AND ALWAYS BE HEALTHY**



SREENARAYANAGURU OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# काव्यशास्त्रम् 2

COURSE CODE: M23SN11DC

SGOU

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-991145-2-4
9 788199 114524